TAREYA BRĀHMAṆA-ĀRAṆYAKA KOṢA

ऐतरेय ब्राह्मण-आरण्यक कोषः ।

"—I have gone through the Dictionary very carefully and I am glad to testify to the accuracy of the information and the references contained therein which is not surprising in view of the fact that the learned author has in the course of a long life of scholarship specialised in the compilation of similar material and the publication of important reference books with regard to Vedic Literature, Mīmāṃsā and Darśana. The book will not only be useful to students of the Brāhmaṇas and the Araṇyakas but also to Sanskrit scholars in general. The information under each major entry has been given in the words of the Brāhmaṇa or the Araṇyaka itself and is easily assimilated in the context given. I congratulate the publisher on publishing such a useful work which should find appreciation on the part of all scholars and particularly scholars of Vidic Literature."

S M. Katre,
M. A., Ph D. (London),
Director, Deccan College, Post Graduate & Research Institute, Poona.

Price Rs. Eight only.

First Edition 1952.

EDITED BY

KEVALĀNANDA SARASWATĪ

AITAREYA BRĀHMANA-ĀRAṆYAKA KOṢA.

ऐतरेय ब्राह्मण–आरण्यक कोषः ।

"—I have gone through the Dictionary very carefully and I am glad to testify to the accuracy of the information and the references contained therein which is not surprising in view of the fact that the learned author has in the course of a long life of scholarship specialised in the compilation of similar material and the publication of important reference books with regard to Vedic Literature Mimamsā and Darśana The book will not only be useful to students of the Brāhmanas and the Araṇyakas but also to Sanskrit scholars in general The information under each major entry has been given in the words of the Brāhmana or the Araṇyaka itself and is easily assimilated in the context given I congratulate the publisher on publishing such a useful work which should find appreciation on the part of all scholars and particularly scholars of Vidic Literature

S M Katre

M A Ph D (London)

Director Deccan College Post Graduate & Research Institute Poona

Price Rs Eight only

First Edition 1952.

EDITED BY

KEVALĀNANDA SARASWATĪ

AITAREYA BRĀHMAṆA-ĀRAṆYAKA KOṢA

ऐतरेय ब्राह्मण–आरण्यक कोषः ।

"—I have gone through the Dictionary very carefully and I am glad to testify to the accuracy of the information and the references contained therein which is not surprising in view of the fact that the learned author has in the course of a long life of scholarship specialised in the compilation of similar material and the publication of important reference books with regard to Vedic Literature Mīmāṃsā and Darśana The book will not only be useful to students of the Brāhmaṇas and the Araṇyakas but also to Sanskrit scholars in general The information under each major entry has been given in the words of the Brāhmaṇa or the Araṇyaka itself and is easily assimilated in the context given I congratulate the publisher on publishing such a useful work which should find appreciation on the part of all scholars and particularly scholars of Vedic Literature"

S M Katre
M A Ph D (London)
Director Deccan College Post Graduate & Research Institute Poona

Price Rs Eight only

First Edition 1952.

EDITED BY

KEVALĀNANDA SARASWATĪ

निवेदन

श्री स्वामी केवलानंद ह्यानीं बरेंच लेखनकार्य केलेलें मला माहीत होतें. तें लेखन प्रकाशित करण्याला कोणी पुढें येत नाहीं हें पाहून मला वाईट वाटे. स्वामी तर बोलून-चालून अकिंचन. तेव्हां एक पुस्तक आपण छापून काढावें असें मनात आलें व त्याप्रमाणें स्वामींना मीं आपली इच्छा कळविली. ऐतरेय ब्राह्मण व आरण्यक कोष तयार होता तो त्यानीं माझ्या हवालीं केला. त्याला बहुत काल लोटला. सवडीप्रमाणें छापखान्यानें छपाईचें काम करावें अशी माझी इच्छा होती. परंतु ह्या ना त्या कारणानें काम रेंगाळत राहिलें. स्वामींनीं एकदाहि केव्हा छापता म्हणून विचारपूस केली नाहीं. मला मात्र रुखरुख वाटत होती. त्याच्या सत्काराची योजना पुढें आलेली ऐकतांच हा मोका साधावा असा निश्चय करून आमच्या आर्यसंस्कृति मुद्रणालयाला काम करावयास लावलें. स्वामींनीं हस्तलेख तपासून दिला व श्री. चिंतोपत कर्वे यानीं मुद्रितें तपासलीं. त्यामुळें ग्रंथ वेळेवर छापून झाला. ह्याचा मला आनंद होत आहे.

स्वामींच्या ग्रंथाबद्दल बोलण्याचा मला अधिकार नाहीं. त्याची अधिकारसंपन्नता प्रसिद्ध आहे.

सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ।

बदलापूर, कार्तिक व॥ ११
शके १८७४.

ना. गो. चापेकर

वडिलाच्या सदिच्छेप्रमाणें स्वामींचा हा कोष आमच्या मुद्रणालयाचें प्रकाशन म्हणून घेण्यास फार आनंद वाटत आहे.

म. ना. चापेकर,
प्रकाशक, आर्यसंस्कृति मुद्रणालय, लि०.

ॐ नमो महिदासाय ऐतरेयाय ।

प्रस्तावः

'ऋग्वेदोऽथ यजुर्वेदः सामवेदः' इति त्रयीमाचक्षते । अथर्वणस्य चतुर्थस्य यज्ञे प्राधान्याभावात् देशान्तरे वा विद्यमानत्वात् ऋषिभिर्नासौ संगृहीतोऽभूत् प्राचीनतमे काले इत्यैतिहासिकाः । तत्र ऋग्वेदस्य एकविंशतिः शाखा भवन्तीति व्याकरणभाष्यकारः 'एकविंशतिधा बाह्वृच्यं' इति पस्पशायां प्रतिपेदे ।

(१) अथ आश्वलायनगृह्यसूत्रे ब्रह्मयज्ञाङ्गाचार्यतर्पणे माण्डूकेयगणः सांख्यायनगणः आश्वलायनगणश्चेति गणत्रयमुक्तम् । तत्र माण्डूकेयगणे जानन्तिः, बाहविः, गार्ग्यः, गौतमः, शाकल्यः, बाभ्रव्यः, माण्डव्यः, माण्डूकेयश्चेति अष्टौ आचार्या उक्ताः । सांख्यायनगणे कहोडः, कौषीतकः, महाकौषीतकः, पैङ्ग्यः, महापैङ्ग्यः, सुयज्ञः, सांख्यायनः इति सप्त आचार्याः । आश्वलायनगणे च ऐतरेयः, महैतरेयः, शाकलः, बाष्कलः, सुजातवक्त्रः, औदवाहिः, महौदवाहिः, सौजामिः, शौनकः, आश्वलायनश्च इति दश आचार्याः । एतद्गणत्रयसंकलनया पञ्चविंशतिराचार्या भवन्ति इति संप्रदायः ।

(२) अत्रेदमालोचनीयं कहोडः कौषीतकश्चेति भिन्नौ एक एव वेति, एवं सुयज्ञः सांख्यायनः इत्यत्रापि । तत्र भिन्नाविति प्राप्तं, गार्ग्यनारायणेन 'त्रयोविंशतिवाक्यानि, कहोडादिषु अर्थात् तर्पयामिशब्दः कार्यः' इत्युक्तत्वात् (आश्वगृ० ३।४।४), हरदत्तेनापि 'कहोडमित्यादिषु द्वितीयानिर्दिष्टेषु तर्पयामि इति भवति, 'कहोडं तर्पयामि इति' इत्युक्तत्वात् । कहोडकौषीतकयोः सुयज्ञसांख्यायनयोश्च भेदाभावे उक्तसंख्यापूर्तेरभावप्रसङ्गात् इति । अत्रोच्यते । बृहदारण्यकोपनिषदि (३।५) 'अथ हैनं कहोडः कौषीतकेयः पप्रच्छ' इत्युपक्रम्य 'ततो ह कहोडः कौषीतकेय उपरराम' इत्युपसंहृतम् । अत्र 'विकर्णकुषीतकात् काश्यपे' (पा० ४।१।१२४) अपत्ये ढक् कौषीतकेयः, अन्यः कौषीतकिः 'अत इञ्' (पा० ४।१।९५) । सांख्यायनगृह्यसंग्रहे कौसुम्बरवास्तव्यपण्डितवरवासुदेवविरचिते चतुर्थोध्याये उदकतर्पणप्रकरणे 'कौषीतकिः, महाकौषीतकिः' इत्येवोदाहृतम् । यद्यपि सांख्यायनगृह्यसंग्रहपुस्तके एव अन्ते चौखम्बाया १९०९ सने मुद्रिते संग्रहमूलभूते कौषीतकिसूत्रे 'कौषीतकी, महाकौषीतकी इति दीर्घः पठ्यते', तथापि व्याकरणविरोधात् संग्रहविरोधाच्च दीर्घपाठः अपपाठः एवेति स्वीकर्तव्यम् । अथ 'कौषीतकं' इति आश्वलायनीयः पाठः कथमिति चेत्, 'छन्दांसि सर्वे विधयो विकल्प्यन्ते' इति 'छन्दोवत् सूत्राणि भवन्ति' इति च न्यायाभ्यां अतइञमकृत्वा औत्सर्गिकेण 'तस्यापत्यं' (पा० ४।१।९२) इत्यणैव स पाठः साधनीयः, शिवादेराकृतिगणत्वाद्वा सिद्धम् । सर्वथाऽपि कुषीतकपुत्रः कहोडः इति सिध्यति । तेन कहोडः कौषीतकः नाम कुषीतकपुत्रः कहोडः इति एक एवायमाचार्यः आश्वलाचार्येण उक्त इति । एवमेव सुयज्ञसांख्यायनविषयेऽपि ज्ञेयम् । तथाहि । शाङ्खायनश्रौतसूत्रीयः आनर्तीयभाष्यकारः 'बार्हतराथंतरं, वषट् कुर्यात् पुरस्ताद्दीर्घमुपरिष्टात् ह्रस्वम् (१।२।१८) इत्यत्र स्वमतस्थापनार्थं सुयज्ञाचार्यः श्रुतिमुदाजहार' इत्याह, (श्रुतिश्चेयं कौब्रा. ३।५) । एकादशाध्याये च प्रस्तावे 'द्वादशाहशेषं परिभाषा चोक्त्वा प्रक्रमते भगवान् सुयज्ञः सूत्रकारः' इत्याह । तस्मात् सुयज्ञोऽयमाचार्यः शाङ्खायनसूत्रकारः इति स्पष्टम् । आश्वलायनगृह्ये आचार्याणां नामानि येन क्रमेण पठितानि, न तेनैव क्रमेण कौषीतकिगृह्यसूत्रे वा सांख्यायनगृह्यसंग्रहे वा पठितानि । आश्वलायनीये च गणत्रयं यथा स्पष्टमवगम्यते, न तथा कौषीतकिगृह्ये वा सांख्यायनगृह्यसंग्रहे वा शक्यमवगन्तुम् । परंतु कहोडकौषीतकपदयोः यथा अव्यवधानेन आश्वलायनीये पाठः, तथैव इतरत्रापि कहोडकौषीतकिपदयोः अव्यवधानेनैव पाठः, एवं सुयज्ञसांख्यायनयोः अव्यवधानं यथा आश्वलायनीये, तथैव सुयज्ञसांख्यायनयोः । इतरत्रापि । तेन सर्वथाऽपि

कहोडकौषीतकौ कहोडकौषीतकी वा एकैव व्यक्ति । तत्र कहोड इति स्वनाम, कौषीतक इति अणूप्रत्ययान्त, कौषीतकि इति इञन्त वा पितृनाम इति विशेष । एव सुयज्ञसाख्यायनौ सुयज्ञशाङ्खायनौ वा एकैव व्यक्ति इति सिद्धान्त ।

(३) अथ साख्यायनशाङ्खायनशब्दविचार । आश्वलायनीयाचार्यतर्पणे साख्यायनशब्द एव पठित , न शाङ्खायनशब्द , कौषीतकिसूत्रे शाङ्खायनशब्द एव पठित , न तु साख्यायनशब्द । गृह्यसग्रहेऽपि तर्पणे शाङ्खायनशब्द एव पठित , परतु ग्रन्थनाम 'साख्यायनगृह्यसग्रह इति, न तु शाङ्खायनगृह्यसग्रह इति' । किं च ग्रन्थादौ 'ॐसाख्यायनगृह्यस्य दाक्षितश्रेष्ठसूनुना । कृतैषा पद्धतिर्व्याख्या शिष्याणा हितकाम्यया ॥' इति श्लोको ग्रन्थकारीय । एव चतुर्ष्वप्यध्यायेषु अन्ते 'इति अहिच्छत्रविषये कौसुम्बरवास्तव्यश्रीवासुदेवकृते साख्यायनगृह्यसग्रहे अमुकोऽध्याय इति समाप्तिसकल्प । कौषीतकिगृह्यसूत्रान्ते च 'इति शाङ्खायनशाखाया कौषीतकिगृह्यसूत्रे षष्ठोऽध्याय' इति मुद्रितम् । एतावता साख्यायन शाङ्खायनश्चेति किंचिदक्षरभेदेऽपि व्यक्तिरेकैव, न भिन्ने । उच्चारणभेदात्तु शब्दभेद इति निश्चिनुम ।

(४) अथ ऋग्वेदीयचरणव्यूहस्य महिदासकृताया वृत्तौ 'जानन्ति बाहवि इत्यारभ्य माण्डूकेया इत्यन्त माण्डूकेयगण । गार्गी वाचक्नवी इत्यारभ्य साख्यायन इत्येवमन्त साख्यायनगण । एतेषा कौषीतकिब्राह्मणमारण्यक च साख्यायनसूत्र च । ऐतरेय इत्यारभ्य आश्वलायनान्त आश्वलायनगण । एषामैतरेयब्राह्मणमारण्यक च आश्वलायन सूत्र च' इत्युक्तम् । अनेन महिदासेन वृत्त्यन्त 'त्रिदशाङ्कधरामिते गतेऽब्दे मधुमासे दशमी तिथौ सुधाशौ । महिदास बुध परोपकृत्यै चरणव्यूहमिम व्यकारि काश्याम् ॥' इत्यनेन वृत्तिपूर्तिकाल उक्त । काश्यामित्युक्तत्वाऽपि तदुक्तोऽब्द शालिवाहनशकाब्द एव । शक १६१३ चैत्रकृष्ण दशमी इन्दुवासर इति स काल इति श्री शकर नारायण वत्सजोशी इतिहाससशोधका शकावलीं दृष्ट्वा कथयन्ति ।

(५) तत्र साख्यायन शाङ्खायनापरपर्याय एक आश्वलायनश्चापर इति द्वौ आचार्यौ कल्पसूत्रकारावेव, न ब्राह्मणकारौ । इतरे तु आचार्या ब्राह्मणारण्यककारा । यच्चेद शाङ्खायनब्राह्मण शाङ्खायनारण्यक इति च मन्यते तत् वस्तुत कौषीतकिब्राह्मण कौषीतकिआरण्यकमेव स्यात् । नहि ब्राह्मणकार एव सूत्रकार इति वक्तु शक्यमिति ।

(६) कहोड कौषीतक एकैव व्यक्ति , सुयज्ञ साख्यायनश्च एकैव व्यक्ति इत्युक्त प्राक्, शाङ्खायनः आश्वलायनश्चेति द्वावेतौ कल्पसूत्रकारावेव, न ब्राह्मणकारौ इति च इदानीमेवोक्तम् । एव सति आश्वलायनगृह्योक्ता नामाचार्याणा यथाश्रुतानुसारिकल्पनया या पञ्चविंशति सख्या, सा इदानीं चतुर्भिर्यूना सती एकविंशतिर्भवति । तदेव च 'एकविंशतिधा बाह्वृच्य' इति व्याकरणमहाभाष्यकारेणोक्तम् । कहोडकौषीतकयो सुयज्ञशाङ्खायनयोश्च व्यक्तिभेदे शाङ्खायनाश्वलायनयो ब्राह्मणारण्यककारत्वे च स्वीकृते महाभाष्यकारोक्तिरिय नैव सगच्छेत ।

(७) माण्डूकेय नाम प्रथमगणस्य आचार्य अन्तिम ब्राह्मणकार इति स्वीकार्यमेव । अत एव ऐतरेयारण्यकस्थसहितोपनिषदि सहितोपासनाप्रतिपादने महर्षिभेदेन उपासनाविषयविशेषप्रतिपादनावसरे 'पृथिवी पूर्वरूप, द्यौरुत्तररूप, वायु सहिता इति माण्डूकेय ' इत्याद्युक्त्वा 'इति नु माण्डूकेयानाम्' इत्युपसहार कृत सगच्छते । परतु साख्यायनगृह्यसग्रहो नाम चौखम्बायां १९०९ सने यत् पुस्तक मुद्रित तदन्ते अध्यायषट्कात्मक कौषीतकिगृह्यत्वेन यत् सूत्र मुद्रित, तत्र उपाकरणप्रकरण 'प्र युज्य जुहुयादिति हैक आहु , एकानुयाकायाभि इति वा । अध्यायर्षिपायाभिरिति माण्डूकेय । अथ ह स्माह कौषीतकि अग्निमीळे पुरोहितमित्येका ' इत्युक्तम् । अत्र निर्दिष्टो माण्डूकेय सूत्रकार एवेति स्पष्टम् । उपाकरणादिप्रतिपादन हि सूत्रकारस्यैव कृत्य, न ब्राह्मणारण्यककारस्य इति । परतु किंचित् सकटमत्र पुरत प्रादुर्भवति , कथ ब्राह्मणकार सन् माण्डूकेय सूत्रकार स्यादिति । अस्मात् सकटादुन्मोक्तु अतिप्राचीनो माण्डूकेय कश्चित् ब्राह्मणकार स्यात् , ततोऽर्वाचीनस्तु कश्चित् माण्डूकेय सूत्रकार स्यात् , इति स्वीकार्यं गत्यन्तराभावात् । माण्डूकेयसूत्र तु ब्राह्मणमिव दृष्टम् ।

एवं कौषीतकिविषयेऽपि । शाङ्खायनब्राह्मणारण्यकत्वेन आनन्दाश्रममुद्रिते ग्रन्थे 'तदु ह स्माह कौषीतकिः' (२।९, ७।४, ७।१० इ०) इति बहुवारमुपलभ्यते । 'इति कौषीतकं' (३।१ इ०) इति च । ऐतरेयब्राह्मणेऽपि 'पूर्वां पौर्णमासीमुपवसेदिति पैङ्ग्यं, उत्तरामिति कौषीतकं' इति वाक्यं दृश्यते (३२।९।२) । तच्च आनन्दाश्रमीये शाङ्खायनब्राह्मणेऽपि (३ । १) अविकृतमुपलभ्यते । तेन कौषीतकः कौषीतकिर्वा ब्राह्मणकारः इति स्पष्टम् । यच्चेदं कौषीतकिगृह्यसूत्रमितिवदन्ति, न तत् वस्तुतः कौषीतकप्रणीतं सूत्रं, किंतु शाङ्खायनप्रणीतमेव सत् कौषीतकिब्राह्मणारण्यकानुसारित्वात् कौषीतकिसूत्रमिति प्रसिद्धिः क्वाचित्की । तथा च ब्राह्मणमारण्यकं च कौषीतकं, श्रौतं गृह्यं च सूत्रं शाङ्खायनकं इति सिद्धम् ।

(८) अथ पैङ्ग्यं कौषीतकं चेति ब्राह्मणारण्यकद्वयं कौषीतकिब्राह्मणे आनन्दाश्रमे शाङ्खायनत्वेन मुद्रिते ऐतरेयब्राह्मणे च स्पष्टतयोल्लेखात् सिध्यति । यत्तु तत्र शाङ्खायनब्राह्मणं शाङ्खायनारण्यकमिति च मुद्रितं, आरण्यकप्रस्तावनायां च तथा साधितमिव तत्तु आपाततः । नहि सूत्रकार एव ब्राह्मणकारः इत्यस्य अवश्यवक्तव्यत्वात् । शांखायनश्रौतसूत्रीये आनर्तीयभाष्ये च (१०।१०।१) 'महाकौषीतकिब्राह्मणाभिप्रायेण नाम्ना धर्मातिदेशः इति तद्धर्मप्राप्तिः' इत्युक्तत्वात् महाकौषीतकिब्राह्मणमपि आनर्तीयभाष्यकाले उपलब्धमासीत् । ऐतरेयं ब्राह्मणारण्यकं तु इदानीं कण्ठस्थमेव । तथा च माण्डूकेयं, पैङ्ग्य, कौषीतकं, महाकौषीतकं, ऐतरेयं चेति पञ्चविधं ब्राह्मणं सिद्धमेव । तेन यावन्त आचार्यास्तावन्ति ब्राह्मणारण्यकानि इति सिद्धान्तयामो वयम् । तत्र ब्राह्मणद्वयमेवेदानीमुपलभ्येते आश्वलायनशाङ्खायनौ च कल्पसूत्रकारावेव, न ब्राह्मणकारौ । शाङ्खायननाम्ना कैश्चित् घुष्यमाणं तु ब्राह्मणारण्यकं न शाङ्खायनकं, किंतु कौषीतकमेव तत् ।

यत्तु मही देशे काले च वाजसनेयिनः आश्वलायनीयमेव हौत्रं स्वीकुर्वन्ति, तत् शाङ्खायनीयहौत्रवेत्तॄणामलाभात् आश्वलायनीयानां च सुलभत्वात् । वस्तुतस्तु कृष्णयजुर्वेदिभिः आश्वलायनीयं हौत्रं स्वीयाभावे यथा स्वीकार्यं, तथा शुक्लयजुर्वेदिभिः स्वीयहौत्राभावे शाङ्खायनीयमेव हौत्रं स्वीकार्यं नाश्वलायनीयम् । शाकलसंहिता ऐतरेय ब्राह्मणारण्यकं आश्वलायनसूत्रं चेति एका त्रयी आश्वलायनानां कृष्णयजुर्वेदिना च स्वीकारार्हा । बाष्कलसंहिता कौषीतकं ब्राह्मणारण्यकं शाङ्खायनसूत्रं चेति द्वितीया त्रयी शाङ्खायनानां शुक्लयजुर्वेदिना च हौत्रविषये स्वीकारार्हा इति सिद्धान्त इति च ऋग्वेदीयचरणव्यूहस्य महिदासप्रणीते भाष्ये स्पष्टम् ।

(९) अथ संहिता । एकविंशतिधा बाह्वृच्य इति भगवत्पतञ्जलिवचनात् एकविंशतिराचार्याः तेषां एकविंशतिः संहिताः, एकविंशतिरेव ब्राह्मणारण्यकानि चेति शायते । न च ताः संहिताः सर्वथा अक्षरशो भिन्नाः बभूवुः, किंतु क्वचिदक्षरभेदः क्वचित् पदभेदः, क्व चित् ऋचा न्यूनाधिकत्वं, पौर्वापर्यभेदश्चेति तत्तत्संप्रदायभेदात् भेदः । यथा शाकलसंहितायां वालखिल्यसंज्ञकानि एकादश सूक्तानि न सन्ति, द्वादशाहानुष्ठानोपयोगित्वात्तु वैदिकैः खिलत्वेन पठ्यन्ते । विशेषत उपयोगात्तु पदपाठक्रमपाठसर्वानुक्रमसहितानि पठ्यन्ते । (ऋसं. ८।४९–५९) । तानि तु बाष्कलसंहितान्तर्गतानि तत्रापि अन्तिमानि द्विशाणि न बाष्कलेऽप्यन्तर्भवन्ति । शाकले 'समानी व आकूतिः' इति अन्तिमा ऋक्, बाष्कलके तु 'तच्छंयोरावृणीमहे' इति अन्तिमा ऋक् । इति दिक् । अधिकं तु चरणव्यूहस्य महिदासभाष्ये द्रष्टव्यम् । आसु संहितासु महता कालेन पाठकलोपात् भूयस्यः संहिता लुप्ताः स्युः, तिस्रस्तु अवशिष्टाः । ताश्च प्राक् ये त्रयो गणाः माण्डूकेयगणः शाङ्खायनगणः आश्वलायनगणः इत्युक्ताः, तेषां तास्तिस्रः संहिता बभुवुः । पुनश्च माण्डूकेयगणस्य संहिता लुप्ता । अवशिष्टे तु द्वे बाष्कलसंहिता शाकलसंहिता चेति । 'शाकला बाष्कला दोनी' इति मराठीभाषामयगुरुचरित्रे वेदशाखाविचारप्रस्तावे प्रतिपादितम् । तच्च विरोधाभावात् प्रमाणमेव । शाङ्खायनश्रौतसूत्रीये आनर्तीयभाष्ये (१।२।५) 'बाष्कलानामप्रगृह्यः, तदर्थं वचनं' इत्युक्तम् । तेन शाकलसंहितायाः भिन्ना या गुर्जरदेशे ऋग्वेदीया द्वितीया संहिता उपलभ्यते सा बाष्कलसंहितैव । बाष्कलसंहिता कौषीतकिब्राह्मणारण्यकं च शाङ्खायनसूत्राधारः इति निश्चयोऽस्माकम् ।

(१०) 'अथैतस्य समाम्नायस्य विताने योगापत्तिं वक्ष्यामः' इति आश्वलायनश्रौतसूत्रगतं प्रथमसूत्रस्य व्याख्यानावसरे 'एतस्य इति शब्दः निवित्प्रैषपुरोरुक्कुन्तापवालखिल्यमहानाम्न्यैतरेयब्राह्मणसहितस्य शाकलस्य

(२१) अथ ग्रन्थादिसंक्षिप्ताक्षराणि तद्विवरणं च ।

ऋसं.—ऋक्संहिता पण्डितसातवळेकरैः औन्धराजधान्यां मुद्रिता । तत्र मण्डलं सूक्तं ऋक् इत्यङ्कत्रयम् ।

ऐआ.—ऐतरेयारण्यकं आनन्दाश्रममुद्रितम् । आरण्यकं-कंसस्थखण्डं-सूत्रं इत्यङ्कत्रयम् ।

ऐब्रा.—ऐतरेयब्राह्मणम् । अयं संक्षेपः आदौ एकदैव निवेशितः । उत्तरत्र सर्वत्र तु यत्र इतरत् किंचिदक्षरं अङ्कतः प्राङ्नास्ति तत्र आधिकारिकः ऐब्रा. इति संक्षेपोऽस्त्येवेति ज्ञेयम् ।

जै.—जैमिनिमीमांसा अध्यायः पादः अधिकरणं सूत्रं चेति अङ्कचतुष्टयम् ।

द्र०— द्रष्टव्यं इत्यर्थः ।

पा० – पाणिनिः अध्यायः पादः सूत्रं इत्यङ्कत्रयम् ।

प्रयोग— याज्ञिकप्रयोगानुसारेण इत्यर्थः ।

सायणः—सायणभाष्यम् ।

सौत्रं—सूत्रोक्तमित्यर्थः

स्वामी केवलानन्दसरस्वती.

। ॐ नमो गुरुभ्यः ।

ऐतरेय ब्राह्मण-आरण्यक कोपः।

अक्षरपङ्क्तिः—सु मद् पद् वग् दे इति पञ्च अक्षराणि ।

एतानि होतृजपादौ प्रयोक्तव्यानि । अग्निष्टोमे आज्य शस्त्रस्य होतृजपे इयमक्षरपङ्क्तिः पठ्यते । ऐआ ८।६।२.

अक्षरादिध्यानानि- ऊष्माणः स्पर्शाः स्वराः अन्तस्थाः इत्यादीनामुपासनाः । एका ऐआ ३।७, द्वितीया ३।८, तृतीया ३।९।१-२२, चतुर्थी ३।११।१-२.

अग्नयः आरण्येन अग्निना संदह्येरन् तदा झटिति समारोपयेत् अरण्योरात्मनि वा । तदसंभवे अरणी गृहीत्वा पलायेत । गार्हपत्यादाहवनीयाद्वा उल्मुकं गृहीत्वा पलायेत । तस्याप्यसंभवे अग्नये सवर्गाय अष्टाकपालं निर्वपेत् । कुवित्सुनो गविष्टये० मानो अस्मिन् महाधने० इति याज्यानुवाक्ये । आहुतिं वा आहवनीये जुहुयात् अग्नये संवर्गाय स्वाहा इति । (पुनराधानपूर्वकं दर्शपूर्णमासान्तं कृत्वा ततः इयमिष्टिः आहुतिर्वा कर्तव्या इति केचन:) ३२।७।४.

अग्नयः ग्राम्येण अग्निना संदह्येरन् तदा प्रायश्चित्त = अग्नये सवर्गाय अष्टाकपालं निर्वपेत् । कुवित्सुनो गविष्टये० मानो अस्मिन् महाधने० इति याज्यानुवाक्ये । आहुतिं वा आहवनीये जुहुयात् अग्नये संवर्गाय स्वाहा इति । ३२।६।१.

अग्नि नरो दीधितिभिररण्योः इति पञ्चविंशत्यृचं आज्यशस्त्रं महाव्रते अन्नाद्यकामस्य । तत्र । १-१८ ऋचः विराट्छन्दस्काः । १९-२५ त्रिष्टुभः । तिः प्रथमामन्वाह त्रिरुत्तमाम् । ऐआ १।२।१-१२.

अग्निं नरो दीधितिभिः इति पञ्चविंशत्यृचं यत् विश्वजिति आज्यशस्त्रं तदपि महाव्रते वैकृतं द्वितीय आज्यशस्त्रं । प्रवोदेवायाग्नये इति च सप्तर्चं प्राकृतं इति द्वे इति केचित् । तन्न । ऐआ १।१।३.

अग्निं नरो दीधितिभिः इति विश्वजिति महाव्रते चाज्यशस्त्रम् । ऐ आ ५।१।४

अग्निं पुरस्ताद्धरन्ति शामित्रदेशे पशौ नीयमाने. ६।६।८-१०.

अग्निः देवता पृष्ठ्ये षडहे प्रथमेऽहनि । २०।१।१-२.

अग्निः वायोः सकाशाज्जायते, प्राणाद्धि बलात् मथ्यमानोऽधि जायते । ४०।५।१२.

अग्निप्रणयनीया ऋचः । अग्निष्टोमे सोमक्रयोत्तरम् । प्रैषः । ५।२।१। ब्राह्मणस्य गायत्री प्रथमा । २-३। राजन्यस्य त्रिष्टुप् प्रथमा । ४-९। वैश्यस्य जगती प्रथमा । १०-१२।मन्द्रस्वरेण प्रथमा,द्वितीयायामनुष्टुभि उपांशुत्यागः ।१३-१६। अष्टमी परिधानीया । ३७ ४०। त्रिः प्रथमा त्रिरुत्तमा । ४१। उत्तरवेद्या सभाराः । २८.

अग्निमन्थनं । ३।४।६, ३।५।१-४४ । आतिथ्यायां चातुर्मास्येषु च । १४।२।६.

अग्निमन्थनीया ऋचः त्रयोदश । प्रैष 'अग्नये मथ्यमानायानुब्रूहि इत्यध्वर्युः । ३।५।१. अभित्वादेव०' सावित्री। २-४। त्वामग्ने पुष्करादधि० तृचमाग्नेयं गायत्रं। ७-८ । यदि न जायेत यदि वा चिरं जायेत राक्षोघ्न्यः गायत्र्योऽनूच्याः अग्ने हंसि न्यत्रिणं० इत्येताः।३।५।९-१२. राक्षोघ्न्या एकस्यां द्वयोर्वाऽनूक्तयोरेव यदि जायेत 'उत ब्रुवन्तु जन्तवः०' इत्यनुब्रूयात् । १३-१४। आ यं हस्ते न खादिनं०। १५-१९। प्रदेवं देववीतये० प्राद्रियमाणायाभिरूपा । २०-२३। आजातं जात० । २४-२७ । अग्निनाऽग्निः समिध्यते । २८-२९ । त्वं ह्यग्ने अग्निना ।

२०–३२। तं मर्जयन्त । ३३–३४ । यज्ञेन यज्ञमयजन्त इति परिधानीया । ३५–३९।मथितस्याग्नेः अग्नौ प्रहरणे प्रदेव देववीतये । ४०–४१। नि. प्रथमा निरुक्तमामन्वाह । ताः सप्तदश सपद्यन्ते । ४२–४४.

अग्निर्नेता ऋक् मरुत्वतीये शस्त्रे धाय्या महाव्रतादौ । ऐब्रा १।५।७.

अग्निर्वै उद्वान् वायुमनुप्रविशति । सोऽन्तर्धीयते। ४०।५।१०,

अग्निवती इष्टिः 'उद्वरणे' इत्यत्र द्र० । ३२।५।१।

अग्निविहरणं धिष्ण्येषु । आग्नीध्रादेव सदसि अग्नीन् विहरन्ति । १०।४।२.

अग्निषु अन्तरागमने प्रायश्चित्त तदपवादश्च ' अन्तरागमने ' इत्यत्र द्र०। ३२।२१।३,७.

अग्निष्टोमः १-१५ अध्यायेषु प्रतिपादित. उत्तरत्रापि केचिद्विशेषाः उच्यन्ते। अथ प्रयोगपुस्तकानुसारेण अग्निष्टोमस्य हौत्रविषये रूपरेखा उच्यते । सोमप्रवाकः । वरणम् । मधुपर्क. । दीक्षणीया । प्रायणीया। सोमक्रयः । आतिथ्या । तानूनप्त्रम् । आप्यायनम् । निह्नवः । प्रवर्ग्यः । उपसद् । अग्निप्रणयनम् । हविर्धानप्रणयनम् । अग्नीषोमप्रणयनम् । अग्नीषोमीय पशु. । ऐन्द्राग्न पशुः विच्छिन्नसन्धानार्थम् । आश्विन पशु दौर्भाग्यनिरासार्थम् । प्रहुताहुतयः । दण्डप्रदानम् । वनस्पतियागः । यूपः ।प्रहुताहुतय.। दण्डप्रदानम् । अध्रिगुः । मनोता। प्रातरनुवाकः । अपोनप्त्रीया. । उपांशुग्रहः । अन्तर्यामग्रहः । उपांशुसवन. ग्रावा । बहिष्पवमानम् । सवनीयः पशुः । अग्निमन्थनम् । प्रहुताहुतयः । दण्डप्रदानम् । पर्यग्निकरणम् । उपरपानानि । उपवेशनम् । सवनीयपुरोडाशाः । द्विदेवत्यप्रचारः । उन्नीयमानानुवचनम् । प्रस्थितयाज्याः । द्विदेवत्यग्रहभक्ष । ऋतुयाजाः। आज्यशस्त्रम् । होतृजपः–शस्त्र–शंसनः–याज्या–भक्ष. इद मतिरिक्त भवति । प्रउग शस्त्रम् । मैत्रावरुणशस्त्रम् । ब्राह्मणाच्छंसिशस्त्रम् । इति प्रात.सवनम् । ग्रावस्तोत्रम् । माध्यन्दिनपवमानः । दधिघर्मः । सवनीयपुरोडाशः । पशुपुरोडाशः । उन्नीयमानानुवचनम् । प्रस्थितयाज्याः । दक्षिणाः । मरुत्वतीयग्रहप्रचार. । मरुत्वतीयशस्त्र होतुः । निष्केवल्यं शस्त्रं मैत्रावरुणस्य । (मैत्रावरुणशस्त्रम्) । ब्राह्मणाच्छंसिशस्त्रम् । अच्छावाकशस्त्रम् । इतिमाध्यंदिनं सवनम् । आदित्यग्रहः । आर्भवः पवमानः । विप्रुड्ढोमः । हविर्यागः । वनस्पतियागः । स्विष्टकृत् । इडा । सवनीयपुरोडाशाः । स्विष्टकृत् । उन्नीयमानानुवचनम् । प्रस्थितयाज्याः । इडोपाह्वानम् । सावित्रग्रहप्रचारः । वैश्वदेव शस्त्रम् । घृतयागः सोमयागः घृतयागः । पात्नीवतग्रहः । आग्निमारुत शस्त्रम् । पाशुकं कर्म । हारियोजनः । इति तृतीयसवनम् । निष्क्रमणम् । समाहुतयः । दधिद्रप्सभक्षणम् । सख्यविसर्जनम् । प्रायश्चित्तानि । अवभृथः । उदयनीया । मैत्रावरुणी आमिक्षा । देविकाहवींषि । उदवसानीया । इति ।

अग्निष्टोमः आज्यशस्त्रप्रभृतिः आग्निमारुतान्तः । कौब्रा १६।१.

अग्निष्टोमगत आग्निमारुतशस्त्र पृष्ठ्यषडहगतप्रथमाहस्य आग्निमारुतशस्त्रं च एकमेव । २०।२।१५.

अग्निष्टोमनिष्पादकाः स्तोमाश्चत्वारः त्रिवृत्, पञ्चदशः सप्तदश, एकविंशश्चेति । ऐब्रा १।८।७ सायणः ।

अग्निष्टोमप्रशंसा । १४।१–६.

अग्निष्टोमस्य नवतिशतं (१९०) स्तोत्रीया ऋचः । प्रातःसवने बहिष्पवमाने त्रिवृत् स्तोमः, आज्यशस्त्राणि चत्वारि पञ्चदशस्तोमकानि इति (६९) स्तोत्रीयाः । माध्यंदिने पवमानं पञ्चदशं, पृष्ठस्तोत्राणि चत्वारि सप्तदशस्तोमकानि इति (८३) । तृतीयसवने आर्भवः पवमानः सप्तदशस्तोमकः, यज्ञायज्ञीयं च एकविंश इति (३८) मिलित्वा (१९०) । १४।१।४ सायणः ।

अग्निष्टोमस्य यथा प्रायणीया तथा उदयनीया, विशेषस्तु अस्ति । १४।५।४–८

अग्निष्टोमस्य स्तोत्राणि द्वादश, शस्त्राणि च द्वादश । १४।१।६, १६।४।६.

अग्निष्टोमे अहीने च मैत्रावरुण ब्राह्मणाच्छंसि- अच्छावाकानां परिधानीयाः । ' परिधानीया ' शब्दे द्र० । २०।४।५.

अग्निष्टोमे ऋतुप्रचारे ऋतुयाजार्थं मैत्रावरुणः होतादीन् प्रेष्यति । २४।४।२ सायणः ।

अग्निष्टोमे ऋतुयाजेषु प्रैषवषट्कारौ भवत, परतु प्रैषमन्त्र पठित्वा होतर्यज इति प्रैषो मैत्रावरुणस्य भवति। होत्रादयोपि प्रैषरूपमेव याज्या पठित्वा वषट्कार कुर्वन्ति। प्रैषानन्तर अग्न ऋक् न भवति। २२।४।२ सायण:।

अग्निष्टोमे तृतीयसवने होत्राकाणा शस्त्राणि न सन्ति अतिरात्रे तु सन्ति। ३०।५।१.

अग्निष्टोमे दक्षिणासु नीतासु ता अनु सुब्रह्मण्या सतिष्ठते। २६।३।१२.

अग्निष्टोमे निष्केवल्यशस्त्रान्ते उक्थ वाचीन्द्रायोपशृण्वते त्वा इति जप:। तत्र उक्थ वाचीन्द्राय इति भाग. उक्थसपत् नाम। उपशृण्वते त्वा इति भागस्तु उक्थवीर्यं नाम। ५।१२।३-४.

अग्निष्टोमे प्रात.सवने अच्छावाकस्य शस्त्र इन्द्राग्नी आगत० इति। ऐआ ५।१।५ सायण.।

अग्निष्टोमे प्रात.सवने आज्य शस्त्रं होतु:, प्रउग होतु:, मैत्रावरुणशस्त्रं ब्राह्मणाच्छसिशस्त्र अच्छावाकशस्त्र चेति पञ्च। तत्रैक प्रउग इतराणि चत्वारि आज्यानि इत्युच्यन्ते। माध्यंदिने सवने मरुत्वतीय होतु, निष्केवल्य मैत्रावरुणस्य, मैत्रावरुणशस्त्र, ब्राह्मणाच्छसिशस्त्र, अच्छावाकशस्त्र चेति पञ्च। तृतीयसवने वैश्वदेव होतु:, आग्निमारुत होतु: इति द्वे। मिलित्वा द्वादश शस्त्राणि। प्रयोग.।

अग्निष्टोमे प्रात सवने मैत्रावरुणस्य शस्त्र आनो मित्रावरुणा०। ब्राह्मणाच्छसिन आ याहि सुषुमा हिते० इति। अच्छावाकस्य इन्द्राग्नी आगत० इति। ऐआ। ५।१।५ सायण:।

अग्निष्टोमे माध्यदिने मरुत्वतीय होतु शस्त्र आ त्वा रथ इत्यादिक तदन्ते च जनिष्ठा उग्रः सहसे तुराय इति सूक्तम्। ऐआ ५।१।८ सायण।

अग्निष्टोमे शस्त्राणि द्वादश। तेषु आज्य प्रथम, तत्राग्निर्देवता। आग्निमारुत अन्तिम तत्र विष्णुराम्नात. इति अग्नि अवम, विष्णु, परम इत्युक्तम्। ऐआ उपक्रमे सायण:।

अग्निष्टोमे सवनानि अधस्त्वरमाणाश्चरेयु:। १४।६।१.

अग्निष्टोमे होता उत्तमे शस्त्रे परिधानीयाया उत्तमे वचने अन्तिम चतुरक्षर द्विरुक्त्वा प्रणुयात् ' यज्ञरिव्रे यज्ञरिश्रो३३३म् इति। अतिरात्रे तु धेहि चित्र धेहि चित्रो३३३म् इति। २८।७।१३.

अग्निष्टोमे होत्रादय: ऋतुग्रहप्रचारे मैत्रावरुणेन प्रैषसूक्तगतेन प्रेषिते सति याज्यया वषट्कुर्वन्ति। अध्वर्युयजमानौ तु प्रेषितौ स्वस्वयाज्या ' होतुरेतद्यज ' इति होत्रे प्रयच्छत:, स्वय वा पठत:। २।२।४२ सायण.।

अग्निसंसर्गे प्रायश्चित्त। गार्हपत्याहवनीययो: ३५।५।२, अग्निना ग्रयाणा ३, अन्यैरग्निभि: ४, दिव्येनाग्निना ३२।६। २, शवाग्निना ३, आरण्येनाग्निना ४। तत्तत्र शब्दे द्र ०।

अग्निहोत्रमधिश्रित अमेध्यमापद्येत तदा सर्वं अग्निहोत्रहवण्या पर्यासिच्य प्राङुदेत्य नित्या समिधमाधाय उत्तरत उष्ण भस्म निरुह्य मनसा अग्निहोत्रमन्त्रमनुद्रुत्य प्रजापते न त्वत् इति ऋचा वा (न मनसा नोपाशु) जुहुयात्। उन्नयनकाले एकस्मिन् द्वयोर्वा उन्नीतयो: सतो. अमेध्यपाते अदुष्ट द्रव्यान्तर अधिश्रयणादिना सस्कृत्य जुहुयात्। ३२।४।१.

अग्निहोत्र अधिश्रित स्कन्दति वा विष्यन्दते वा तदा अद्भिरुपनिनयेत्। दक्षिणेन पाणिना अभिमृश्य-जपेत् दिव तृतीय यज्ञोऽगात् ० ययोरोजसा स्कभिता रजासि ० (सौत्र) इति मन्त्रद्वयम्। ३२।४।२ ५.

अग्निहोत्र अस्तमिते साय जुहोति, उदिते प्रात। २५।४।१८

अग्निहोत्र (हवि.) आहवनीय प्रति नयनकाले स्खलेत् भ्रश्येत वा तत्रैवोपविश्य तत्रैवानीताया: स्थाल्या: सकाशात् पुनरुन्नीय जुहुयात्। ३२।४।६.

अग्निहोत्र वैश्वदेव षोडशकल = रौद्रं गवि सत् (पय यदा गवि भवति तदा तत् रुद्रदेवताक इत्यर्थ एव उत्तरत्र), वायव्य उपावसृष्ट (वासरू पिऊ लागल्यावर), आश्विन दुह्यमान, सौम्य दुग्ध, वारुण अधिश्रित (तापत ठेवलें असता), पौष्ण समुदन्त (वर येऊ लागता), मारुतं विष्यन्दमान (उतूं जाऊं

लागता), वैश्वदेव निन्दुमत्, मैत्र शरोगृहीत (साय आली असता), द्यावापृथिवीयमुद्वासित (खाली उतरल्यावर), सावित्र प्रक्रान्त (होमाकरिता नेण्याच्या आरंभी), वैष्णव ह्रियमाण, बार्हस्पत्य उपसन्न (आहवनीया जवळ ठेवलेलें), अग्नि पूर्वाहुति, प्रजापतेरुत्तरा । ऐन्द्र हुत, इति षोडशकलत्वम् । २५ । १ ।५-८.

अग्निहोत्र साय प्रातश्च स्वाहाकारेण जुहुति । १४ । २ । ३.

अग्निहोत्रदोहकाले अग्निहोत्री (धेनु.) वत्सेनोपसृष्टा यदि उपविशेत् तदा यस्माद् भीषा निषीदसि० इत्यभिमन्त्र्य उदस्थाद्देव्यदिति० इत्युत्थापयेत् । उदपात्र अस्या मुखे ऊधनि च उपगृह्णीयात् । एना ब्राह्मणाय दद्यात् । २५ । २ । १-५ । यदि वाश्येत (हबरल्यास) अन्न आदयेत् सूयवसाद् भगवती० इति । ६ यदि स्पन्देत स्पन्देनेन च पय स्कन्देत् तदा स्कन्न अभिमृश्य जपेत् यदद्य दुग्ध पृथिवी० इति । ७-८ । परिशिष्टेन जुहुयात् यदि अल होमाय स्यात् ९ । सर्वस्मिन् स्कन्ने अन्या दुग्ध्वा जुहुयात् । अन्याऽभावे दधियवाग्वादिना जुहुयात् । १०-११ । सर्वथा असंभवे तु 'अह श्रद्धा जुहोमि' इति सकल्परूप श्रद्धाहोम एव कर्तव्य ।

अग्निहोत्रस्य प्रशसा । २५ । ३

अग्निहोत्रस्य सायमाहुतय प्रातराहुतयश्च मिलित्वा (७२०) भवन्ति । ता यजुष्मत्य इष्टका एवेति ध्यातव्यम् । २५ । ३ । ११-१२.

अग्निहोत्रादि अपत्नीकस्यापि भवति । तदेषाऽभि यज्ञगाथा गीयते । यनेत् सौत्रामण्यामपत्नीकोऽप्यसोमप । मातापितृभ्यामनृणार्थात् यजेति वचनाच्छ्रुति (श्रुते) इति । ३२।८ । ९-१६. । तस्मादपत्नीकस्य आधान कुर्वन्ति । ३२ । १० । ३ । अपत्नीक अग्निहोत्र जुहोति । ३२ । १० । १ ४.

अग्निहोत्रीधेनुविषये प्रायश्चित्तानि । ३२।२। ' अग्निहोत्रकाले ' इत्यत्र यदुक्त तदेवात्र प्रायश्चित्त प्राधान्ये नोक्तम् ।

अग्निहोत्रे अधिश्रिते यजमानमरणे ' अधिश्रिते ' इति शब्देद्र० । ३२।१।२.

अग्निहोत्रे उदितहोम सिद्धान्त । अनुदितहोमस्तु कौषीतकिना, स तु अत्र निन्दित । २५।४।-६.

अग्निहोत्रे ' उद्धराहवनीय ' इति यजमान अध्वर्यु प्रेष्यति । साय अस्तमयात् प्राक् प्रातश्च उदयात् प्राक् २५।१।१ ४

अग्निहोत्रे मन्त्री ' भूर्भुव स्वरोऽऽऽ मग्निर्ज्योतिर्ज्यो तिरग्नि स्वाहा ' इति साय जुहोति । ' भूर्भुव स्वरोऽऽऽसूर्योज्योतिर्ज्योति सूर्य स्वाहा ' इति प्रात । २५।६।४

अग्नीना त्रयाणामपि उपशान्तौ अग्नये तपस्वते जनद्वते पावकवते अष्टाकपाल निर्वपेत् । आ याहि तपसा जने० आ नो याहि तपसा जने० इति याज्यानुवाक्ये । आहुतिं वा आहवनीये जुहुयात् अग्नये तपस्वते जनद्वते पावकवते स्वाहा इति । ३२।७।४.

अग्नीना त्रयाणामपि मिथ ससर्गे प्रायश्चित्त । अग्नये विविचयेऽष्टाकपाल निर्वपेत् । स्वर्गवस्तारुपशमरोचि० त्वमग्ने मानुषीरीळते विश ० इतियाज्यानुवाक्ये । आहुतिं वा आहवनीये जुहुयात् अग्नये विविचये स्वाहा इति । ३२।५।३

अग्नीना दिव्येनाग्निना ससर्गे(एकस्यापि),अग्नयेऽप्सुमते अष्टाकपाल निर्वपेत् । अप्स्वग्ने सधिष्टव० मयोदधे मेधिर पूतदक्ष० इति याज्यानुवाक्ये । आहुतिं वा आहवनीये जुहुयात् अग्नयेऽप्सुमते स्वाहा इति । ३२।६।२.

अग्नीना शवाग्निना ससर्गे प्रायश्चित्त अग्नये शुचयेऽष्टाकपाल निर्वपेत् । अग्नि शुचिव्रततम ० उदग्ने शुचयस्तव० इति याज्यानुवाक्ये । आहुतिं वा आहवनीये जुहुयात् अग्नये शुचये स्वाहा इति । ३२।६।३

अग्नीषोमप्रणयनीया ऋच । अग्नीषोमाभ्या प्रणीयमानाभ्यामनुब्रूहि इति प्रैष । ५।४।१. सावीर्हि देव प्रथमाय० इति सावित्री प्रथमा । २ ३, प्रैतु ब्रह्मणस्पति० इति ब्राह्मणस्पत्या द्वितीया । ४ ६, होता देवो अमर्त्य ० इतित्रृच आग्नेय गायत्रमन्वाह सोमे राजनि प्रणीयमाने । ७ ९,उपत्वाग्ने दिवेदिवे इति तिस्र.,

उपप्रियं पनिप्नत इत्येका। १०-११, अग्ने जुषस्व इति आग्नीध्रे आहुत्या हूयमानायामन्वाह।१२-१३,सोमो जिगाति इति तृच सौम्य गायत्रमन्वाह तत्र सोम: सधस्थमासदत् इत्यन्तिमः पादः आग्नीध्रस्थानमतिक्रम्य पृष्ठतः कृत्वा अनुब्रूयात्। १४-१५, तमस्य राजा इति वैष्णवी। १६-१९, अन्तश्च प्रागा इति सोमे हविर्धाने प्रपद्यमाने अन्वाह। २०, श्येनो न योनिं इति सोमे हविर्धानसमीपवर्तिनि सति अन्वाह। २१-२४, अस्तम्नाद् द्या इति परिधानीया। २५-२६, एवा वन्दस्व वरुण इति परिधानीया बान्धवजीवनकामस्य अभयकामस्य च। २७-२८, तिः प्रथमा त्रिरुत्तमा। २९-३१.

अग्नीषोमीयः पशुः। तत्र आलम्भविधि। ६।३।९, पशोः स्वरूप। १०, शेषभक्षण। ११-१२, आप्रियः (प्रयाजाः)। ६।१।१-१५, यथर्षि आप्रियः। १६, पर्यग्निकरण। ६।५।१-५,७।१।१-२, अध्रिगुः। ६।५।६।९, ६।६।१-१६, ६।७।१-११, जपः। ६।७।१२-१३, पशुपुरोडाश. व्रीहिमयो यवमयो वा। ६।८।१।८, ६।९-१-४, ७।१।१०-१३, वपायाज्या ६।९।५-६, पशुपुरोडाशयाज्या। ६।९।७ ८, पशुपुरोडाशस्ययाज्या। ६। ९। ९-१०, पशुपुरोडाशस्य इडोपाहान, ११, मनोतासूक्ते प्रैषः। ६। १०। १, मनोतासूक्त। २-४, पशुप्रधानयाज्या। ५-७, वनस्पतियाग.। ८-९ पशुस्विष्टकृत्। १०, पडिडा। ११, पर्यग्निकरण। ७। १। १-२, शामित्रे पशोर्नयन। ३, उत्सुक पुरस्ताद्धरन्ति। ४-५,६। ६।-८-१०, बर्हिःप्रक्षेप पशोर्हननस्थाने। ७।१।६-७, अवटः पुरीषस्थापनार्थः। ८-९, स्तोकानुवचनीयाप्रैषः। ७।२।१-२, स्तोकानुवचनीयाः। ३-१८, वपाहोमः। ७।३।१-७. अङ्गहोमः तृतीयसवने श्रपयित्वा। ८-९. अन्वाहुति-आज्याहुति सोमाहुतिप्रशंसा। ७। ४। २, वपा पञ्चावत्तैव। ७।४।३-७, पञ्चावत्तत्व च आज्यस्योपस्तृणाति हिरण्यशल्कः वपा हिरण्यशल्कः आज्यस्योपरिष्टादभिघारयति इति। हिरण्याभावे आज्यम्। (यातील प्रत्येक विषयाचें विवरण त्या त्या शब्दावर पहावें.)

अग्नीषोमीयः पशुः सप्तदशे अहनि १५।१।५.

अग्नीषोमीयः पशुः पत्नीसंयाजान्तः। १५।१।५.

अग्नीषोमीय पशौ यावत्या वाचा कामयीत तावत्या अनुब्रूयात। १५।१।७.

अग्नेः चित्याग्नेः उपस्थान महाव्रते माध्यंदिने होता। ५।२।२-६.

अग्नेः धिष्ण्येषु विहरणं आग्नीध्रात्। १०।२।२.

अग्नेः मथितस्य अग्नौ प्रहरणं आहवनीये। ३।५। २०-२३, ४०-४१.

अग्नेरायुः नाम मन्त्रकाण्डं, एतशप्रलापाः नाम अयातयामं नाम। ३०।७।२.

अग्नेर्वै आदित्यो जायते। ४०।५।१३.

अग्नौ अग्नेरुद्धरणे प्रायश्चित्तं। 'उद्धरणे' इत्यत्र द्र। ३२।५।१.

अग्न्याहुतिः प्रशस्ता मन्थने कृते। ७।४।१.

अङ्गहोमः अग्नीषोमीयपशोः श्रपयित्वा तृतीयसवने। ७।३।८-९.

अङ्गिरसामयनं नाम सत्र अतिरात्रौ आद्यन्तौ, चतुर्विंश उक्थ्यो द्वितीयमहः, शेष सर्वे पृष्ठ्याः षडहाः। १८।३।५ ८.

अच्छावाकः ऋत्विक् उक्थ्ये तृतीयसवने ऐन्द्रावैष्णव शंसति, ऋतुर्जनित्री० इति। तस्य स्तोत्रियानुरूपौ ऐन्द्रौ अधाहीन्द्र गिर्वणः, इयं त इन्द्र गिर्वणः इति। २८।६। १०.

अच्छावाक' यो ब्राह्मणो बह्वृचो वीर्यवान् स्यात् सोऽच्छावाकीया कुर्यात्। १०।४।६.

अच्छावाकशस्त्र अग्निष्टोमे प्रात सवने ऐन्द्राग्न चतुर्थमाज्य इन्द्राग्नी आगतं सुत इति, प्रतिपत् तृचः इन्द्राग्नी आगत सुत, अनुचरः तृचः इन्द्राग्नी अप, सूक्तं तोशा वृत्रहणा (ऋग ३।१२।४-६) इहेन्द्राग्नी उप (ऋग ११।१—२१।६) इयं वामस्य (ऋग ७।९४।१-९) अत्र नवमी परिधानीया। अच्छावाकशस्त्र अग्निष्टोमे मध्यंदिने पञ्चमम्। प्रतिपत् प्रगाथः स्तोत्रियः तरोभिर्वो विदद्वसु, अनुचरः प्रगाथः तरणिरित् सिषासति, प्रगाथ ऐन्द्रः उदिन्न्वस्य रिच्यते, सूक्त भूय इद् वावृधे (१-५) इमामू

प्रभृतिं (१-१०) अत्रदशमी परिधानीया । शस्त्रयाज्या पिबा वर्धस्व । प्रयोगे ।

अच्छावाकशस्त्रं चतुर्विंशेऽहनि महाव्रते च प्रातःसवने आसुते सिञ्चत श्रियम् । ऐआ ५।१।५.

अच्छावाकस्य अग्निष्टोमे प्रातःसवने परिधानीया गोमद्धिरण्यवत्, विकृतौ आहं सरस्वती वतोः । अग्निष्टोमे माध्यंदिने शुनं हुवेम । विकृतौ नूनं साते । अग्निष्टोमे विकृतौ च तृतीयसवने उभा जिग्यथुः । २७।४-५.

अच्छावाकस्य अहरहःशस्यं अभितष्टेव दीधया । अहीने माध्यंदिने सपाता्परिष्टात् । २९।४।१३–२२

अच्छावाकस्य अहरहःशस्ये सूक्ते प्रतिपत् उरु नो लोकमनु। २९।६।५.

अच्छावाकस्य अहर्गणेषु ऐन्द्राग्नशस्त्रे आरम्भणीया यत्सोम आसुते । २७।३।५.

अच्छावाकस्य अहीनसूक्त माध्यंदिने शासद् वह्निर्जनयन्तः । इदमेव चतुर्विंशे अभिजिति विषुवति विश्वजिति महाव्रते पराञ्चिषु अहःसु अभ्यावर्तिषु च । २९।२।५,८.

अच्छावाकस्य अहीने परिधानीया उभा जिग्यथुः । २८।७।६। उक्थ्ये तु अन्त्यचतुरक्षराभ्यासः ऐरयेथामैरयेथा इति । २८।७।१२.

अच्छावाकस्य अहीने प्रातःसवने परिधानीया आहं सरस्वतीवतोः इति । सा मुक्तिर्नाम । माध्यंदिने नून साते। सा विमुक्तिर्नाम । २९।६।८–१०, २९।७।३.

अच्छावाकस्य अहीने प्रातःसवने प्रस्थितयाज्या प्रातर्यावभिरागत । २८।२।६। माध्यंदिने इन्द्राय सोमाः प्रदिवो। २८।३।१२ । तृतीयसवने इन्द्राविष्णू पिबतम्। २८।४।११.

अच्छावाकस्य अहीने माध्यंदिने द्वे सूक्ते शंसनीये भूय इत्० इमामूषु । २८।५।६.

अच्छावाकस्य उक्थ्ये तृतीयसवने आरम्भणीयं सूक्तं जागतं ऋतुर्जनित्री । अन्ते त्रैष्टुभं अष्टर्चं ऐन्द्रावैष्णवं सं वा कर्मणा । १५।५।३, २८।७।२–४.

अच्छावाकस्य चतुर्थेऽहनि आवापिकस्तृचः प्रयोमहे इति विराट्छन्दस्कः । किंवा यो वाचा विवाचो मृध्रवाचः इति वैमदस्तृचः । पञ्चमेऽहनि समिन्द्र गर्दभं मृण इत्यादिस्तृचः पाङ्क्तः । षष्ठेऽहनि आदित्ते अस्य वीर्यस्य चर्किरन् इति पारुच्छेपः आत्यष्टः तृचः । २९।३।८-९

अच्छावाकस्य तृतीयसवने शिल्पेषु अन्ते ऋतुर्जनित्री इत्यादयः नाराशंसभिन्ना ऋचः शंसनीयाः । २८।८।१–३

अच्छावाकस्य दक्षिणः असः पशुभागः । ३१।१।२.

अच्छावाकस्य षष्ठेऽहनि प्रवोमहे एवयामरुतं जागतं अतिजागतं वा सूक्तं मारुतं शंसनीय तत्र न्यूङ्खः । ३०।४।१-४.

अच्छावाकस्य षष्ठेऽहनि माध्यंदिने द्यौर्नय इन्द्र इति विष्णुलिङ्गोपेत मारुतं एवयामरुतं सूक्तं शंसनीयम् । ३०।४।१४-१५.

अच्छावाकस्य षष्ठेऽहनि धिष्ण्यशस्त्रे नामाकस्तृचः ता हि मध्यंभराणाम् । २९।८।१-३.

अच्छावाकस्य सदःप्रवेशे विशेषः । पुरस्तादन्ये होत्रकाः सदः प्रसर्पन्ति पश्चाऽच्छावाकः । १०।४।५.

अच्छावाकस्य सोमविवृद्धौ आवापिकं सूक्तं आयाह्यर्वाङुप । २९।३।१०–११.

अजःमेध्यः प्रयुक्ततमः । ६।८।३.

अञ्जःसवः=अञ्जसा हविष्पशुसकर्यमन्तरेण ऋजुमार्गेण, सवः सोमाभिषवः यस्मिन् यागे सः। यत्र ग्रावा इति नवर्चे सूक्तं, तत्र पञ्चमादिभिश्चतसृभिः अभिषवः, नवम्या द्रोणकलशे प्रक्षेपः, आयाभिश्चतसृभिर्होमः । अनन्तरमेवावभृथः त्वं नो अग्ने इति द्वाभ्याम् । प्रत्येत्य शुनाश्चित् इत्यृचा आहवनीयस्योपस्थानं इति। सोयं अञ्जःसव.। ३३।५।१.

अञ्जनं नेत्रयोः दीक्षितसंस्कारः । १।३।६-७.

अञ्जनं यूपस्य । प्रैषः अञ्जमो यूपमनुब्रूहि इति। ६।२।१, अञ्जन्ति त्वामध्वरे इत्यादयः सप्त ऋचः अञ्जनानुवचनीयाः । तत्र अञ्जने प्रथमा, उच्छ्रयणे द्वितीया, युवा सुवासा इति सप्तमी परिव्ययणे सा च परिधानीया । त्रिः प्रथमा त्रिरुत्तमा । ६।२।१-१३.

अञ्जने महावीरस्य अनुवचनीया। अञ्जन्ति यं प्रथयन्तो ४।२।६.

अतिक्रमः उपसत्सु। सकृदतिक्रम्य आश्रावयति। ४।१।२.

अतिच्छन्दसं जगती असृजत। १९।६।६.

अतिच्छन्दाः छन्दः पृष्ठ्ये षडहे षष्ठेऽहनि। २२।७।१.

अतिथिः यद्यपि दरिद्रः याचनार्थं चरति तथापि सन्मार्गवर्ती श्रेष्ठश्च भवति। न वा असन्तमातिथ्यायाद्रियन्ते। ऐआ १।१।९.

अतिमर्शो विहरणं, अतिलङ्घ्य मृश्यमानत्वात् अतिमर्शः। वालखिल्येषु प्रथमसूक्तस्य प्रथमाया ऋचः प्रथमपादस्य द्वितीयसूक्तगताद्वितीयस्या ऋचः द्वितीयेन पादेन संयोजनम्। एवं २।२।१ + १।१।२, १।१।३ + २।२।४, २।२।३ + १।१।४ इति। एवमेवोत्तरत्र। ३०।२।६ सायणः।

अतिमर्शप्रशंसा वालखिल्यासु। ३०।२। ७–८.

अतिरात्रः गवामयने प्रथममहः। १७।६।१ सायणः। अन्तिमं च। १७।८।३–८.

अतिरात्रः। १६।५–६। तत्र आश्विनं शस्त्रं। १७।१–५। रात्रिपर्याये प्रथमं होतुः शस्त्रं पान्त मा वो अन्धसः। १६।६।१–२, पर्यायत्रये होतुः शस्त्रयाज्या। प्रथमे अध्वर्यवो भरतेन्द्राय सोमं, द्वितीये अपाय्यस्यान्धसो। तृतीये तिष्ठा हरी। १६।६।३। प्रथमपर्याये शस्त्रे प्रथमपादाः द्विरभ्यसनीयाः स्तोत्रे इव। ४, मध्यमे पर्याये मध्यमाः पादाः स्तोत्रे शस्त्रे च द्विरभ्यसनीयाः। ५, तृतीये पर्याये उत्तमाः पादाः स्तोत्रे शस्त्रे च द्विरभ्यसनीयाः। ६–७। इन्द्राय मद्वने सुतं, इदं वसो सुतमन्धः, इदं ह्यन्वोजसा सुतं इति ऋग्भिः स्तुवन्ति च शंसन्ति च। ८–९। द्वादश रात्रिपर्यायाः सर्वे पञ्चदशाः। गणचतुष्टयेन एकैकः पर्यायः। पर्यायाः साक्षात् त्रय एव गणास्तु द्वादश भवन्ति। तत्र होतृचमसमुख्यः प्रथमो गणः, मैत्रावरुणचमसमुख्यः द्वितीयो गणः, ब्राह्मणाच्छंसिचमसमुख्यः तृतीयो गणः, अच्छावाकचमसमुख्यः चतुर्थो गणः। तत्र प्रथमौ द्वौ पर्यायौ अध्वर्युश्चरति, अन्तिमौ द्वौ प्रतिप्रस्थाता। षोडशिस्तोत्रे एकविंशं साम, अन्ते संधिस्तोत्रं त्रिवृत्स्तोमकम्। एवं च अतिरात्रे एकोनत्रिंशत् स्तोत्राणि भवन्ति। १४।३।२ सायणः। ब्रह्मा 'भूर्भुवः स्वरिन्द्रवन्तः स्तुध्वं' इति स्तोत्रप्रसवमाह। २५।१।५–६। होता उत्तमे शस्त्रे परिधानीयाया उत्तमे वचने चतुरक्षरं द्विरुक्त्वा प्रणुयात् धेहि चित्रं धेहि चित्रोऽऽऽम् इति। २८।७।१३.

अतिरात्रे एकाहे तृतीयसवने होत्रकाणां शस्त्राणि सन्ति अग्निष्टोमे तु न सन्ति। ३०।५।१.

अतिवादः। ब्राह्मणाच्छंसिशस्त्रे षष्ठेऽहनि वीमे देवा अक्रंसत इति अनुष्टुप् अर्धर्चशः। शाखान्तरीया इयम्। ३०।७।२०.

अतिशंसनं स्तोमविवृद्धौ प्रातःसवने माध्यंदिने सवने च एकया द्वाभ्यां वा ऋग्भ्यां अतिशंसेत्, अपरिमिताभिस्तृतीयसवने। २९।७।१०–११। तत्र प्रातःसवने एकया द्वाभ्यां वा इति नियमः, माध्यंदिने एकया द्वाभ्यां अपरिमिताभिर्वा इति विकल्पः, तृतीयसवने तु अपरिमिताभिरेव। २७।५।७–८.

अतिशसनार्थं स्तोमविवृद्धौ, चतुर्विंशादिस्तोमैर्युक्तेषु अहःसु स्तोमसंख्यामतिक्रम्य ऋचां शंसनं अतिशंसनं नाम। तस्मिन् कर्तव्ये मैत्रावरुणः को अद्य नर्यो इति सूक्तमावपेत्। ब्राह्मणाच्छंसी वनेन वायो इति सूक्तं, अच्छावाकः आयाह्यर्वाङुप वन्धुरेष्ठाः इति। २९।३।१०–२०.

अत्यये (अतिक्रमे) अमावास्यायाः पौर्णमास्या वा प्रायश्चित्तं–अग्नये पथिकृते अष्टाकपालं पुरोडाशं निर्वपेत्। वेत्था हि वेधो अध्वनः० आदेवानामपि पन्था० इति याज्यानुवाक्ये। आहुतिं वा आहवनीये जुहुयात् अग्नये पथिकृते स्वाहा इति। ३२।७।३.

अत्रिः पञ्चममण्डलस्य ऋषिः प्राणत्वेनोपास्यः। ऐआ २।१।१–६, २।१०।१–५.

अद्रयः = ग्रावाणः सोमाभिषवार्थाः। ३५।६।४.

अधिकारी द्वादशाहस्य। भूयसीः दक्षिणाः ददत् अपापश्च ईदृशो यजमानः। 'ददत् याज्यः'। दक्षिणां प्रतिग्रहीत्रा ऋत्विजा याज्यम्। उभये राध्नुवन्ति.

विद्वांसो यजन्ते च याजयन्ति च । द्वादशाहे हि याजने प्रतिषेधो भवति, तत एवमुक्तम् । १९।३।१-२.

अधिश्रिते अग्निहोत्रे सानाय्ये हवि.षु वा आहिताग्नेर्मरणे यजमानदहनदेशे एतानि उक्तानि हवींषि यजमानं परितः क्षिपेत् यथा सर्वाणि सदहेरन् । ३२।१।२.

अधिषवणं चर्म = यस्मिन् सोमः अभिषूयते । ३५।६।४.

अधिषवणफलके = द्वे उपरवेषु काष्ठफलके स्थाप्येते, तदुपरि चर्म, तदुपरि दृषद् (पाटा), तस्या सोमः अभिषूयते ग्रावाभिः (वरवंड्यानीं) । ३५।६।४.

अध्ययनविधिः बोधपर्यवसायी । पाठमात्रपर्यवसायी वा शाङ्करदर्शनानुसारात् । ऐ.ब्रा उपक्रमे सायण.।

अध्रिगुः । होतुः । प्रैषः अध्वर्योः मैत्रावरुण प्रति 'उपप्रेष्य होतर्हव्या देवेभ्यः' इति ।६।५।६। मैत्रावरुणस्य होतारं प्रति उपप्रैषः 'अजैदग्निरसनद्वाजं०' इति । ७-९ । अध्रिगुः दैव्याः शमितार आरभध्वमुत मनुष्या उपनयत मेध्या दुर आशासना मेधपतिभ्या मेध इत्यादिः । ६।६।१-१६, ६।७।१-११ । यदि एकदेवत्यः पशुः स्यात् ' मेधपतये मेध ' इति ब्रूयात्, यदि द्विदेवत्यः ' मेधपतिभ्या मेध ' इति ब्रूयात्, यदि बहुदेवत्य. ' मेधपतिभ्यो मेध ' इति ब्रूयात् ।६। ।६. ' अस्ना रक्षः संसृजतात् ' इत्यत्र रक्ष.पदं उपांशु वक्तव्यम् । ६।७।५.

अध्रिगो शमीध्वं सुशमि शमीध्वमध्रिगा ऽऽऽउ ' इति त्रिर्ब्रूयात् ' अपाप ' इति च । ६ । ७ । ११ । अध्रिगुपाठानन्तर जपः ' शमितारो यदत्र सुकृत कृणवथास्मासु तत् यद्दुष्कृतमन्यत्र तत् ' इति । ६ । ७ । १२-१३.

अध्रिगौ ' अस्ना रक्षः संसृजतात् ' इत्यत्र रक्ष.पदं नैवोचार्यं इति केचित् । उपांशु उचार्यमिति सिद्धान्त.। ६।७।१-९.

अध्वर्यवः महाव्रते निष्केवल्योपक्रमात् प्राक् अपाघाटलिकातुम्बुरवीणादीनां शब्दान् कारयन्ति । ऐ.ब्रा ५।५।११.

अध्वर्युः ऐन्द्राग्न ग्रहं इन्द्राग्नी आगत सुत इति मन्त्रेण गृह्णाति । तत होतुः आज्यं शस्त्रम् ।१०।५।१७.

अध्वर्युः मैत्रावरुणेण ऋतुयाज्यार्थं प्रेषितः ' होतरेतद्यज ' इति स्वयाज्या होत्रे प्रयच्छति (प्रायः) अग्निष्टोमे । षडहे षष्ठेऽहनि तु स्वयमेव पठेत् । २२ । ४ । २ सायणः ।

अध्वर्युः वपा स्रुवेणाभिघारयन्नाह स्तोकेभ्योऽनुब्रूहि इति प्रैषम् । ७ । २ । १-२.

अध्वर्युः हिरण्यकशिपौ आसीनः प्रतिगृणाति राजसूये शौनःशेपाख्याने । शतं गवा प्रतिगरित्रे दद्यात् एतच्चैवासनम् । ओम् इति ऋचः प्रतिगरः । तथा इति गाथाया. । ३३ । ६ । १२-१३, १५.

अध्वर्यु. होतार.प्रति उत्तरमाह ' उतेमनन्नमुः ' इति एकधनासु वसतीवरीषु च होतृचमसे समवनीतासु । अग्निष्टोमे । ८ । २ । १२--१३.

अध्वर्युभिः प्रेङ्खः उपकल्पनीयः महाव्रते । ऐ.ब्रा ५ । ४ । १ सायणः.

अध्वर्योः आज्यशस्त्रकालीने आहावे अतुष्पदत्व, पराञ्चं चतुष्पद्यार्धान अभ्याह्वयते होता ।१०।५।४। आहावोत्तरमध्वर्यु. सम्यक् द्विपाद् भवति । ५.

अध्वर्योः दक्षिणं पार्श्वं पशुभागः । ३१ । १ । २.

अध्वर्योः मैत्रावरुणं प्रति आध्रिगौ प्रैषः ' उपप्रेष्य होतर्हव्या देवेभ्यः इति । ६ । ५ । ६.

अध्वर्योः होतृशस्त्रजपोत्तर प्रातःसवने 'ओमुक्थशाः' इति चतुरक्षरो जपः । एव माध्यंदिने सवने । तृतीयसवने तु ॐ इत्येकाक्षर एव जपः । १२ । १ । २-४.

अनुचरः तृचः अच्छावाका.ये ऐन्द्राग्नशस्त्रे अग्निष्टोमे प्रात सवने इन्द्राग्नी अप० । प्रयोगः । निष्केवल्यशस्त्रे होतुः पृष्ठे चतुर्थेऽहनि पृष्ठ्ये षडहे श्रुधी हवं विपिपाना० । २१ । ४ । १९ । तत्रैव षष्ठेऽहनि रेवाँ इद्रेवत स्तोता० । २२।७। १४ । ब्राह्मणाच्छंसिशस्त्रे अग्निष्टोमे प्रात.सवने आ नो याहि० । प्रयोग । मरुत्वतीये शस्त्रे पृष्ठ्ये षडहे प्रथमेऽहनि इदं वसो सुत० ।२०।१।९। तत्रैव द्वितीयेऽहनि इन्द्र इत् सोमपा० । २० । ३ । ६ । तत्रैव तृतीयेऽहनि प्रव इन्द्राय सोमाः । २१ । १ । १३ । तत्रैव चतुर्थेऽहनि इद वसो सुतमन्ध । २१ । ४ । १२॥

तत्रैव पञ्चमेऽहनि इन्द्र इत् सोमपाः । २२ । १ । ९ । तत्रैव षष्ठेऽहनि त्रय इन्द्रस्य सोमाः । २२ । ७ । ७ । मरुत्वतीये शस्त्रे एव छन्दोमप्रथमेऽहनि 'इद वसो सुतमन्धः' । २३।१।१२। तत्रैव छन्दोमे द्वितीये इन्द्र इत् सोमपाः । २३ । ३ । १० । तत्रैव छन्दोमे तृतीये त्रय इन्द्रस्य सोमाः । २४।११।१ । अग्निष्टोमे प्रातःसवने मैत्रावरुणाज्ये आ नो गन्त रिशादसा । प्रयोग । तत्रैव माध्यंदिने मैत्रावरुणपृष्ठे कया त्व न ऊत्या । प्रयोग । तत्रैव तृतीयसवने वैश्वदेवशस्त्रे अद्या नो देव सवितः । प्रयोग । पृष्ठ्ये षडहे वैश्वदेवशस्त्रे प्रथमेऽहनि अद्या नो देव सवितः। २०।२ । १, द्वितीयेऽहनि आ विश्वदेव ।२०।३। २ । तृतीयेऽहनि अद्या नो देव सवितः ।२१।२।६। चतुर्थेऽहनि आ-विश्वदेवं ।२१।५।६। पञ्चमेऽहनि अद्या नो देव सवितः २२। २ । ६ । षष्ठेऽहनि 'दोषो आगात्' । २२ । ८ । ८ । वैश्वदेवशस्त्रे एव छन्दोमे प्रथमे अद्या नो देव सवितः । २१ । २ । ६ । १२ । छन्दोमे द्वितीये आ विश्वदेव सत्पतिं । २३ । ४ । ८ । छन्दोमे तृतीये अद्या नो देव सवितः । २४ । २ । ९.

अनुचरः नवर्चः पृष्ठ्ये षडहे पञ्चमेऽहनि निष्केवल्यशस्त्रे स्वादोरित्था (१-३) आ नो हरिभि. (१-३) इन्द्रं विश्वा अवीवृधन् (१-३) । २२।२।५.

अनुचरः प्रगाथः अग्निष्टोमे माध्यंदिने अच्छावाक पृष्ठे 'तरणिरित् सिषासति', ब्राह्मणाच्छंसिपृष्ठे 'तत्वा यामि सुवीर्यं', मरुत्वतीयशस्त्रे होतुः पृष्ठे 'इद वसो सुत'। अग्निष्टोमे तृतीयसवने आग्निमारुते शस्त्रे 'देवो वो द्रविणोदाः'। पृष्ठ्ये षडहे निष्केवल्यशस्त्रे प्रथमेऽहनि 'अभि त्वा पूर्व' । २२ । १ । १३ 'द्वितीयेऽहनि ' त्वं ह्येहि चेरवे'। २० । ३ । ११ । तृतीयेऽहनि यदिन्द्र यावतस्त्वं २१ । १ । १८ । निष्केवल्ये शस्त्रे छन्दोमे प्रथमे ' त्व ह्येहि चेरवे । २३ । १ । २० । २५ । छन्दोमे द्वितीये 'अभि त्वा पूर्व' ।२३ ।३।२१। छन्दोमे तृतीये त्व ह्येहि चेरवे । २४ । १ ।२१. .

अनुपानीयाः नाम ऐन्द्राग्नतत्रः ऋचः स्वादुष्किलायं मधुमाँ उतायम् । अत्र मद्वान् प्रतिगरः 'मदामोदैव' इति । आग्निमारुते शस्त्रे पिबाम्य उत्तरम् । १३।१४।१-२.

अनुबन्धचतुष्टयं= इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिक उपायो विषयः, तद्बोधः प्रयोजन, तद्बोधार्थी अधिकारी, उपकार्योपकारकभावः सम्बन्धः। ऐत्राउपक्रमे सायणः ।

अनुमति.=- या पूर्वा पौर्णमासी साऽनुमतिः । ३२।९।२.

अनुमन्त्रणं वषट्कारस्य । मतभेदेन मन्त्रचतुष्टयम् '.वाक् ' इत्येकः पक्षः । ' वषट्कार मा मा प्रमृक्षो माऽहं त्वा प्रमृक्षं बृहता मन उपह्वये व्यानेन शरीरं प्रतिष्ठासिप्रतिष्ठां गच्छ प्रतिष्ठा मा गमय' इति द्वितीयः पक्षः । ' ओजः सह ओजः ' इति तृतीयः पक्षः । ' वागोजः सह ओजो मयि प्राणापानौ ' इति चतुर्थः पक्षः सिद्धान्तः । ११।८।२-१०.

अनुयाजनिषेधः आतिथ्यायाम् । ३।६।१२-१५। उपसत्सु ४।९।१.

अनुयाजः प्रायणीयाया न सन्ति प्रयाजाश्च उदयनीयाया न सन्ति इति एकः पक्षः, उभय उभयत्र वर्तते एव इति पक्ष. सिद्धान्तः । २।५।१-४

अनुरूप. = अद्यतने यः श्वःस्तोत्रः तमद्य अनुरूप कुर्वन्ति । (उद्या स्तोत्राचा जो ऋगादिरूप पहिला अवयव असेल, तो आज स्तोत्राचा दुसरा अवयव करावयाचा, त्याला अनुरूप म्हणतात.) २७।२।१ ३,२९।१।१.

अनुरूप. प्रगाथः निष्केवल्ये स्तोत्रियात् उच्चैस्तरामिव शस्तव्यः । १२।१३।.-४.

अनुरूपः शस्त्रावयवो द्वितीयः । स च ऋग्द्वयात्मको वा तृचो वा सूक्तमेव वा स्यात् । स एव अनुचर इत्युच्यते । स्तोत्रियानुरूपौ एव प्रतिपदनुचरौ । औद्गात्रे स्तोत्रियानुरूपौ इत्युच्येते, हौत्रे पुनस्तावेव प्रतिपदनुचरौ उच्येते । १२।१२।७.

अनुवचनं प्रातरनुवाकस्य ऋकशः कर्तव्यं इत्येकः पक्षः, पच्छ. इति द्वितीयः, अर्धर्चशः इति तृतीयः सिद्धान्तः । ७।८।१ ४.

अनुवषट्कारः प्रउगे ' सोमस्याग्ने वीहि ' इति ।

११।५।२-६। प्रवर्ग्ये पूर्वाह्णे अपराह्णे च। ४।५।४-६। महाव्रते निष्केवल्यशस्त्रान्ते याज्यावषट्कारेणोपसंतनुयात् अनवानम्। ऐआ ५।१३।७.

अनुवषट्कारनिषेधः आदित्यग्रहे ।१३।५।३। ऋतुयाजेषु ।९।५।६-७। द्विदेवत्येषु ।९।४।२-३। पात्नीवतग्रहे ।२६।३।९। सावित्रग्रहे च ।१३।५।४.

अनुवषट्कारेण सोमस्य घर्मस्य वाजिनस्य च स्विष्टकृतः सिद्धिः। तेषु पृथक् स्विष्टकृन्नास्ति। ४।५।६.

अनुवादरूपाणां 'द्विः संवत्सरस्य पच्यते' इत्यादीनामर्थवादानां न स्वार्थे प्रामाण्यम्। ऐआ उपक्रमे सायणः।

अनुव्याहाराः नाम केचिन्महर्षयः। परकीयदोषोक्तिमनु स्वस्य व्याहाराः शापरूपं वचनं येषां प्राणोपासकाना ते महर्षयः। शापवचनं यथा–१ प्राण वशं समधा प्राणं मा वंशं सदधतं न शक्नोषि प्राणस्त्वा वशो हास्यति। २ प्राणं वंशं समाधित्सिपन्त नाशकः संधातुं प्राणस्त्वा वंशो हास्यति, इति। ऐआ ३।४

अनुष्टुप्प्रकारं शंसनं नाम पादद्वये अष्टाक्षरे अवसाय चतुर्थपादे प्रणवः। ऐआ ५।१२।२ सायणः।

अनुष्टुप् छन्दः चतुर्थेऽहनि पृष्ठ्ये षडहे। २१।४।१-२.

अनुष्टुप्सहस्रं निष्केवल्ये महाव्रते इत्येके। ऐआ २।१७।३.

अनुष्टुभं गायत्री अयजत। १९।६।६.

अनूचानः मूकवरितः, साक्षा इत्येके। ३१।१।२ सायणः।

अनूबन्ध्यापशुपुरोडाशं अनु निर्वाप्याणि देविकाहवींषि देवीना हवींषि च। १५।३-४.

अनूबन्ध्यायाः समिष्टयजुषामुपरिष्टात् 'पुनर्नो अग्निर्जातवेदा ददातु क्षत्रं पुनरिह पूर्तं दात् स्वाहा' इति मन्त्रेण होमः आहवनीये क्षत्रियस्य यजमानस्य। ३४।३।३.

अन्तरागमने अग्निषु प्रायश्चित्तं, अनो वा रथो वा श्वा वा यदि गच्छेत् नैतन्नमनि कुर्यात्। चेन्नमपि कुर्वीत, गार्हपत्यात् आ आहवनीयं अविच्छिन्नां उदकधारां 'तन्तुं तन्वन् रजसो' इति मन्त्रेण सिञ्चन् अध्वर्युः मध्येन गच्छेत्। तच्च प्रायश्चित्तार्थमेवेति न दोषः। ३२।११।३,७.

अन्तर्यामग्रहं अनुमन्त्रयेत होता उपांशु 'अपानं यच्छ स्वाहा त्वा सुहव सूर्याय' इति अग्निष्टोमे। तमभ्यपानेत् 'अपानापानं मे यच्छ' इति। वाग्विसर्गस्यैतायं प्रयोगः। ८।८।३.

अन्तर्यामग्रहहोमपर्यन्तं अपोनप्त्रीयोत्तरं होतुर्वाङ्नियमः। ८।३।१–२.

अन्धाहिः। तस्य सृष्टिः। १३।२।३.

अन्नं अशीतयः महाव्रते पक्षिरूपेण ध्यातस्य निष्केवल्यस्य। गायत्री तृचाशीतिः, बार्हती तृचाशीतिः औष्णिही च तृचाशीतिः या शस्यते, सा अन्नं इति ध्यानं कर्तव्यम्। ऐआ। १।१९।१–४.

अन्न- प्रभूतं दद्यात् यजमानः महाव्रते। ऐआ ५।५।१२.

अन्नाद्यकामस्य बैल्वो यूपः। ६।१।६--९.

अन्नाद्यकामस्य महाव्रते आज्यशस्त्रं 'अग्निं नरो दीधितिभिररण्योः' इति पञ्चविंशत्यृचम्। ऐआ १।२।१--१२.

अन्यैरग्निभिः स्वाग्नीनां संसर्गे प्रायश्चित्तं, अग्नये क्षामवते अष्टाकपालं निर्वपेत्। 'अक्रन्ददग्निः स्तनयन्निव द्यौः, अधा यथा नः पितरः परासः' इति याज्यानुवाक्ये। आहुतिं वा आहवनीये जुहुयात् अग्नये क्षामवते स्वाहेति। ३२।५।४.

अन्वाधानं दक्षिणाग्नेः कर्तव्यमेव।३२।११।४-६.

अन्वाधानकाले दक्षिणाग्नेराहरणं कर्तव्यमेव। ३२।११।४–६.

अपहारे सायंदुग्धस्य सांनाय्यस्य, प्रातर्दुग्धं द्वैधं कृत्वा अन्यतरात् आतञ्च्य उभाभ्यां यजेत। ३२।३।१। प्रातर्दुग्धस्य उभयस्यापि वा अपहारे तस्य स्थाने ऐन्द्रं माहेन्द्रं वा पुरोडाशं निर्वपेत्। ३२।३।२–३। अयागामेव हविषामपहारे तु सर्वत्र आज्यं परिकल्प्य तयैवाज्यहविषा इष्ट्या यजेत। ततः पुनः तादृग्या तयैवेष्ट्या यजेत। ३२।३।४.

अपांशान्तिः नाम मन्त्रः। तस्य पाठनं यथाद्ग

राजाभिषेके आसन्द्यामारोहणोत्तरं ' शिवेन मा चक्षुषा पश्यतापः०' इति।२७।२।९--११.

अपिशर्वराणि नाम अतिरात्रे रात्रिपर्यायेषु 'द्वादश स्तोत्राणि अपिशर्वराणि '। १६।६।११.

अपोनप्त्रीयं सूक्त-अग्निष्टोमे प्र देवत्रा ब्रह्मणे०इति। तत् संततमनुब्रूयात् । तस्य त्रिः प्रथमा संततम-वाह तेनैव तत्सर्वं संततमनूक्तं भवति। ८।१।१--८ । तत्र प्रथमाः नव ऋचः अनूच्य हिनोता नो अध्वरं इत्येकादशी दशमीत्वेन वक्तव्या । ८।२।१ -२। आवर्वृततीरधनु इति एकधनासु आवृत्तासु ।३। प्रति यदापो इति प्रतिदृश्यमानासु एकधनासु । ४ । आ धेनवः पयसा इति चात्वालसमीपमुपायतीषु । ५ । समन्या यन्त्युप इति समायतीषु (होतृचमसस्थवसतीवरीभिः सयोयाजितु समीप नीतासु) । ६–८ । आपो न देवीरुपयन्ति इति होतृचमसे वसतीवरीषु एकधनासु च समवनीयमानासु । ९ । अथ होता अध्वर्युं पृच्छति ' अवेरपोध्वर्यो३ऽऽऽउ ' इति । १०--११ । अध्वर्युः प्रत्याह ' उतेमनन्नमुः ' इति। १२--१३।होता प्रत्युत्तिष्ठति आह च ' तास्वध्वर्यो इन्द्राय तारियो३ऽऽऽम् (सौत्र) । १४ -१५ । अनु प्रपद्यते च अम्बयो यन्त्यध्वभिः इत्यनुब्रुवन् ।१६- २१। तेजस्कामो ब्रह्मवर्चसकामस्तु अमूर्या उपसूर्ये इत्यनुब्रूयात्। २२।अपो देवीरुपह्वये इति पशुकामः।२३।एताः सर्वा अनुब्रुवन् अनुप्रपद्येत । २४--२५ । इमा अग्मन्नाप उशती इति सायमानासु वसतीवरीषु एकधनासु च । २६ । आग्मन्नाप उशती इति सन्नासु परिधानीया । २७.

अप्तोर्यामः अत्यतिरात्रः । अप्तोर्यामो नाम ज्योतिष्टोमस्यवस्था शेष एव । तत्र अतिरात्रोत्तरं चत्वारि स्तोत्राणि अधिकानि इति तत्र त्रयस्त्रिंशत् स्तोत्राणि भवन्ति, तत्र अन्तिम स्तोत्र वैष्णवम् । १४।३।२ सायणः. ।

अप्रतिरथं नाम सूक्तं आशुः शिशानो इति। ३७।६।४.

अभिचारः वषट्कारेण । यं द्विष्यात् तं ध्यायेत् वषट्करिष्यन् (वषट्कारात् प्राक् होता) ११।६।१. अभिचारप्रयोग. निष्केवल्य याज्याया, अविराजा (विराड्भिन्नछन्दस्कया ऋचा) अस्य याजयेत् गायत्र्या वा त्रिष्टुभा वा अन्येन वा छन्दसा ।१२।११।१०.

अभिचारप्रयोगः प्रउगशस्त्रयाज्यान्तवषट्कारेण, यं द्विष्यात् त ध्यायेद् वषट्करिष्यन् । ११।६।१.

अभिचारप्रयोगाः मरुत्वतीयशस्त्रे । यः कामयेत क्षत्रेण विशं हन्यामिति निस्तर्हि निविदा सूक्त विशसेत् (सूक्तस्य आदौ मध्ये अन्ते च निविद दध्यात्) । यः कामयेत विशा क्षत्रं हन्यामिति निस्तर्हि सूक्तेन निविद विशसेत् (निवित्पदाना आदौ मध्ये अन्ते च सूक्त शसेत्) । य उ कामयेत उभयत एन विश (पित्रादिभ्यः पुत्रादिभ्यश्च, मातृपक्षे पितृपक्षे वा) पर्यवच्छिनदानि इति, उभयत. (निविदामादावन्ते च) तर्हि व्याहयीत (आह्राव पठेत्) १२।८।८ -१०.

अभिचारे निवित्सूक्तयोः शसने विशेषः । य कामयेत क्षत्रेणैन व्यर्धयानि इति, मध्ये निविदः सूक्तं शसेत् । य कामयेत विशा एन व्यर्धयानीति मध्ये सूक्तस्य निविदं शसेत् । १०।१।२–३.

अभिजित् सर्वस्तोमः गवामयने विषुवतः प्राग्वने दशाहे व्युत्क्रमेण चतुर्थमहः । १८।५।२.

अभिजिति माध्यदिने अहीनसूक्तानि शंसेत् । मैत्रावरुण आ सत्यो यातु मघवाँऋजीषी इति । ब्राह्मणाच्छसी अस्माइदु प्र तवसे इति। अच्छावाक शास्द् वह्निर्जनयन्त वह्नि इति । २९।२।८.

अभिप्लवः षडहः गवामयने आदित्यानामयने च । १८।१.

अभिप्लवषडहे द्वौ त्र्यहौ । प्रथमे ज्योतिः गौः आयुः (ज्योतिष्टोम. गोष्टोमः आयुष्टोमः) । द्वितीये गौ आयुः ज्योति इति व्युत्क्रमः । अत्र षडहे प्रथम षष्ठ चाहः अग्निष्टोमौ ज्योतिष्टोमौ, मध्ये चत्वार उक्थ्याः । तथा च आयन्तौ ज्योतिष्टोमौ, मध्ये गोष्टोमौ उक्थ्यौ आयुष्टोमौ उक्थ्यौ इति चत्वारः । १८।१।१–५.

अभिमन्त्रण अभिषेकोत्तर राज्ञः ऐन्द्रामहाभिषेके प्राच्या त्वा दिग्भि०इमा आपः शिवतमा इत्येतेन च तृचेन देवस्य त्वेति च यजुषा भूर्भुवः स्वरिति च व्याहृतिभि·

इत्येकः पर्यायः । दक्षिणस्या त्वा इत्यादिर्द्वितीयः । प्रतीच्यां त्वा इत्यादिस्तृतीयः । उदीच्या त्वा इत्यादिश्चतुर्थः । ऊर्ध्वाया त्वा इत्यादिः पञ्चमः । अस्या त्वा ध्रुवाया इत्यादिः षष्ठः । इति षड्भिः पर्यायैः । ३९।५।१२.

अभिमन्त्रण आसन्द्याः ऐन्द्रमहाभिषेके । बृहच्च ते रथंतरं च पूर्वौ पादौ इत्यादि । ३९।३।१–२.

अभिमन्त्रणं आसन्द्याः यज्ञाङ्गराजाभिषेके । तां पश्चादुपविश्य आच्य जानु दक्षिण, उभाभ्यां पाणिभ्यामालभ्य अभिमन्त्रयते यजमानः अग्निष्ट्वा गायत्र्या इत्यादि ।३७।२।२३.

अभिमन्त्रणं राज्ञः सुरापानोत्तर ऐन्द्रामहाभिषेके । अपाम सोमं० शं नो भव० इति । ३९।६।६.

अभिमर्शः पुरोहितेन राजदत्तस्य वित्तस्य कर्तव्यः, या ओषधीः सोम राज्ञीर्बह्वीः शत० इति । ४०।४.

अभिवान्यवत्सा गौः नाम अभिवाः अभिवान्यः अन्यः वत्सः यस्याः सा गौः । स्ववत्सो मृतः, अन्यवत्सेन च स्नवति या, सा गौः ।३२।१।४ सायणः ।

अभिषिक्तः क्षत्रियः जयार्थिन शरणागतं राजानं, तस्य रथोपरथं वनस्पते वीड्वङ्गो हि इति ऋचा अभिमृश्य ब्रूयात् आतिष्ठस्वैता ते दिशमभिमुख.० इतिमन्त्रम् । ततः अभीवर्तेन हविषा इति सूक्तेन एनं दिक्षु आवर्तयेत् । ततः आशुः शिशानः इत्यप्रतिरथेन सूक्तेन, शास इत्था इति शासमूक्तेन, प्रधारयन्तु मधुनः इति सौपर्णसूक्तेन च एनमन्वीक्षेत । जयति ह ता सेनाम् । ३७।६।२–२.

अभिषिक्तः क्षत्रियः पुनः राष्ट्रप्राप्त्यर्थिनं पुरुषं शरणागतं अपराजिताया दिशि प्रवर्तयेत्, राष्ट्रमगच्छति। ३७।६।७.

अभिषिक्तः क्षत्रियः द्वंद्वयुद्धे जयार्थिनं पुरुष शरणागतं अपराजिताया दिशि प्रवर्तयेद्, जयति ह त संग्रामम् । ३७।६।६.

अभिषेकः । अभिमन्त्रणोत्तर ऐन्द्रमहाभिषेके राज्ञः आसन्द्यामासीनस्य, औदुम्बर्या आर्द्रया शाखया सरूपाया जातरूपमयेन च पवित्रेन अन्तर्धाय इमा आपः शिवतमा इति तृचेन, देवस्य त्वेति च यजुषा, भूर्भुवः स्वरित्येताभिश्च व्याहृतिभिः । ३९ । ४ । २.

अभिषेकः उदवसानीयोत्तर क्षत्रियस्य । यज्ञाङ्गोऽयम् ।.३७ । १–७ । तत्र संभाराः । ३७ । १ । ३ । आसन्द्याः प्रतिष्ठापनम् । ४ । आसन्द्या उपरि व्याघ्रचर्म। ३७।२।१। आसन्द्या अभिमन्त्रणम् । २–३ । आसन्द्यारोहणम्।४–८। अपाशान्तिवाचनम्।९–११। उदुम्बरशाखामन्तर्धायाभिषिञ्चति, अभिषेके मन्त्राः इमाः आपः शिवतमा इमाः० याभिरिन्द्रमभ्यषिञ्चत् प्रजापतिः० महान्त त्वा महीनां (इति तिस्रः ऋचः सौत्राः) देवस्य त्वा सवितुः प्रसवे—यशसेऽन्नाद्याय इति यजुः सौत्र, भूर्भुवःस्वः इति व्याहृतयः इति । ३७ । ३ । १–९ । होमः, ब्रह्म प्रपद्ये स्वाहा क्षत्रं प्रपद्ये स्वाहा इति आहुतिद्वयम् । १० । संभारप्रशंसा । ३७ । ४ । १-७ । सुराकंसं राजहस्ते आदधाति स्वादिष्ठया मदिष्ठया इति। ८–९ । शान्तिवाचन नाना हि वा देवहित इति । १०–१२ । सुराशेषदान पानोत्तर मित्राय । १३–१४। अवरोहः आसन्द्याः सकाशात् । ३७ । ५ । १–४ । अवरोहणप्रकारः । २ । अवरोहोत्तरं उपस्थं कृत्वा आसनं ५ । ब्रह्मणे त्रिर्नमस्कारः । ५–६ । वरदानं । ५, ७ । वाग्विसर्गः । ५, ७ । समिदाधानं । ८–१० । उत्क्रमण त्रीणि पदानि । ११–१२ । दिगुपस्थानं । १३ । सभूषा व्यवनुसिवचनम् । ३७।६।८ । गृहे आगमनम् । ८ । आज्याहुतीः कंसेन चतुर्गृहीताः प्रपद जुहोति । ९ । ३७ । ७ । १–४ । आशीर्मन्त्रपाठः । ५–६ । अत्र विशेषः तत्तच्छब्दे द्र० ।

अभिषेकप्रयोगः यज्ञाङ्गराजाभिषेकस्य । पुरस्तादेव संभारा उपक्लृप्ता भवन्ति । औदुम्बरी आसन्दी प्रादेशमात्रपादा अरत्निमात्रशीर्षण्यानूच्या मौञ्जविवाना व्याघ्रचर्मास्तरणा, औदुम्बरश्चमसः, उदुम्बरशाखा अभीयर्गी अभिषेकार्थं, तस्मिश्चमसे दधि मधु सर्पिः आतपवर्ष्या आपः शष्पाणि तोक्मानि सुरा दूर्वा इत्यष्टौ क्षिप्तानि भवन्ति । महावेदेः दक्षिणाया स्पयवर्तन्या तामासन्दीं प्रतिष्ठापयति, तस्या अन्तर्वेदि द्वौ पादौ, बहिर्वेदि द्वौ । अथ यजमानः पश्चादासन्दीमुपविश्य दक्षिणं जानु आच्य तामुभाभ्यां पाणिभ्यामालभ्य अभिमन्त्रयते

ब्राह्मणोक्तेन मन्त्रेण । अभिमन्त्र्य तामारोहति अग्रे दक्षिणेन जानुना, अथ सव्येन तेनैव मन्त्रेण । अथ पुरोहितः अपांशान्तिं वाचयति शिवेन मा चक्षुषा इति । अथोदुम्बरशाखामन्तर्धाय यजमानमभिषिञ्चति इमा-आपः शिवतमा० याभिरिन्द्रमभ्यषिञ्चत् प्रजापतिः० महान्तं त्वा महीनां० इति ,तिसृभिर्ऋग्भिः, देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामि बलाय श्रियै यशसेऽन्नाद्याय इति यजुषा भूर्भुवःस्वः इति च व्याहृतिभिः । व्याहृतिवर्जमेके अशार्वभौमस्य । अथ जुहोति ब्रह्म प्रपद्ये स्वाहा, क्षत्रं प्रपद्ये स्वाहा इति । अथ सुराकंसं यजमानहस्ते आदधाति स्वादिष्ठया मदिष्ठया इति ऋचा । आधाय शान्तिं वाचयति नाना हि वा देवहितं० सदस्कृतं० इति । यजमानः सुरां भूयः पीत्वा शेषं मित्राय प्रयच्छति । उदुम्बरशाखा परिकर्मी भूमौ प्रतिष्ठापयति । शाखायां पादौ प्रतिष्ठाप्य प्रतितिष्ठामि द्यावापृथिव्योः० इति प्रत्यवरोहं यजमानो जपति । अथ प्रत्यवरोहेण प्रत्यवरुह्य उपस्थं कृत्वा प्राङासीनो 'नमो ब्रह्मणे नमो ब्रह्मणे नमो ब्रह्मणे' इति त्रिर्नमस्कृत्य 'वरं ददामि जित्या अभिजित्यै विजित्यै संजित्यै' इति वाचं विसृजते । उपोत्थाय आहवनीये समिधमभ्यादधाति समिदसि समेद्ध्येन्द्रियेण वीर्येण स्वाहा इति । आधाय समिधं प्राङ् उदङ् प्राङुदङ् वा त्रीणि पदानि अभ्युत्क्रामति (उक्थ्या मार्गे पुर्दे पुर्दे) क्लृप्तिरसि दिशां० इति प्रतिकर्म । तेनैव मन्त्रेण अपराजिता (ऐशानीं) दिशमुपतिष्ठते । उपस्थाय 'अप प्राच विश्वाँ अमित्रान्० इति अमित्राणां व्यपनुत्तिं ब्रुवन् गृहमभ्येति । एत्य गृहान् पश्चात् गृहस्याग्ने रुपविश्य अन्वारब्धाय पुरोहितः कंसेन चतुर्गृहीतास्तिस्र आज्याहुतीः ऐन्द्रीः प्रपदं नाम जुहोति–पर्यूषु प्रधन्व वाजसातये परिवृत्रा भूर्न्सह प्राणममृतं प्रपद्यतेऽयमसौ शर्म वर्माभयं स्वस्तये । सह प्रजया पशुभिर्गि सखणिर्द्विषस्तरध्या ऋणयान ईयसे स्वाहा ॥ अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये वाजाँ अभि पवमान प्रगाहसे स्वाहा ॥ अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः गोजीरया रंहमाणः पुरं ध्या स्वाहा ॥ इति । अथान्ततः प्रजातिमाशास्ते इह गावः प्रजायध्वं० इति । ३७।१–७.

मदामसि महे समभुवो ब्रह्म प्राणममृतं प्रपद्यतेऽयमसौ शर्म वर्माभयं स्वस्तये । सह प्रजया सह पशुभिर्य

राज्ये वाजाँ अभि पवमान प्रगाहसे स्वाहा ॥ अजीजनो हि पवमान सूर्यं विधारे श स्वत्रेण प्राणममृतं प्रपद्यतेऽयमसौ शर्म वर्माभयं स्वस्तये । सह प्रजया सह पशुभिः शक्मना पयो गोजीरया रंहमाणः पुरं ध्या स्वाहा ॥ इति । अथान्ततः प्रजातिमाशास्ते इह गावः प्रजायध्वं० इति । ३७।१–७.

अभिषेकान्तक्षत्रिययागोदाहरणं जनमेजयः पारिक्षितः। ३७।७।९.

अभिष्टवः : प्रवर्ग्ये । पूर्वे पटलम् । तं संभृत्य (प्रवर्ग्यकर्मोपयुक्तसाधनसंभारं संपाद्य) अध्वर्युप्रतिप्रस्थातारौ आहतुः 'महान् प्रवर्ग्येण प्रचरिष्यामो होतर्घर्ममभिष्टुहि' इति । ४।१।३ । अथ होता ब्रह्मजज्ञानं प्रथमं। ४।२।१। इय पित्र्ये ।२। महान् मही अस्तभाय इति ब्राह्मणस्पत्यां । ३ । अभि त्यं देवं सवितारं इति सावित्रीं । ४ । (एताश्चतस्रः शाखान्तरस्था आश्वलायनेन पठिताः।४।६।३,) संसीदस्व महाँ असि इति महावीरस्य खरे स्थापनार्था । ५ । अञ्जन्ति यं इति महावीराय अज्यमानायाभिरूपां ।६। पतङ्गमक्त० यो नः सनुत्यो० भवानो अग्ने० इति द्वे द्वे । ७ । कृणुष्व पाजः इति पञ्च राक्षोघ्नीः ।८। परि त्वा गिर्वणो गिर० अधिद्वयोरदधा० शुक्रं ते अन्यद्० अपश्यं गोपा० ।९। ता एकविंशतिर्भवन्ति । स्रक्के द्रप्सस्य इति नव पावमान्यः।४।३।१।अयं-वेनः० पवित्रं ते० तपोष्पवित्रं० वियत्पवित्रं० । २–४ । गणानां त्वा इति ब्राह्मणस्पत्यं एकोनविंशत्यृचं ।४।४।१। प्रथश्च० तृतं घर्मतन्वः नाम, अपश्यं त्वा तृचं ।२–४। काराधत् काक्षीवतं आश्विनं नवर्चं ।५–७। आभात्यग्निः त्रैष्टुभं पञ्चर्चं ।८–१०। ग्रावाणेव त्रैष्टुभं अष्टर्चं ।११-१२। ईळे द्यावा जागतं पञ्चविंशत्यृच ।१३–१६। अरूरुचत् उपोत्तमा अग्नेया (आवपनीया) ।१७। ईळेद्यावीया उत्तमा परिधानीया ।१८–२०। इति नु पूर्वे पटलम् । अथोत्तरं । उपह्वये० हिंकृण्वती० अभि त्वा देव० समीवत्सं न० सं वत्स इव० यस्ते स्तनः० गौरमीमे० नमसेदुप० संजानाना उपसीदन्० आ दशभिर्विवस्व० दुहन्ति सप्तैकां० समिद्धो अग्निरश्विना० (शाखान्तरस्था गौत्री) समिद्धो अग्निर्वृषणा (शाखान्तरस्था सौत्री) तदु प्रय-

मन्त्रे तन्त्रे वा कश्चित् किंचित् विरुद्धमाचरेत् तत् समीचीनमन्येन वाच्यं, अत्र तु नास्मिन् अहनि केनचित् कस्यचित् विवाच्यं (इत्यतः) अविवाक्यामित्येतदाचक्षते । संशये तु बहिर्वेदि स्वाध्यायप्रयोगः, अन्तर्वेदीत्येके । पत्नीसयाजोत्तर मानसग्रहाय प्रसर्पेयुः । सदसः प्रसृप्य तीर्थदेशे मार्जयित्वा पत्नीशाला प्रपद्य ' समन्वारभध्व ' इत्युक्त्वा जुहुयात् ' इहरमेह रमध्वं' इत्यादिना । ततः पत्नीशालातः प्रसृप्य तीर्थदेशे मार्जयित्वा आग्नीध्रं प्रपद्य समन्वारभध्वं इत्युक्त्वा जुहुयात् उपसृजन् धरुणं० इति । ततः आग्नीध्रात् प्रसृप्य सदः सप्रपद्य यथायथं अन्ये ऋत्विजः व्युत्सर्पन्ति, ससर्पन्ति उद्गातारः सार्पराज्ञा ऋक्षु (आयं गौः पृश्नि०) स्तुवते । मनसा प्रस्तौति, मनसोद्गायति, मनसा प्रतिहरति, वाचा शंसति (होता) । अथ चतुर्होतॄन् होता व्याचष्टे । तदेव स्तुतमनुशंसति । चतुर्होतृव्याख्यानपद्धतिरस्तु औदुम्बरीं सर्वे समन्वारभन्ते ' इषमूर्जमन्वारभे ' इति । वाचं यच्छति, न दिवा वाचं विसृजेरन् । किंतु अर्धास्तमिते आहवनीय परीत्य यदि होनमक्रमं० इति मन्त्रेण वाच विमृजेत् । ततः चतुर्होतृव्याख्यान, ' तेषा चित्तिः स्रुगासीऽऽऽत् । चित्तमाज्यमासीऽऽऽत् । इत्यादि दश पदानि । ततः अवग्रहशक्यो मन्त्रः ' ते वा एते ग्रहमगृह्णत । वाचस्पते विधे नामन्०' इत्यादिः । चतुर्होतृमन्त्रे अध्वर्यो. प्रतिगरः ' ओऽऽऽम् होतस्तथा होतः ' इति अवसितेऽनवसिते दशसु परेषु । अवग्रहम-त्रपठनोत्तरं प्रजापतेस्तनूः नाम मन्त्रान् अनुद्रवति ' अन्नादा चान्नपत्नी च ' इत्यादीन् । अथ ब्रह्मोद्यं वदन्ति ' अग्निर्गृहपतिरिति हैक आहु. सोऽस्य० ' इत्यादि । २४।४–६.

अविहूतं षोळशिनं (शस्त्र) समृद्धो यजमानः शंसयेत् । १६ । ४ । ५–६.

अविहृतं षोडशिशस्त्र स्तोत्र च नाम परस्परव्यतिषङ्गरहितः ऋचा यथाधीतपाठः । १६।२।४ सायणः ।

अवेक्षणं पादप्रक्षालनोदकस्य पुरोहितेन (प्रक्षालनात् प्राक्) क्रियते ' अस्मिन् राष्ट्रे श्रिय० ' इति । ४० । ४.

अवेक्षण पादप्रक्षालनोदकस्यावशिष्टस्य पुरोहितेन क्रियते 'आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे' इति । ४० । ४.

अवेष्टेः राजसूयोत्पन्नायाः अपि पृथक् प्रयोगो भवति त्रैवर्णिकाधिकारिकः। ऐआ ५ । १ । १ सायणः ।

अव्रत्याचरणे (दिवा स्वापादि) आहिताग्नेः उपवसथेऽहनि कृते प्रायश्चित्तं = अग्नये व्रतपतये अष्टाकपालं निर्वपेत् । त्वमग्ने व्रतपा असि, यद्वो वयं प्रमिनाम इति याज्यानुवाक्ये । आहुतिं वा आहवनीये जुहुयात् अग्नये व्रतपतये स्वाहा इति । ३२ । ७ ।२.

अशनापिपासयोः भागो दत्तः प्रत्येक इन्द्रियविषयभोगे । ऐआ २ । २२.

अश्रुकरणे आहिताग्निना उपवसथेऽहनि प्रायश्चित्तं= अग्नये व्रतभृते अष्टाकपाल निर्वपेत् । त्वमग्ने व्रतभृच्छुचिः० व्रतानि बिभ्रद् व्रतपा० इति याज्यानुवाक्ये । आहुतिं वा आहवनीये जुहुयात् अग्नये व्रतभृते स्वाहा इति । ३२।७।१.

अश्वः मेध्यः यज्ञार्ह. । ६।८।१.

अश्वत्थस्य सृष्टिः । ३५।६।२.

अश्वस्य सृष्टि. । ऐआ २।२२.

अश्वस्य स्तुति. । २१।१।७–११.

अश्वमेधकर्तारो राजान. तत्पुरोहिताश्च ' ऐन्द्रामिषेकफलोदाहरणानि ' इत्यत्र द्र० ।

अष्टाचत्वारिंशस्तोमस्य विष्टुतिः

१७।६।९ सायणः ।

अष्टाश्रि. यूपः । ६।१।३–४.

अस्तोमः [illegible]
कृन्तन छेद., तद्रहितम् [illegible] सायणः ।

अस्नातेन [illegible]
[illegible]
अग्ने० इति [illegible] । [illegible]
जुहुयात् अग्नये [illegible] स्वाहा इति । ३२[illegible]

अहर्तं वासः दीक्षितसंस्कारः। तच सकृद्धौतं नवं श्वेतं सदर्श वस्त्रम्। १।३।१५-१६.

अहरहः शस्येषु कद्रन्तः प्रगाथाः। यस्तमिन्द्र स्वावसुं, यन्नवयो अतसीना कद्रूत्ववस्याकृतं इति। ते च वैकृतारम्भहेतुत्वात् आरम्भणीयाः। २९।५।१-४.

अहरहःशस्येषु परिधानीयाः। मैत्रावरुणस्य नू ष्टुत०, ब्राह्मणाच्छंसिनः एवेदिन्द्र०, अच्छावाकस्य नूनं सा ते। २९।६।८-१०.

अहरहःशस्येषु सूक्तप्रतिपद. त्रिष्टुभः। मैत्रावरुणस्य अप प्राच इन्द्र, ब्राह्मणाच्छंसिनः ब्रह्मणा ते ब्रह्मयुजा, अच्छावाकस्य उरं नो लोकमनु इति। के चित् एताः प्रगाथानां पुरस्ताच्छंसन्ति तत् तथा न कुर्यात् किंतु सूक्तानां पुरस्तादेव शंसनीयाः। आसु न्याह्रावो नास्ति २९।५।५-१४, ६।१-७.

अहरहःशस्यानि अहीने माध्यंदिने। कद्वन्तः प्रगाथाः, प्रतिपदः अहीनसूक्तानि च। २९।१।२-४.

अहरहःशस्यानि सूक्तानि। २९। ४-७। मैत्रावरुणस्य सद्यो ह जातो वृषभः इति सूक्तात् पुरस्तात् वैश्वामित्र पञ्चर्चम्।२९।४।१-६। ब्राह्मणाच्छंसिनः उदु ब्रह्माण्यैरत इति वासिष्ठ षड्च सपातादुपरिष्टात्। ७-१२। अच्छावाकस्य अभितष्टेव दीधया इति वैश्वामित्र अनिरुक्तं दशर्चं संपातादुपरिष्टात्।१३-२२.

अहर्गणेषु शस्त्राणि आरम्भणीयाः। मैत्रावरुणस्य मैत्रावरुणशस्त्रे ऋजुनीती नो वरुणः। ब्राह्मणाच्छंसिनः ऐन्द्रे शस्त्रे इन्द्र वो विश्वतस्परि। अच्छावाकस्य ऐन्द्राग्ने शस्त्रे प सोम आ सुतेनरः। २७।३। १-६.

अहिर्बुध्नीया ऋक् उत नोऽहिर्बुध्न्यः। इयं आग्निमारुते शस्त्रे आपोहिष्ठीयोत्तरम्।१३।१२।९.

अहीनसूक्तानि। २९।२। ४-११। होत्रकाः प्रातःसवने षडहस्तोत्रीयान् शस्त्वा माध्यंदिने अहीनसूक्तानि शंसन्ति।४। मैत्रावरुणस्य आसत्यो यातु मघवाँ ऋजीषी, ब्राह्मणाच्छंसिनः अस्मा इदु प्रतवसे, अच्छावाकस्य शासद् वह्निर्दुहितुर्नप्त्यं। तानि पञ्चसु अहःसु भवन्ति (गवामयने) चतुर्विंशे, अभिजिति, विषुवति, विश्वजिति महाव्रते च।२९।२। ४-११.

अहीनस्य युक्तिर्वियुक्तिश्च (योगो विमोकश्च) ब्राह्मणाच्छंसिनः प्रातःसवने व्यन्तरिक्षमतिरत् इति पर्यासतृचस्य अन्तिमया इन्द्रेण रोचना दिवः इति परिधानीयया योगः, माध्यंदिने एवेदिन्द्रं इति परिधानीयया विमोकः। अच्छावाकस्य आहं सरस्वतीवतोः इति प्रातःसवने परिधानीयया योगः, माध्यंदिने नूनं सा ते इति परिधानीयया वि[मो]कः। मैत्रावरुणस्य प्रातःसवने ते स्याम देव वरुण इति परिधानीयया योगः, माध्यंदिने नू ष्टुत इति परिधानीयया विमोकः। २९।७। १-९.

अहीनाः परिधानीयया। मैत्रावरुणस्य प्रातःसवने ते स्याम देव वरुण, माध्यंदिने नू ष्टुत इन्द्र नू गृणानः, तृतीयसवने इयमिन्द्रंवरुणमष्टमे गीः। ब्राह्मणाच्छंसिनः प्रातःसवने इन्द्रेण रोचना दिवः, माध्यंदिने एवेदिन्द्रं वृषण, तृतीयसवने बृहस्पतिर्नः परिपातु। अच्छावाकस्य प्रातःसवने आहं सरस्वतीवतोः, माध्यंदिने नूनं सा ते प्रति, तृतीयसवने उभा जिग्यथुर्।२७।५।१-५ सायणः।

अहीने अग्निष्टोमे च परिधीयाः। मैत्रावरुणस्य प्रातःसवने ते स्याम देव वरुण, माध्यंदिने नू ष्टुत इन्द्र। ब्राह्मणाच्छंसिनः प्रातःसवने व्यन्तरिक्षमतिरत् इति, पर्यासे तृचे इन्द्रेण रोचना दिव इति, माध्यंदिने एवेदिन्द्रम्। अच्छावाकस्य प्रातःसवने आहं सरस्वतीवतोः, माध्यंदिने नून सा ते। २७।४-५.

अहीने माध्यंदिने अहरहःशस्यानि, कद्वन्तः प्रगाथाः, प्रतिपदः, अहीनसूक्तानि च। २९।१।३-४.

अहीनेषु, द्वादशाहस्य अहीनस्य धर्माणामतिदेशः. आख्यायिका अग्निष्टोमस्तुत्यर्था।१४।३।१, १४।४।१.

" अदिते. प्रायणीयोदयनीययोः। २।१।३-४.

" अनुष्टुप्प्रशंसार्था। १२।२।१-५, ३।१।५, ४।१-२.

" अपो न(?)स्त्रीयगतसमन्वायन्ति इत्यृक्प्रशंसार्था। ८।२।७-८.

" अभिमादनशस्त्रार्था। मृगः व्याधः रोहिणी। प्रजापतिर्वै स्वा दुहितरमभ्य-

ध्यायत् इत्यादि । १३।९।१-६, १०।१-३.
" आश्विनशस्त्रप्रतिपदर्था । १७।१-३.
" आश्विनशस्त्रे ककुसहस्रार्था । १७।१।१.
" इन्द्रस्य छन्दसा च प्राधान्यसिध्यर्था। १६।५।१-५.
" इन्द्रस्य मरुता मरस्वतीयशस्त्रयाज्या-याश्च प्रशसार्था । १२।९।१-३.
" उक्थ्ययागार्था । १०।५ ६
" उपसदर्था । ४।६।१ ६
" ऐशान्याः दिश' अपराजितत्वार्था । ३।३।५-६.
" कवषस्य ऐलूषस्य अपोनप्त्रीयसूक्त-प्रशसार्था । ८।१।१-४.
" क्षत्रियस्य सोमभक्षराहित्यार्था । ३५।१-५.
" तानूनप्त्रार्था । ४।७।४-८.
" तूष्णींशसार्था । ९।७।१-४.
" दीक्षणीयार्था। १५।१।१-८.
" देवनीथनामकमन्त्रप्रशसार्था । ३०।८।२-३, ९।१.
" द्वादशाहस्य व्यूढत्वार्था । १ ।५।१.
" द्विदेवत्यग्रहार्था । ९।१।१ ३
" नाभानेदिष्ठस्य । २०।९।१-७
" * निष्केवल्यशस्त्रयाज्याधाय्यार्था । १२।१०।१-४, ११।१-९
" प्रवर्ग्यार्था । ४।१-२.
" प्रातरनुवाकप्रथमऋगर्था । ७।६।१,४
" यूपस्य तथैव स्थापनार्था । ६।३।३.
" यूपार्था । ६।१।१, ३।३.
" वपाहोमप्रशसार्था । ७।३।६.
" सवनीयपुरोडाशगतपयस्याप्रशसार्था । ८।४।१०.
" सवनीयपुरोडाशविधानार्था। ८।५।१.

" स्तोत्रीयतृचार्था निष्केवल्यशस्त्रे । १२।१२।१-२.

'आगन्म वृत्रहन्तम' इति द्वितीय तृच प्रथम शसेत् 'विशो विशो वो आतिथिं' इत्याज्यशस्त्रे सति महाव्रते, पुष्टिकामस्य । ऐआ ११।१५-१४.

आगू नास्ति द्विदेवत्याना द्वितीययाज्यायाः ९।४।४-६.

आग्निमारुत शस्त्र अग्निष्टोमे तृतीयसवने होतु अन्तिममिद त्वरया शस्तव्यम् १३।९ १४ । प्रतिपत्– 'वैश्वानराय पृथु पाजसे' सूक्त, तत्र प्रथमा ऋक् अनवान, अत्र आदौ एव विचार्य निश्चेतव्य पश्चात् निर्णयम्। १३।११।१-४ । मारुतं शसति प्रत्वक्षसः सूक्त, प्रगाथद्वय यज्ञायज्ञावो० देवो वो द्रविणोदा० मध्ये योनिं चानुरूप च अस्य स्तोत्रियानुरूपौ वैश्वानरीय मारुतसूक्तोत्तर प्रगाथद्वयम्। १३।११।५ ८ । जातवेदस्य प्रतव्यसीं, आपोहिष्ठीय 'आपो हि ष्ठा' इत्यारभ्य शनैः शस्तव्य, अहिर्बुध्नीया 'उत नोऽहिर्बुध्न्य' । १३।१२।१ ५ । देवाना पत्नी 'देवाना पत्नीरुशती रवन्तु' ऋग्द्वयम्, । राका 'राकामह' ऋग्द्वयम् । राका पूर्वमेके तत्र । पावीरवी, पावीरवी कन्या । यामी 'इय यम प्रस्तर०मातली क०' । पित्र्या, 'उदीरतामवर' तिस्र । पित्र्यासु प्रत्यृचमाहाव । यामीं उत्तरामेके पित्र्याभ्य । १३।१३।१ १९ । अनुपानीया ऐन्द्रीश्चतस्र स्वादुष्किला०, अत्र मद्वान् प्रतिगरः मदामो दैव इति । वैष्णुवारुणी, ययोरोजसा स्कभिता । वैष्णवी, विष्णोर्नु क वीर्याणि, । प्राजापत्या, तन्तु तन्वन् रजसो । परिधानीया, एवा न इन्द्रा मघवा । भूमिमुपस्पृशन् परिदध्यात् । याज्या आग्निमारुती, अग्नेमरुद्भि' शुभ०। १३।१४।१ १४.

आग्निमारुत शस्त्र यज्ञायज्ञीय (प्रयोगपुस्तकस्थ) अग्निष्टोमे तृतीयसवने होतु' । सूक्त आग्नेयं निविद्धान वैश्वानराय पृथु १-१० ऋच , निविद । ८।१ १५, पूर्वोक्तसूक्तशेष एकादशी ऋक्, श नः करत्य वैत ऋक्, सूक्त मारुत निविद्धान प्रत्वक्षस. प्रतवसो १-९ ऋच., निविद । ९।१-१४, मारुतसूक्तशेष.

षष्ठी ऋक्, प्रतिपत् प्रगाथः स्तोत्रियः यज्ञायज्ञा वो, अनुचरः प्रगाथः देवो वो द्रविणोदा, सूक्त आग्नेय निर्विद्धान प्रतव्यसीं नव्यसीं १–७ ऋचः, निविद. १०.१-१६, आग्नेयसूक्तशेषः अष्टमी ऋक्, तृचः आपो हि ष्ठा, ऋक् उत नोऽहिर्बुध्न्यः, द्वृच. देवाना पत्नी रुशती, द्वृचः राकामहं सुहवा, ऋक् पावीरवी, ऋक् इय यम प्रस्तर, ऋक् मातली कव्यैर्यमो, ऋक् उदीरतामवर, ऋक् आह पितॄन्, ऋक् इद पितृभ्यो नमो, द्वृचः स्वादुष्किलाय, ऋक् ययोरोजसा स्कभिता, ऋक् विष्णोर्नुक, ऋक् तन्तु तन्वन् रजसो, ऋक् 'एवा न इन्दो मघवा' परिधानीया ।

आग्निमारुत शस्त्र छन्दोमप्रथमेऽहनि द्वादशाहे । प्रतिपत् तृचः गायत्रः वैश्वानरो अजीजनत्, सूक्त मारुत गायत्र प्रयद्वस्त्रिष्टुभमिष, ऋक् जातवेदस्या जातवेदसे सुनवाम, सूक्त जातवेदस्य गायत्र दूत वो विश्ववेदसम् । २३।२।१४–१६.

आग्निमारुत शस्त्र छन्दोमद्वितीयेऽहनि प्रतिपत् तृच गायत्रः ऋतावान वैश्वानर, सूक्त मारुत गायत्र क्रीळ व. शर्धो, ऋक् जातवेदस्या जातवेदसे सुनवाम, सूक्त जातवेदस्य अग्निं नरो दीधितिभि । २३।४।१५–१८.

आग्निमारुतं शस्त्र छन्दोमतृतीयेऽहनि प्रतिपत् तृचः वैश्वानरो न ऊतये, सूक्त मारुत गायत्र मरुतो यस्य हि क्षये, ऋक् जातवेदस्या जातवेदसे सुनवाम, सूक्त जातवेदस्य गायत्र प्राग्नये वाचमीरय । २४।२।१९–२१.

आग्निमारुत शस्त्र प्रथमेऽहनि पृष्ठ्ये षडहे । इदमेवाग्निष्टोमेऽपि,परतु अधिकमपि किंचित् । प्रतिपत् सूक्त वैश्वानराय पृथुपाजसे, सूक्तं मारुत प्रत्वक्षस. प्रतवसो, ऋक् जातवेदस्या जातवेदसे सुनवाम, सूक्त जातवेदस्य प्रतव्यसीं नव्यसीम् । २०।२।१०–१४.

आग्निमारुत शस्त्र द्वितीयेऽहनि पृष्ठ्ये षडहे प्रतिपत् तृचः पृक्षस्य वृष्णो, सूक्त मारुत वृष्णे शर्धाय सुमखाय, ऋक् जातवेदस्या जातवेदसे, सूक्त जातवेदस्य यज्ञेन वर्धत जात । २०।४।८–११.

आग्निमारुतं शस्त्र तृतीयेऽहनि पृष्ठ्ये षडहे प्रतिपत् सूक्त वैश्वनराय धिषणा, सूक्त मारुत धारावरा मरुतो, ऋक् जातवेदस्या जातवेदसे, सूक्तं जातवेदस्यं त्वमग्ने प्रथमो अङ्गिरा । २१।२।१४।१७.

आग्निमारुत शस्त्र चतुर्थेऽहनि पृष्ठ्ये षडहे प्रतिपत् सूक्त वैश्वानरस्य सुमतौ, सूक्त मारुत क ईं व्यक्ता नरः, ऋक् जातवेदस्या जातवेदसे, सूक्त जातवेदस्य अग्निं नरो दीधितिभिः । २१।५।१२-१७.

आग्निमारुतं शस्त्र पञ्चमेऽहनि पृष्ठ्ये षडहे प्रतिपत् तृचः हविष्पान्तमजर, सूक्तं मारुतं वपुर्नु तच्चिकितुषे, ऋक् जातवेदस्य जातवेदस्या, तृचः जातवेदस्यः अग्निर्होता गृह । २२।३।११-१४.

आग्निमारुत शस्त्र षष्ठेऽहनि पृष्ठ्ये षडहे प्रतिपत् सूक्त अहश्च कृष्णमह, सूक्त मारुत मध्वो वो नाम, ऋक् जातवेदस्य जातवेदसे, सूक्त जातवेदस्य स प्रत्नथा सहसा । २२।१०।५-१०

आग्निमारुत शस्त्र महाव्रते । प्रतिपत् सूक्त वैश्वानराय धिषणा । (१–१५ ऋच.), सूक्त मारुत प्रयज्यवो मरुतो भ्राज । (१–१० ऋच.), ऋक् जातवेदस्या जातवेदसे, सूक्त जातवेदस्य इमं स्तोममर्हते जात । (१–१६ ऋच) । ऐआ १।२२।११–१४.

आग्निमारुत शस्त्र महाव्रते । सामगैः यज्ञायज्ञीये सामनि प्रयुक्ते सति सूक्त वैश्वानराय धिषणा, ऋक् स नः करत्यर्वते, सूक्त प्रयज्यवो मरुतो । (१-१० ऋचः), प्रतिपत् प्रगाथः यज्ञायज्ञा वो, अनुचर. प्रगाथः देवो वो, ऋक् जातवेदस्या जातवेदसे, शस्त्रशेषः प्राकृतः आपो हि ष्ठा इत्यादिः । ऐआ ५।१३।१५.

आग्निमारुत शस्त्र महाव्रते सामगैः इलान्दे सामनि प्रयुक्ते सति, तत्रापि एकतृचगानपक्षे पूर्वोक्तप्रगाथद्वयस्थाने अग्ने तव श्रवो इति षट् ऋच. प्रतिपदनुचरौ कर्तव्यौ । तृचद्वयगानपक्षे तु अग्निं न स्ववृक्तिभिः इति षट् ऋच. अनुचर. कर्तव्यः । ऐआ ५।१३।१५.

आग्निमारुती ऋक् याज्या आग्निमारुतशस्त्रस्य अग्ने मरुद्भिः शुभयद्भि । १३।१४।१४.

आग्नीध्र पात्नीवतग्रहस्य याज्या उपांशु आह, वषट्कारो नास्ति, नेष्टुरुपस्थ आसीनो भक्षयति ।

२६।३।८-११.

आग्नीध्रस्थानं पृष्ठतः कृत्वा अग्नीषोमप्रणयनीयासु त्रयोदश्याः अन्तिमं पादं अन्वाह होता । ५।४।१५-१६.

आग्नीध्रस्य प्रातःसवने प्रस्थितयाज्या उक्षान्नाय वशान्नाय।२८।२।५। माध्यंदिने आपूर्णो अस्य कलशः। २८।३।३। तृतीयसवने इमं स्तोममर्हते। २८।४।१२। पात्नीवतग्रहे प्रस्थितयाज्या तृतीया ऐभिरग्ने सरथम् । २८।६।४.

आग्नीध्रस्य सव्य ऊरुः पशुभागः अजिनं च यः श्वः सुत्यामाह । ३१।१।२.

आग्नीध्रीयमण्डपे वासः ऋत्विजां सुतयायाः प्राचीनाया रात्रौ । १०।४।१.

- आग्नीध्रीयादेव धिष्ण्येषु अग्निविहरणम् । १०।४।१-२

आग्नीध्रीये होता, मरुत्वतीये शस्त्रे संस्थिते, तिष्ठ आज्याहुतीर्जुहोति महाव्रते । ऐआ. ५।१।१।१०-१३

, आग्नीध्रीये होमः पत्नीशालायाः संसृप्य तीर्थे मार्जयित्वा आग्नीध्रे संप्रपद्य होमः उपसृजं धरुणं इति। द्वादशाहस्य दशमेऽहनि मानसग्रहे । २४।३।१४-१६.

आग्नीध्रे अध्वर्युणा आहुत्या हूयमानाया अग्नीषोमप्रणयनीयासु दशमीमाह होता अग्निष्टोमे । ५।४।१२.

आग्रयणेन अनिष्ट्वा नवान्नप्राशने प्रायश्चित्तम् । अग्नये वैश्वानराय द्वादशकपालं निर्वपेत् । वैश्वानरो अजीजनत्, पृष्टो दिवि पृष्टो अग्निः इति याज्यानुवाक्ये । आहुतिं वा आहवनीये जुहुयात् अग्नये वैश्वानराय स्वाहा इति । ३२।८।१.

आचार्य' राजहस्ते सुराकंसमादधाति स्वादिष्ठया मदिष्ठया इति ऐन्द्रमहाभिषेके । ३९।६।३.

आचार्याय दक्षिणादानं ऐन्द्रमहाभिषेके, सहस्रं, हिरण्यं, क्षेत्रं, चतुष्पात्, अपरिमितम् । ३९।६।२

आजिह्वासेन्या. ब्राह्मणाच्छंसिशिल्पे षष्ठेऽहनि अर्धर्चशः शंसति । इहेत्थ प्रागपागुदक् इति चतस्रः ऋचः शास्त्रान्तरगता. यो पठिताः ।३०।७।१८.

, आज्यं हिरण्यस्य प्रतिनिधिः । ७।५।६.

आज्यभागौ अप्सुमन्तौ कारीर्यादिवर्षकामेष्टिषु । अप्स्वग्ने सधिष्टव, अप्सु मे सोमो अब्रवीत् । आश्व. २।१३।३-४ । अवभृथे च । ६।१३।४.

आज्यभागौ आग्नेयौ अन्वारम्भणीयाया समिधाऽग्निं दुवस्यत, एह्यूषु ब्रवाणि ते । वृद्धिमदिन्दुमतौ इत्याचक्षते । आश्व. २।८।७-८.

आज्यभागौ आतिथ्याया समिधाऽग्निं दुवस्यत, आप्यायस्व समेतु ते । आश्व. ३।६।१-४

आज्यभागौ जीवातुमन्तौ आयुष्कामेष्ट्यां आ नो अग्ने सुचेतुना, त्वं सोम महे भगम् । आश्व. २।१०।२-३। पित्र्याया च । आश्व. २।१९।१६.

आज्यभागौ दर्शपूर्णमासयोः जुषाणो अग्निराज्यस्य वेतु, जुषाणः सोम आज्यस्य हविषो वेतु, इति । ३।६।५। सायणः ।

आज्यभागौ दीक्षणीयायामग्निष्टोमे पूर्वमीजानस्य, त्वमग्ने सप्रथा असि, सोमयास्ते मयोभुवः । पूर्वमीजानस्य अग्नि. प्रत्नेन मन्मना, सोम गीर्भिष्ट्वा इति केचित्, वार्त्रघ्नौ एवेति सिद्धान्तः। अग्निर्वृत्राणि जङ्घनत्, त्वं सोमासि सत्पतिः । १।४।१-७.

आज्यभागौ परोक्षवार्त्रघ्नौ साकमेधेषु मरुद्भ्यः क्रीडिभ्य. इत्यत्र । उत ब्रुवन्तु जन्तवः, अय कृत्नुरगृभीत । आश्व २।१८।१५.

आज्यभागौ पावकवन्तौ पवित्रेष्ट्या ऋचावेव । आग्नेयस्य अग्नी रक्षांसि सेधति, यत्ते पवित्रमर्चिषि । सौम्यस्य यो धारया पावकया, आ कलशेषु धावति पवित्रे । आश्व २।१२।३-६.

आज्यभागौ पुष्टिमन्तौ अग्न्याधेये तृतीयस्या अग्नी षोमीष्टौ अग्निना रयिमश्नवत्, गयस्फानो अमीवहा । आश्व २।१।१७ । साकमेधेषु आदित्येष्टौ । आश्व २।१९।४० । गृहमेधीये । आश्व २।१८।५.

आज्यभागौ रक्षितवन्तौ रक्षोघ्न्यामिष्टौ अग्ने रक्षाणो अंहसः, त्वं न. सोम विश्वतः । आश्व. २।१०।५.

आज्यभागौ वार्त्रघ्नौ पौर्णमास्या अग्निर्वृत्राणि जङ्घनत्, त्वं सोमासि सत्पतिः । आश्व. १।५।२२.

आज्यभागौ वृधन्वन्तौ [illegible] मन्मना, सोम गीर्भिष्ट्वा [illegible] । आश्व [illegible]

अग्न्याधेये द्वितीयस्या पावकशुचीष्टी । आश्व. २।१।२५। साकमेधेषु सांतपनीष्टौ । आश्व. २।१८।३.

आज्यशस्त्रं अग्निष्टोमे प्रातःसवने होतुराज्यम् । बहिष्पवमानोत्तरं क्रतुग्रहभक्षणादूर्ध्वम् । अक्षरपङ्क्तिः, सु मद् पद् वग् दे । पिता मातरिश्वा । आहाव', शों सावोऽऽऽम् । तूष्णींशंस., भूरग्निर्ज्योतिर्ज्योतिरग्नोऽऽऽम् । इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रोऽऽऽम् । सूर्यो ज्योतिर्ज्योतिः स्वः सूर्योऽऽऽम् । निविद', अग्निर्देवेद्ध. अग्निर्मन्विद्ध इत्यादयः. । (१।१-१२) । सूक्त, प्र वो देवायाग्नयेऽ बर्हिष्ठमर्चास्मै । अन्त्या परिधानीया । शस्त्रजप., उक्थ वाचि घोषाय त्वा । शस्त्रयाज्या येऽऽऽयजामहेऽग्ना इन्द्रश्च दाशुषो॰ देवाऽऽऽवौषट् । अनुवषट्कार., सोमस्याग्ने वीहीऽऽऽवौषट् । भक्ष., उक्थपात्र (ग्रह) अग्रे भक्षयन्ति [illegible] नाराशंसान् भक्षयन्ति, आप्याययन्ति । १०।५।१, १०।९।७ ९, १०।१०।१-३, ५-९ ऐआ. २।१।१ [illegible] । ऐआ ५।१।४ [illegible] ।

आज्यशस्त्रम् । आज्य पवमानमनुशंसति । १०।५।१। आग्नेयं होता आज्यं शंसति । ४ । आनुष्टुभं होता आज्यं शंसति । ८ । होता अनुष्टुभ. [illegible] प्रथमा त्रिरन्वाह । १० । [illegible] विराट् [illegible] आग्नेन्द्री अग्न इन्द्रश्च दाशुषो । १०।५।१३-१६ । [illegible] शंसति । १०।९।१। द्वादशपदां पुरोरुचं शंसति । [illegible] । प्र वो देवायाग्नये इति सूक्तं शंसति । ३-९ । [illegible] । १० । आहाव निविद् सूक्तम् । प्र द्रवो अथ निविदं दधाति । १०, ११।८, १०।२।१-१२ । निविदं [illegible] शंसति । १०,११।१, १०।१।१।५ । [illegible] (पादे) [illegible], [illegible] पदे [illegible] ([illegible] [illegible] [illegible] पदे [illegible] [illegible] । [illegible] । [illegible] [illegible]) १०,३।१४.

[illegible] । [illegible] । [illegible] , [illegible] [illegible] । [illegible] ।

आज्यशस्त्रं छन्दोमप्रथमेऽहनि द्वादशाहे त्रैष्टुभं, समुद्रादूर्मिर्मधुमान् । २३।१।६-१० । द्वितीयेऽहनि त्रैष्टुभ, अग्निं वो देवमग्निभिः २३।३।६-७ । तृतीयेऽहनि त्रैष्टुभं, अगन्म महा मनसा । २४।१।७-८.

आज्यशस्त्रं पृष्ठ्ये षडहे प्रथमेऽहनि, उप प्र यन्तो अध्वरं । २०।१।४-५ । द्वितीयेऽहनि अग्निं दूतं वृणीमहे । २०।३।४। तृतीयेऽहनि, युक्ष्वा हि देवहूतमान् २१।१।४-११ । चतुर्थेऽहनि पाङ्क्तं, अग्निं न स्ववृक्तिभिः २१।४।३-८ । पञ्चमेऽहनि । जागतं, इमम् षु वो अतिथिं । २२।१।६ । षष्ठेऽहनि अतिच्छन्दाः, अयं जायत मनुषो । २२।७।४.

आज्यशस्त्र महाव्रते अन्नाद्यकामस्य, अग्निं नरो दीधितिभिः । ऐआ. १।२।१-१२ । कीर्तिकामस्य, अबोध्यग्निः समिधा । ऐआ. १।१।१५ । पुष्टिकामस्य, विशोविशो वो अतिथिं । ऐआ. १।१।५।१४। प्रजापशुकामस्य, होता अजनिष्ट चेतनः । ऐआ. १।१।१६.

आज्यशस्त्र महाव्रते प्र वो देवायाग्नये इति सर्वं प्राकृत, अग्निं नरो दीधितिभिः इति पञ्चविंशत्यृचं च [illegible] द्वितीय [illegible] चित् । ऐआ. १।१।३.

आज्यशस्त्रस्य आरम्भणीया प्र वो देवायाग्नये इत्यनुदुद् अग्निष्टोमे । १२।३।१.

आज्यशस्त्रस्य आहावे अध्वर्योः प्रत्युपस्थानमिति । १०।६।४-५.

आज्यशस्त्रस्य [illegible] विराट् [illegible] आग्नेन्द्री अग्न इन्द्रश्च दाशुषो पुरोरुचे इति । १०।५।१०-१६, १०।८।८, १०।९।१०-११.

आ [illegible] तूष्णींशंसः, भूरग्निर्ज्योतिर्ज्योति[illegible]ऽऽऽम [illegible] । ९।७।१-६.

[illegible] [illegible] [illegible] [illegible] पृष्ठ्ये षडहे चतुर्थेऽहनि । [illegible]

आज्यशस्त्रस्य पुरोरुच (निविद्) । [illegible] [illegible] [illegible] । [illegible] पुरोरुचं शंसति, [illegible] [illegible] [illegible] । [illegible] [illegible] । १०।७।५-१२, १०।९।३.

आज्यशस्त्रे शंसने ऋक्क्रमः द्विविधः, ब्राह्मणोक्तः सूत्रोक्तश्च । सूत्रे एव विकल्प उक्तः ।

ब्राह्मणोक्तः	सांहितिकः (ऋसं १।१३।१-७)	
१ प्र वो देवाय	१ प्र वो देवाय	१
२ दीदिवांसं	५ ऋतावा यस्य	२
३ स नः शर्माणि	४ स यन्ता विप्र	३
४ उत नो ब्रह्मन्	६ स नः शर्माणि	४
५ स यन्ता विप्र	३ दीदिवांसं	५
६ ऋतावा यस्य	२ उत नो ब्रह्मन्	६
७ नू नो रास्व परि-धानीया	७ नू नो रास्व परिधानी	७

ऐआ. १०।८।१-११, १०।९।३-११.

आज्य आशिर-पशुविधिः अग्निष्टोमे तृतीयसवने । १३।३।२-३.

आज्याहुतिः प्रशस्ता । ७।४।१.

आज्याहुतीः तिस्रः होता महाव्रते माध्यंदिने मरुत्वतीये शस्त्रे संस्थिते विसंस्थितसंचरेण निष्क्रम्य आग्नीध्रीये औदुम्बरेण स्रुवेण जुहोति अनुमामिन्द्रो, आदित्या मा विश्वे, पितरो मा विश्व इतिमन्त्रैः । ऐआ. ५।१।१०–१३.

आतपवर्ष्या आपः चमसे पात्र्या वा अभ्यानेयाः ऐन्द्रमहाभिषेके संभारः । ३९।३।१ । यज्ञाङ्गराजाभिषेके च चमसे प्रक्षेप्याः । ३७।१।३.

आतानः = विस्तारः, रचना, प्रयोगपाशुभागः । २१।४।१२ इ०. ऐआ. ५।१।८.

आतिथ्या अग्निष्टोमे । नवकपालः पुरोडाशः । ३।४।३ । विष्णुर्देवता । ४ । अग्निमन्थनं । ३।४।६, १४।२।६, ३।५।१-४४ । आज्यभागयोः पुरोनुवाक्ये ३।६।१ ४ । याज्ये । ५। प्रधानस्य याज्यानुवाक्ये । ६-८। संयाज्ये । ९।१० । पुरोडान्ता इयं । ११, १५।१।३। अनुयाजप्रतिषेधः। ३।६।१२-१५। हविरातिथ्यं निरुप्यते सोमे राजनि आगते । ३।४।१-२। अग्निं मन्थति सोमे राजन्यागते । ३।४।६.

आतिथ्याबर्हिः रेव उपसत्सु अग्नीषोमे पशौ च । ४।८।१.

आतिथ्याय असन्तं नाद्रियन्ते । ऐआ. १।१।१०.

आत्मनः = देहमध्यस्य, उपस्थानं चित्याग्नेः, महाव्रते माध्यंदिने । होता । ऐआ. ५।२।६.

आत्मा अश्रुतः अगतः अमतः अनतः अदृष्टः अविज्ञातः अनादिष्टः श्रोता मन्ता द्रष्टा आदेष्टा घोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामन्तरपुरुषः । स मे आत्मा इति विद्यात् । ऐआ. ३।१०।१९.

आत्मा = देहमध्यः निष्केवल्यशस्त्रस्य महाव्रते । तदिदास इति सूक्त नवर्चं, ता सुते कीर्तिं षड्ऋचं, भूय इद् वावृधे पञ्चर्चं, नृणामुत्वा नृतमं तृचं, सूददोहाः=ता अस्य सूददोहसः ऐआ. ५।६।१,११ । के चित्तु तदिदास सूक्तगततृतीयस्या ऋचः तृतीयं पादमुद्धृत्य दक्षिणपक्षगताभित्वाशूरप्रगाथगतस्य 'अश्वायन्तो मघवन्निन्द्र वाजिनः' इत्यस्य पादस्य स्थाने पठनीयः, अश्वायन्तो इत्येत च पूर्वोक्ततृतीयपादस्थाने पठनीयः । एव तदिदाससूक्ततृतीयस्या ऋचः चतुर्थं पादं ततः उद्धृत्य उत्तरपक्षगतत्वामिद्धिप्रगाथे 'गामश्वं रथ्यमिन्द्र सकिर' इत्यस्य स्थाने पठनीयः, गामश्वं इत्येतं च पूर्वोक्तचतुर्थपादस्थाने पठनीयः इति वदन्ति । ऐआ. ५।६।२-३.

आत्मा निष्केवल्यस्य महाव्रते । तदिदास, तां सुते, भूयइद्, नृणामुत्वा, इति लयोविंशतेः ऋचां 'नदं व ओदतीना' इत्यनया ऋचा पादशः पादशो विहरणं कर्तव्यम् । किं च तदिदासऋचः प्रथमद्वितीयचतुर्थपादेषु पु, रु, षः, इति त्रीण्यक्षराणि यथासंख्यं स्थापनीयानि । तथा सति आत्मस्था एका ऋक्, नद व ओदतीना इत्येषा एका ऋक्, उभयोः पादशो मिश्रणे द्वे बृहत्यौ भवतः एवं च २३ + २३ = ४६ एतावत्यो बृहत्यः संपद्यन्ते । तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेष नृम्णः । सद्यो जज्ञानो निरिणाति शत्रून्, अनु यं विश्वे मदन्त्यूमाः इति ऋक् प्रथमा । नदं व ओदतीनां, नदं यो युवतीनाम् । पतिं वो अघ्न्यानां, धेनूनामिषुध्यसि इत्येका ऋक् नदः नाम । अनयोर्मिश्रणं यथा "अपि निदर्शनायोदाहरिष्यामः–तदिदास भुवनेषुज्येष्ठं पु नदं व ओदतीनाम् । यतो जज्ञ

उग्रस्त्वेषनृम्णो ह नदं यो युवतीनोऽऽऽम् । (एषा एका बृहती निष्पन्ना) सद्यो जज्ञानो निरिणाति शत्रून् पतिं वो अघ्न्यानाम् । अनु यं विश्वे मदन्त्यूमाः यो धेनूनामिषुध्यसोऽऽऽम् ।" एषा द्वितीया बृहती निष्पन्ना। इदं बृहतीद्वयं इत्थमेव त्रिःपठनीयं प्रतिपत्त्वात् । अथ तदिदासेत्याद्यारम्भभागस्थानां सर्वासां ऋचां नदेन विहरणं उक्तरीत्यैव कर्तव्यं 'पु—ह—षः' इत्यक्षराणि तु प्रथमायामेव ऋचि, नोत्तरासु । ऐआ. १।१३।१,७; १।१५-१६; ५।६।४-६.

आत्मा ब्रह्म चिद्रूपम् । ऐआ. २।२५.

आत्रेयस्य दक्षिणो बाहुः पशुभागः । ३१।१।२.

आदित्यः अग्नेर्जायते । ४०।५।१३.

आदित्यग्रहः अग्निष्टोमे तृतीयसवनारम्भे । १३।५।१-३.

आदित्यग्रहस्य याज्या आदित्यासो अदितिर् । इयं महती । १३।५।२.

आदित्यग्रहे नानुवषट्करोति, न भक्षयति । १३।५।३.

आदित्यात्चन्द्रमा जायते । ४०।५।१४.

आदित्यानां सृष्टिः 'तस्य (प्रजापतेः) यद्रेतसः प्रथममुददीप्यत तदसावादित्योऽभवत्.' 'अथ तृतीयमदीदेदिव त आदित्या अभवन्' । १३।१०।१.

आदित्यानामयनं = अतिरात्रः, उक्थ्यश्चतुर्विंशः, शेषं सर्वे अभिप्लवाः षडहाः, अन्ते च महाव्रतं, अतिरात्रः। १८।३।५-६,८.

आदित्योपस्थानं होतुः महाव्रते माध्यंदिने मार्जालीयहोमोत्तरं, तत्र मार्जालीयहोममन्त्रा एव स्वाहाकाररहिता दश, द्वौ चाधिकौ 'एह्येवाऽऽऽइदं मधूऽऽऽइदं मधु, इमं तीव्रसुतं पिबाऽऽऽइदं मधूऽऽऽइदं मधु' इति । तत्र आदित्ये प्राक्स्थिते प्राङ्मुखो होता, आदित्ये प्रत्यक्स्थिते तु प्रदक्षिणं पर्यावृत्य प्रत्यङ्मुखः सन्नुपतिष्ठेत । ऐआ. ५।१।२६.

आदित्यो वै अस्तं यन् अग्निमनुप्रविशति । ४०।५।१.

आधवनीयः पल्वमखसंभारेषु उपस्त्पनीयः । ३५।६।४.

आध्वर्यवं यजुषा । २५।७।३-४.

आनुष्टुभं चतुर्थमहः पृष्ठ्ये षडहे । २१।४।६.

आन्ध्राः विश्वामित्रपुत्रा एव शप्ताः सन्तः संजाताः। ३३।६।२.

आपः आतपवर्ष्याः चमसे पात्र्यां वा समानेयाः ऐन्द्रमहाभिषेके संभारेषु । ३९।३।१ । यज्ञाङ्गराजाभिषेके च चमसे समानेयाः । ३७।१।३ ।

आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे । ४०।४।९.

आपः शूद्राणां भक्षो व्रतादिषु । ३५।३।४.

आपोहिष्ठीयः तृचः शनैःशनैः शंस्तव्यः अग्निष्टोमे आग्निमारुते शस्त्रे जातवेदस्योत्तरम् । १३।१२।३-४.

आप्यायनं सोमाप्यायनं=जलेन प्रोक्षणम् । तत्र अंशुरंशुष्टे देव सोमाप्यायतां इत्यादिर्मन्त्रः । यजमान ऋत्विजश्च सर्वे कुर्वन्ति । ४।९।३-४.

आप्रियः नाम पशोः प्रयाजयाज्याः एकादश । १ समिधः, २ तनूनपात् वसिष्ठ शुनकभिन्नानां, नराशंसो वसिष्ठशुनकानाम्, ३ इलः, ४ बर्हिः, ५ दुरः, ६ उषासानक्ता, ७ दैव्या होतारा, ८ तिस्रो देवीः, ९ त्वष्टा, १० वनस्पतिः, ११ स्वाहाकृतयः इति ।६।४।१-१६। यथार्षि । १६ । अत्र आश्वलायनः—समिद्धो अग्निर्निहितः पृथिव्यां (ऋसं २।३।१-११) इति शुनकानां, जुषस्व नः समिधमग्ने अद्य (ऋसं ७।२।१-११) इति वासिष्ठानां, समिद्धो अद्य मनुषो दुरोणे (ऋसं १०। ११०।१-११ अनाराशंसं) इति सर्वेषां (शुनकवसिष्ठभिन्नानां) आश्व ३।२।६ । यथऋषि वा आश्व. ३।२।७। अत्र शौनकश्लोकः 'कण्वाङ्गिरोऽगस्त्यशुनका विश्वामित्रोऽत्रिरेव च । वसिष्ठःकश्यपो वाध्र्यश्वो जमदग्निरथोत्तमः ॥ इति । अत्र गार्ग्यवृत्तिः—सुसमिद्धो न आवह ऋसं १।१३।१-१२ कण्वानां तनूनपान्नराशंससहितम् ।

समिद्धो अग्न आवह, ऋसं १।१४२।१-११ कण्वभिन्नानामङ्गिरसाम् ।

समिद्धो अद्य राजसि ,, १।१८८।१-११ अगस्तीनां

अनाराशंसम् ।

समिद्धो अग्निर्निहितः ऋसं. २।३।१-११ शुनकानां अतनूनपात् ।

समित्समित्सुमना ,, ३।४।१-११ विश्वामित्राणां अनाराशंसम् ।

सुसमिद्धाय शोचिषे ,, ५।५।१-११ अत्रीणां अतनूनपात् ।

जुषस्व नः समिधं ,, ७।२।१-११ वसिष्ठानां अतनूनपात् ।

समिद्धो विश्वतस्पतिः ,, ९।५।१-११ कश्यपानां अनाराशंसम् ।

इमां मे अग्ने समिधं ,, १०।७०।१-११ वाध्र्यश्वानां अतनूनपात् ।

समिद्धो अद्य मनुषो (ऋस १०।११०।१-११) शुनकवाध्र्यश्वभिन्नभृगूणां अनाराशंसम् ।

प्राजापत्ये तु (पशौ) जामदग्न्यः (समिद्धो अद्य मनुषो) सर्वेषां (वसिष्ठशुनकवर्जितानाम् । आश्व. ३।२।८.

आप्रियः जामदग्न्यः समिद्धो अद्य मनुषो द्वादशाहे प्राजापत्ये पशौ । १९।४।६-८.

आप्रियः पशुषु यथर्षि भवन्ति । १९।४।७.

: आयुष्यं सूक्तं कया शुभा सवयसः सनीळाः । २३।१।१५. ऐआ. १।६।१२.

आरण्येनाग्निना अग्नीनां दाहे प्रायश्चित्तं, समारोपयेदरण्योः, (असंभवे) आहवनीयात् गार्हपत्याद्वा उल्मुकं समादाय दूरं गच्छेत्, (तदसंभवे) अग्नये संवर्गाय अष्टाकपालं निर्वपेत् । कुविदङ्ग नो गविष्टये, मा नो अस्मिन् महाधने इति याज्यानुवाक्ये । आहुतिं वा आहवनीये जुहुयात् अग्नये संवर्गाय स्वाहा इति । २२।६।४.

आरम्भणीयस्तृचः मरुत्वतीयशस्त्रस्य माध्यंदिने अनुष्टुप् आ त्वा रथम् । १२।३।२.

आरम्भणीया ऋक् आज्यशस्त्रस्य प्रथमस्य प्र वो देवायाग्नये । १२।३।१.

' आरम्भणीयाः अहर्गणेषु शस्त्राणां, मैत्रावरुणस्य ऋजुनीती नो वरुणः, ब्राह्मणाच्छंसिनः इन्द्रं वो विश्वतस्परि, अच्छावाकस्य यत्सोम आसु ते । २७।३।१-६.

आरम्भणीयानि सूक्तानि उक्थ्ये तृतीयसवने ऐन्द्राणि जागतानि । मैत्रावरुणस्य चर्षणी धृतं, ब्राह्मणाच्छंसिनः प्र मंहिष्ठाय, अच्छावाकस्य ऋतुर्जनित्री, अन्ततश्च त्रैष्टुभं स वां कर्मणा इति । २८।७।१-४.

आरम्भणीया वैश्वदेवशस्त्रस्य तृतीयसवने तत्सवितुर्वृणीमहे । १२।३।३.

आरोपणं आसन्द्या यजमानस्य । ऐन्द्रे महाभिषेके वसवस्त्वा गायत्रेण छन्दसा इत्यादिमन्त्रेण । ३९।३।३-४.

आरोहणं आसन्द्या यज्ञाङ्गराजाभिषेके । यजमानः अग्रे दक्षिणेन जानुना अथ सव्येन. अभिहृत्वा गायत्र्या सयुक् इत्यादिना । ३७।२।३-८.

आर्त्विज्यं त्रिविधं जग्धं गीर्णं वान्तं इति । जग्धं= ऋत्विक् धनलंपटः अनुष्ठानतात्पर्यरहितश्चेत् । गीर्णं= यजमानस्य भयंकरो यदि ऋत्विक् । वान्तं= पातित्यादिना अपवादेन युक्तः ऋत्विक् यत्र । प्रमादकृते तु तस्मिन् प्रायश्चित्तं वामदेव्यसाम्नि । तच्च, कयानश्चित्र इति तृतीया गायत्री सप्तसप्ताक्षरपादा । तत् त्रिभिरक्षरैर्न्यूनं, तत्र प्रतिपादान्ते ' पु, रु, षः ' इत्यक्षराणि यथासंख्य उपदधेत्, अभीषुणः सखीना पु, अविता जरितॄणा रु, शतं भवा स्यूतिभिः षः इति । नित्यप्रयोगेऽपि इदं कुर्यात् ' अपि यदि (यद्यपि) समृद्धा इव ऋत्विजः स्युः ' । १५।१।१-७.

आर्त्विज्याधिकारी द्वादशाहे दक्षिणाप्रतिग्रहसमर्थः तपस्वी विद्वांश्च । १९।३।१.

आर्त्विज्याय आह्वानं स्वीकर्तव्यमेव, ' यशसा वा एषोऽभ्येति य आर्त्विज्येन, त यः प्रतिरुन्धेत् यशः स प्रतिरुन्धेत्, यदि तु अयाज्यः स्वयमपोदितम् ' । ३०।८।४.

आर्भवं तृचं गायत्रं वैश्वदेवशस्त्रे छन्दोमप्रथमेऽहनि अयं देवाय जन्मने ।२३।२।९,१२। छन्दोमद्वितीयेऽहनि पुनाना पितरः पुनः । २३।४।११ । छन्दोमतृतीयेऽहनि इन्द्र इषे ददातु नः ।१। ते नो रत्नानि धत्तन ।२–३। २४।२।१२.

आर्भवं निविद्धानं सूक्तं वैश्वदेवशस्त्रे अग्निष्टोमे तृतीयसवने तक्षन् रथं सुवृतम्। प्रयोगे.।

आर्भवं सूक्तं वैश्वदेवशस्त्रे पृष्ठ्ये षडहे। प्रथमेऽहनि इहेह वो मनसा। २०।२।६,। द्वितीयेऽहनि तक्षन् रथं सुवृतं।२०।३।५। तृतीयेऽहनि अनश्वो जातो।२१।२।१०। चतुर्थेऽहनि प्र ऋभुभ्यो दूतमिव।२१।५।१। पञ्चमेऽहनि ऋभुर्विभ्वा वाज इन्द्रो।२२।२।१। षष्ठेऽहनि चतुर्दशर्चे किमु श्रेष्ठः किं यविष्ठ इत्येकं चतुऋर्चं, उप नो वाजा अध्वर इति द्वितीयम्। २२।८।११.

आर्भवपवमानस्य स्तोत्रियः स्वादिष्ठया मदिष्ठया। १२।३।३.

आर्भवसूक्तस्य तक्षन् रथं सुवृत इत्यस्य वैश्वदेवशस्त्रगतस्य आदौ सुरूपकृत्नुमूतये इति धाय्या। अन्ते च येभ्यो माता, एवा पित्रे, इति द्वे शस्त्वा अयं वेनश्चोदयत् इति धाय्या। १३।६।१-४.

आलम्भनविधिः अग्नीषोमीयपशोः। ६।३।९.

आवापिकं सूक्तं स्तोमविवृद्धौ चतुर्विंशादिस्तोमेषु। मैत्रावरुणस्य को अद्य नर्यो इति सूक्तं, ब्राह्मणाच्छंसिनः वने न वायो न्यधायि, अच्छावाकस्य आ याह्यर्वाङुप। २९।३।१०-११

आवापिका ऋचः उत्तरस्यहे पृष्ठ्यषडहस्य अभ्यूढ्ध्याः। चतुर्थेऽहनि न ते गिरो अपि मृष्ये इति चतस्रः प्र यो महे महि वृधे इति तिस्रश्च इति सप्त विराजः। तत्र प्रथमास्तिस्रः मैत्रावरुणस्य, तृतीयाचतुर्थीपञ्चम्यः ब्राह्मणाच्छंसिनः,पञ्चमीषष्ठीसप्तम्यः अच्छावाकस्य। वैमदीरावपेरन् इति पक्षान्तरं, तत्र यजामह इन्द्र इत्याद्याः विमदेन ऋषिणा दृष्टः सप्त। तत्र।१।२।३। मैत्रावरुणस्य,।३।४।५। ब्राह्मणाच्छंसिनः,।५।६।७। अच्छावाकस्य पङ्क्तीः पञ्चमेऽहनि यश्चिद्धि सत्य सोमपा इति सप्त। तत्र १।२।३ मैत्रावरुणस्य, ३।४।५ ब्राह्मणाच्छंसिनः, ५।६।७। अच्छावाकस्य। पारुच्छेपीः षष्ठेऽहनि इन्द्राय हि द्यौः इत्यादयः सप्त ऋचः, तत्र १।२।३ मैत्रावरुणस्य, ३।४।५ ब्राह्मणाच्छंसिनः, ५।६।७ अच्छावाकस्य। अथ चावापः संपातोत्तरं अहरहःशस्येभ्यश्च पूर्वम्। २९।३।८-९.

आशिर-आज्य-पशुविधिः।१३।३।२-३.

आशीर्मन्त्रपाठः प्रपदहोमोत्तरं यज्ञाङ्गराजाभिषेके 'इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः। इहो सहस्रदक्षिणो वीरस्त्राता निषीदतु॥' इति। ३७।७।५-६.

आशीर्वादमन्त्रः स्वस्त्ययनं नाम। स च 'प्र, च' इत्येव। १६।२।१.

आश्रमचतुष्टयं शब्दान्तरैरुक्तं मलं (२), आजिनं (१), श्मश्रूणि (३), तपः (४) इति। ३३।१।७.

आश्वत्थानि फलानि चमसे पात्र्यां वा समोप्यानि ऐन्द्रमहाभिषेके सभारः।३९।२।१-४, ।३९।३।१.

आश्विनमहद्भक्षमन्त्रः होतुः 'एष वसुः संयद्वसुरिह वसुः संयद्वसुर्मयि वसुः संयद्वसुः श्रोत्रपाः श्रोत्रं मे पाहि' इति। सर्वतः परिहारमाश्विनं भक्षयति (स्वशिरः, श्रोत्रसामीप्येन पात्रस्य प्रदक्षिणीकृत्य)। ९।३।७-८.

आश्विनशस्त्रं अतिरात्रे। १७।१-५। घृतं प्राश्य शंसेत्। १७।१।२। आह्वावः शकुनिरिव उत्पतिष्यन् आह्वयीत। ३। प्रतिपत् आग्नेयी अग्निर्होता गृहपतिः स राजा। ४ ९। अग्निं मन्ये पितर इति के चित् तत्र। आग्नेयं उषस्य ऐन्द्र आश्विनं इति।१७।२।१-७। सर्वाणि सप्तसप्तच्छन्दो युक्तानि। सौर्याणि च सप्तच्छन्दांसि इति के चित् तत्र, किंतु त्रीण्येव शंसेत्। सूर्यो नो दिवस्पातु, उदुत्यं जातवेदस इति द्वे गायत्रे, चित्रं देवानामुदगात् इति त्रैष्टुभं, नमो मित्रस्य वरुणस्य चक्षसे इति जागतं इति। १७।३।५-१२। ऐन्द्रः प्रगाथः इन्द्र क्रतुं न आभर, प्रगाथः रथंतरयोनिः अभित्वा शूर, प्रगाथः मैत्रावरुणः बह्वः सूरचक्षसः, ऋचौ द्यावापृथिवीये मही द्यौः पृथिवी इति गायत्री, ते हि द्यावापृथिवी इति जागती, द्विपदा विश्वस्य देवीमृचयस्य।१४।४।१-१८। परिधानीया ब्राह्मणस्पत्या बृहस्पते अति यदर्यः, प्रजाकामस्य पशुकामस्य च एवा पित्रे विश्वदेवाय इति, तेजस्कामस्य ब्रह्मवर्चसकामस्य च बृहस्पते अति यदर्यः इति। याज्ये द्वे उभा पिबतमश्विना इति गायत्री, अश्विना वायुना इति त्रिष्टुप्। किं वा उभा पिबत गायत्री, प्र वामन्धांसि मद्या इति विराट्। १७।५।१-२०.

आश्विनी इष्टिः कपालनाशे (इरवलयास) प्रायश्चित्तम् । अश्विभ्यां द्विकपाल निर्वपेत्, अश्विनावर्तिरस्म आगोमता नासत्या इति याज्यानुवाक्ये । आहुतिं वा आहवनीये जुहुयात् अश्विभ्यां स्वाहा इति । ३२।८।२.

आसन्दी औदुम्बरी प्रादेशमात्रपादा अरत्निमात्रशीर्षण्यानूच्या (अरत्निमात्र आइन्या पक्ष्या बसविर्ह्ली) मौञ्जविवाना व्याघ्रचर्मास्तरणा । यज्ञाङ्गे राजाभिषेके संभरेषु दक्षिणाया स्फ्यवर्तन्यां प्रतिष्ठापयति,अन्तर्वेदि द्वौ पादौ बहिर्वेदि द्वौ । २७।१।३-४। अभिमन्त्रणं तस्याः।२७।२।२ ३ । तत्र आरोहण राज्ञ । ४-८ । अवरोहणं ततः। ३७।५।१-४ । ऐन्द्रमहाभिषेकेऽपि इयमासन्दी उक्तविधा, तस्या अभिमन्त्रणं, तस्या राजानं आरोहयेत् । ३९।३।१-४.

आसन्दीं औदुम्बरीं उद्गाता अधिरोहति महाव्रते। ऐआ. १।८।१०-१२, ५।४।१६.

आसन्दीमारोहयेत् राजानं ऐन्द्रमहाभिषेके, वसवस्त्वा गायत्रेण च्छन्दसा त्रिवृता स्तोमेन रथंतरेण साम्नाऽऽरोहन्तु, इत्यादिना मन्त्रेण । ३९।३।३-४.

आसन्द्या अभिमन्त्रण ऐन्द्रमहाभिषेके, बृहच्च ते रथंतरं च पूर्वौ पादौ भवता, वैरूप च वैराज चापरौ शाक्वररैवते शीर्षण्ये इत्यादिना । ३९।३।१-२.

आसन्द्या अभिमन्त्रणं क्षत्रिय यज्ञे महाभिषेके, अग्निष्ट्वा गायत्र्या सयुक् छन्दसाऽऽरोहतु सवितोष्णिहा इत्यादि । ३७।२।३.

आसन्द्याः प्रतिष्ठापनं यज्ञाङ्गे अभिषेके दक्षिणाया स्फ्यवर्तन्या अन्तर्वेदि द्वौ पादौ बहिर्वेदि द्वौ । ३७।१।४

आसन्द्यामारोहण यज्ञाङ्गे अभिषेके क्षत्रियस्य अग्निष्ट्वा गायत्र्या सयुक् इत्यादिनैव मन्त्रेण । ३७।२।३-८.

आसन्द्यामासीन राजान राजकर्तारः अभ्युत्क्रोशन्ति ऐन्द्रमहाभिषेके, इमं जना अभ्युत्क्रोशत सम्राजं साम्राज्य इत्यादि । ३९।३।५-६.

आसन्द्यामासीनस्य राज्ञोऽभिषेकः यज्ञाङ्गः, पुरस्तात् प्रत्यङ्मुखस्तिष्ठन् पुरोहित औदुम्बर्या आर्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेण अन्तर्धाय अभिषिञ्चति, इमा आपः शिवतमा इत्येतेन तृचेन, देवस्यत्वेति च यजुषा, भूर्भुवः स्वरित्येताभिश्च व्याहृतिभिः । ३९।४।२.

आहनस्याः नाम मन्त्राः दश ब्राह्मणाच्छंसिशिल्पे षष्ठेऽहनि । तासु न्यूङ्खः । ताश्च यदस्या अंहुभेद्या. इत्यादयः (ऋक्संहितापरिशिष्टे पठिताः) । ३०।१०।४-७.

आहवनीयोपस्थानं क्षत्रिययागे । पुरस्ताद्दीक्षाया आहुतिं हुत्वा आहवनीयमुपतिष्ठते नेन्द्राद्देवताया एमि न त्रिष्टुभश्छन्दसो न पञ्चदशात् स्तोमात् इत्यादिना । ३४।५।१–४ । अनुबन्ध्यायाः समिष्टयजुषामुपरिष्टात् हुत्वा आहुतिं आहवनीयमुपतिष्ठेत नाग्नेर्देवताया एमि न गायत्र्याश्छन्दसो न त्रिवृत स्तोमात् इत्यादिना । ३४।६।१–४.

आहाव ' अध्वर्यो ' इति । अयं द्वादशाहस्य दशमेऽहनि मानसग्रहे चतुर्होतृपाठरूपशस्त्रस्य । २४।६।१.

आहाव आग्निमारुतशस्त्र तासु तिसृषु विन्यासु ऋक्षु प्रत्यृचम् । १३।१३।१९.

आहाव निविद् सूक्त चेति त्रयाणां विधिः । १०।१।१

आहाव निष्केवल्ये शस्त्रे महाव्रते त्रिः । शस्त्रादौ ' अध्वर्यो शोंऽऽऽसावोम् इति, निविद' परिधानीयायाश्चादौ ' शोंऽऽऽसावोऽऽऽम् ' इति । ऐआ. ५।५।१०

आहाव प्रात सवने 'शोंऽऽऽसावोऽऽऽम्,' माध्यंदिने 'अध्वर्यो' शोंऽऽऽसावोऽऽऽम्,' तृतीय सवने 'अध्वर्यो' शोशोंऽऽऽसावोऽऽऽम् ' इति । १२।१।१ ४.

आहाव वैश्वदेवशस्त्रे उभयतो धाय्याम् । १३।७।२-३.

आहाव शस्त्रस्य अवयवविशेष. शोंऽऽऽसावोऽऽऽम् इत्यादि. । अय शस्त्रादौ तन्मध्ये च पठ्यते । आह्वान आह्वयते आहूय इति शब्दैरयमेवोच्यते । १२।१२।४ सायण ।

आहावे आज्यशस्त्रकालीने होता प्राङ्मुखः पराङ्ग गौरिव चतुष्पद्यासीनमध्वर्युं शोंऽऽऽसावोऽऽऽम् इत्याह्वयते । आहावोत्तरमध्वर्युः सम्यक् द्विपाद् भवति। १०।६।४-५.

आहिताग्निना उपवसथे अश्रुकरणे प्रायश्चितं । 'अश्रुकरणे' इति शब्दे द्रष्टव्यम् । ३२।७।१.

आहिताग्नेः उपवसथदिने मरणे उत्तरो यागो न कर्तव्य । ३२।१।१.

आहिताग्ने. उपवसथे अनृत्याचरणे प्रायाश्चित, 'अनृत्याचरणे' इति शब्दे द्र. ३२।७।२.

आहिताग्नेः मरणविषये प्रायाश्चित्त, उपवसथे, अधिश्रिते अग्निहोत्रे सानाय्ये हविःषु वा, आसन्नेषु हविःषु, प्रवासे, प्रेतास्थिविनाशे पर्णशरः । ३२।१।१-९.

इडा=अन्नम् । ४०।३।७.

इडान्ता आतिथ्या । ३।६।११.

इडोपाह्वान अग्नीषोमीयपशोः, परिरिडा । ६।१०।११.

इडोपाह्वान अग्नीषोमीयपशुपुरोडाशस्य । ६।९।११.

इडोपाह्वान सवनीयपशुपुरोडाशस्य द्विदेवत्यान् भक्षयित्वा इळामुपह्वयते । ९।६।१.

इन्द्रः देवता द्वितीयेऽहनि पृष्ठ्ये षडहे । २०।३।१ ३.

इन्द्रगाथाः कुन्तापसूक्ते पञ्च अर्धर्चशः शंस्तव्याः, य इन्द्रो दाशराज्ञे मानुष व्यगाहथाः इत्यादय. । ३०।५।२५-२६.

इन्द्रनिहव. प्रगाथः मरुत्वतीये शस्त्रे भवति इन्द्र नेदीय एदिहि इति । १२।४।२, १२।५।१ २, २०।१।८, २०।३।७, २१।१।१३, २१।४।१२, २२।१।९, २२।७।७, २३।१।१२, २४।१।११. ऐआ. १।५।२.

इन्द्रस्य देवैरभिषेक. दृष्ट. । तत्र आसन्दी, माता...नन्ना, अनुक्रोशः अभिमन्त्र, । ३८।१।१-६ । अभिषेक ,प्राच्या दक्षिणस्या प्रतीच्या उदीच्या ध्रुवाया ऊर्ध्वाया इति दिग्भेदेन देवैरभिषेकः । ३८।२।१-३

इन्द्रियप्राप्ति । ऐआ. २।२१.

इष्ट्यावृधः नाम दर्शपूर्णमास विकृतिरूप. दशम्न... त दध्ना चरन्ति । १४।२।९.

इलान्दं साम महाव्रते अन्ते सामगा गायन्ति यज्ञायज्ञीय वा । इलान्दपक्षेऽपि एकतृचे तृचद्वये वा गानं इति पक्षद्वयम् । ऐआ. ५।१३।१५.

इष्टानिष्टार्थे वषट्कारप्रयोगाः । ११।७।१-११.

इष्टापूर्तस्यापरिज्यानिः नाम होमः दीक्षायाः पुरस्तात् क्षत्रियस्य यजमानस्य । चतुर्गृहीतमाज्य आहवनीये 'पुनर्न इन्द्रो मघवा' इति ऋक्, तदन्ते च क्षत्रं पुनरिष्ठ पूर्तं दात् स्वाहा इति मन्त्रः । अनुबन्ध्यायाः समिष्टयजुषामुपरिष्टात् च 'पुनर्नो अग्निर्जात' इति ऋक्, तदन्ते च क्षत्र पुनरिष्ट पूर्तं दात् स्वाहा इति मन्त्रः । ३४।३।१-४

उक्थं शस्त्र द्विविधं पवमानोक्थ एक, यत् पवमानार्थे भवति । महोक्थ द्वितीय, यत् महार्थे भवति। ३६।१।४ सायणः ।

उक्थदोहः नाम मन्त्रसंघः । मूर्धा लोकानामधि० एतास्त उक्थ भूमयः० प्रजापतिः० भूर्भुवःस्व० आयुः प्राण० इत्यादयः अष्टौ महाव्रते निष्केवल्योत्तरं उक्थसंपज्जपः, ततः उक्थदोहजपः होतुः । ऐआ. ५।१३।१-५.

उक्थवीर्यं नाम मन्त्रः 'उपशृण्वते त्वा' इति । तस्य स्थाने महाव्रते निष्केवल्योत्तरं उक्थदोहं जपेत् । ऐआ. ५।१२।४.

उक्थवीर्याणि नाम मन्त्रान् होता जपति । सोऽयं महाव्रते निष्केवल्योत्तर द्वितीयो जपः । घोषाय त्वा, श्लोकाय त्वा शृण्वते त्वा, उपशृण्वते त्वा, आश्रुत्यै त्वा, आश्रुताय त्वा इति षट् मन्त्राः षण्णा शस्त्राणामन्ते क्रमेण होत्रा पठनीया भवन्ति । तेऽत्र जप्याः । ऐआ. ५।५।७.

उक्थसंपत् नाम मन्त्रः, होतुर्जपः महाव्रते निष्केवल्योत्तर 'उक्थ वाचीन्द्राय' इत्युक्थसंपत् । ऐआ. ५।१२।३.

उक्थोपासनं प्राणदृष्ट्या । ऐआ. २।४-२०.

उक्थ्यः ज्योतिष्टोमसंस्थाविशेषः । अग्निष्टोमस्य विकृतिरयम् । तत्र अग्निष्टोमादूर्ध्वं उक्थ्यपर्यायास्त्रयः । तत्र प्रथमे चमसगणे मैत्रावरुणशस्त्रे इन्द्रावरुणा युवमध्व

राय नः इति दशर्चे सूक्तम् । द्वितीये चमसगणे ब्राह्मणाच्छंसिशस्त्रे ऐन्द्राबार्हस्पत्यं उद प्रुतो न वयो रक्षमाणाः इति द्वादशर्चे सूक्तं, अच्छाम इन्द्रं मतयः स्वर्विदं इत्येकादशर्चे सूक्तं च । तृतीये चमसगणे अच्छावाकशस्त्रे सं वां कर्मणा समिषा इत्यष्टर्चे ऐन्द्रावैष्णवं सूक्तम् । पोतुः द्वौ ऋतुयाजौ प्रस्थितयाज्याश्च तिस्रः । नेष्टुः द्वौ ऋतुयाजौ प्रस्थितयाज्याश्च तिस्रः । १५।६।१-६.

उक्थ्यस्य पञ्चदश स्तोत्राणि, पञ्चदश शस्त्राणि । तत्र अग्निष्टोमोत्तरं त्रीणि । १४।३।१.

उक्थ्ये अच्छावाकः परिधानीयायां अन्त्यं चतुरक्षरं अभ्यस्यति ऐरयेथामैरयेथां इति । २८।७।१२.

उक्थ्ये तृतीयासवने आरम्भणीयानि सूक्तानि होत्रकाणां 'आरम्भणीयानि' इति शब्दे द्र० । २८।७।१-४.

उक्थ्ये तृतीयसवने मैत्र वरुणः इन्द्रावरुणा युवं इति ऐन्द्रावरुणं शंसति । तस्य स्तोत्रियानुरूपौ आग्नेयौ एह्यूषु० आग्निरगामि० इति । २८।६।९ । ब्राह्मणाच्छंसी ऐन्द्राबार्हस्पत्यं शंसति प्रमंहिष्ठाय इति । तस्य स्तोत्रियानुरूपौ ऐन्द्रौ वयमुत्वा० योन इद इति । २८।६।१० । अच्छावाकः ऐन्द्रावैष्णवं शंसति ऋजुर्नीती इति । तस्य स्तोत्रियानुरूपौ ऐन्द्रौ अधाहीन्द्र गिर्वणः, इयं त इन्द्र गिर्वणः इति । २८।६।१०

उक्थ्ये त्रिंशत् स्तुतशस्त्राणि भवन्ति । ३६।४।३.

उक्थ्ये ' भूर्भुवः स्वरिन्द्रवन्तः स्तुध्वं ' इति ब्रह्मा स्तोत्रप्रसवमाह । २५।५-६.

उक्थ्ये साकमश्वेन साम्ना उक्थ्यस्तोत्राणि प्रणयेत् प्रमंहिष्ठीयेन साम्ना वा । १५।५।८-१०.

उच्छ्रयणं यूपस्य । होत्रा अनुप्रवचनीया मन्त्रा उक्ता अत्र । अञ्जन्ति त्वामध्वरे इत्यन्वाह । उच्छ्रयस्व वनस्पते इत्युच्छ्रीयमाणाय, समिद्धस्य श्रयमाणः, ऊर्ध्व ऊषुण, ऊर्ध्वो नः पाह्यंहसो, जातोजायते, युवासुवासा इत्युत्तमया परिदधाति । ता एताः सप्तान्वाह । त्रिः प्रथमामन्वाह त्रिरुत्तमाम् । ६।२।१-३३.

उत्क्रमणं (उद्या) यज्ञाद्‌गराजाभिषेके । आभाव्‍‍यसमिधं त्रीणि पदानि प्राङुदङ् आभ्युत्क्रामति क्लृप्तिरसि दिशा मयि देवेभ्यः इति राजा । ३७।५।११-१२.

उपस्थानं अपराजिताया दिशः यज्ञाद्‌गराजाभिषेके उत्क्रमणोत्तरं क्लृप्तिरसि दिशा मयि इति मन्त्रेण । ३७।५।१३.

उत्तरवेदी नाभिः । अनुवादोऽयं तेन विधिर्गम्यते । उत्तरवेद्यां मध्ये नाभिः नाम अल्पीयसी वेदिरेव क्रियते । ५।२।२३, ३२.

उत्तरवेद्यां पौतुदारवाः परिधयः अग्निष्टोमे । ५।२।२८.

उत्तरवेद्यां संभाराः स्थाप्यन्ते गुग्गुलु ऊर्णास्तुकाः सुगन्धितेजनानि च अग्निष्टोमे । ५।२।२८.

उदप्लवनं = परिप्लुः परिप्लवा इत्यध्वर्यवो यद् वदन्ति, तत्पात्रम् । ३५।६।४.

उदयनीया अग्निष्टोमे, प्रायणीयावत् । विशेषस्तु पत्नीसंयाजाः समिष्टयजुश्चास्ति । प्रायणीयायां तु न सन्ति । (सत्याषाढः ९।६।११, गार्ग्यवृत्तिः ६।१४।२) देवताः अग्निः, सोमः, सविता, पथ्या स्वस्तिः, अदितिः इति क्रमेण । देवताना देशास्तु प्रायणीयोक्ता एव । *प्रायणीयानिष्कासे स्थाल्यां* वा (निष्कासयुक्तस्थाल्या इत्याचारः) उदयनीयानिर्वापः २।५।७-८ । होता समानः, त एव ऋत्विजः ये प्रायणीयायाम् । आश्व ६।१४।५ । प्रयाजा न सन्ति अनुयाजाश्च सन्तीति पूर्वपक्षः, उभयवत्त्वं सिद्धान्तः । २।५।१-४ । संयाज्ये सेदग्निरग्नींरत्यस्त्वन्यान्० सेदग्निर्यो वनुष्यतो० इति विराजौ । २।४।४ ७ । द्रव्य अदित्याश्चरुः, इतरेषा चतुर्णामाज्यम् । आश्व ६।१४।३.

उदयनीयाया पथ्या स्वस्तिः चतुर्थी देवता, प्रायणीयायां तु प्रथमा । २।५।१५.

उदरं ब्रह्म इति शार्कराक्ष्या उपासते । ऐआ. २।४।५.

उदर्कः=अवसानं=विच्छेदः । पुरस्तादुदर्के उपरिष्टादुदर्के समानोदर्के इति त्रेधा । पूर्वकालीनो विच्छेदः पुरस्तादुदर्के, शंसनादूर्ध्वकालीनो विच्छेदः उपरिष्टादुदर्के, यस्मिन् सूक्ते चरणः चरणार्धो वा पुनःपुनरभ्यस्यते तत्सूक्तं समानोदर्कम् । २१।२।१७ सायणः

उदवसानीया द्वादशाहसत्रस्य वसन्ते कुर्युः। ३९।४।१२.

उदाहिततरः=उन्नततरः। ऐआ ५।३।११.

उदितहोम एवाग्निहोत्रे अनुदितहोमस्तु गौणः पक्षः स च शाखान्तरीयः। २५।४।१ ८, २५।५-६।

उदितहोमप्रशंसा। २५।४ ६.

उदुम्बरशाखा अल्पीयसी अभिषेकार्था राजाभिषेके। ३७।४।१ ७, ३९।३।१

उदुम्बरस्य सृष्टि। ऊर्जो वा एषोऽन्नाद्यात् वनस्पतिरजायत यदुदुम्बर.। भौज्य वा एतद् वनस्पतीनाम्। ३५।६।१.

उदूहामि=परिज्ञातस्वरस्थानविशेषयुक्तं करपयामि। ऐआ. ५।४।३ सायण।

उद्गाता औदुम्बरीमासन्दीमाधिरुह्यगायति महाव्रते। ऐआ. १।८।१०- २, ५।४।१६। शौचाचमनार्थं गमने प्राप्ते यजमानानुज्ञया गत्वा पुनरागत्य पूर्ववत् समारोहेत्। ऐआ. ५।४।१७.

उद्गातारः महाव्रते यज्ञायज्ञीय वा इलान्द वा साम गायन्ति। इलान्दगानमपि एकतृचे वा तृचद्वये वा गीयते इति पुनः पक्षद्वयम्। ऐआ. ५।१३।१५.

उद्गातार.= छन्दोगाः = सामगाः (सामगशब्दस्य लोके ' सामक ' इति अपभ्रंश. सवन:) षोडशिशाम्नः स्तोत्रियादि नानदसामपक्षे अनिरुक्तत्वेन, गौरिवीतसामपक्षे च निरुक्तत्वेन स्तुवन्ति। १६।२।४ सायण·

उद्गातारः सौम्ये चरौ बहुलघृतावत्ते स्वात्मान पूर्वमवेक्षेरन्, ततो होता इति के चित्। तन्न, होतैव पूर्वमवेक्षेत। १३।८।६.

उद्गातु. श्येनाकार वक्षः पशुभागः।३१।१।१.

उद्गीथ. उद्गात्रा गातव्यः सामावयवस्तृतीयः पाञ्चभक्तिके, साप्तभक्तिके तु चतुर्थः। १२।१२।४.

उद्धरण आहवनीयस्य साय छायाना सभेदात्पुरा सति आतपे म्रियति चित्। ३२।११।२.

उद्धरणाभावे सूर्योदये रक्तम्नवर्षाय (उपरिधृत्वा) प्रातरुद्धरेत्। ३२।११।१-२। सूर्यास्तमये च हिरण्य पुरस्कृत्य गात्रमुद्धरेत्। ३२।११।२.

उद्धरणे अग्नौ अग्ने' प्रायश्चित्तम्। तत्र निधानात् प्राग्ज्ञाने उद्धृत्य पूर्वमग्निं अपर निरस्यात्। यदि प्राङ् नानुपश्येत् अग्नयेऽग्निवते अष्टाकपाल निर्वपेत्। अग्निनाऽग्निः समिध्यते, त्वं ह्यग्ने अग्निना इति याज्यानुवाक्ये। आहुतिं वा आहवनीये जुहुयात् अग्नयेऽग्निवते स्वाहेति। ३२।५।१.

उद्धरणे प्रैषः अग्निहोत्रे-साय प्रातश्च। उद्धराहवनीयं इत्यपराह्ण आह, उद्धराहवनीयं इति प्रातः (उषसि)। २५।१।१–४

उद्यती नाम त्रिवृत्स्तोमस्य विष्टुतिः। उपास्मै, दविद्युतत्या, पवमानस्य ते इति त्रिषु तृचेषु प्रथमप्रथमा ऋचः प्रथमे पर्याये, द्वितीयाद्वितीया ऋच द्वितीये, अन्तिमाअन्तिमाश्च ऋचः तृतीये पर्याये इति। १४।४।१ सायणः।

उन्नयन नाम अग्निहोत्रहवण्यादौ स्रुवादिना सेचनम्। ३२।४।१ सायणः

उन्नीयमानयाज्याः सप्त होतारः एकैका पठन्ति। २८।१ ८ सायणः.

उन्नीयमानसूक्तगता आदिमाः सप्त ऋचः उन्नीयमानयागयाज्याना पुरोनुवाक्याः। २८।१।८.

उन्नीयमानसूक्तानि प्रात सवने आत्वा वहन्तु हरयः, इन्द्र गायत्री.। २८।१।१-४। सर्वे सूक्तमन्वाह। आदिमाः सप्तैवान्वाह इति के चित् तत्र। माध्यदिने असावि देव गोऋजीक, इन्द्रः त्रिष्टुप् वसिष्ठः सर्वे सूक्तमन्वाह। आदिमाः सप्तेति के चित् तन्न।२८।३।१-४। तृतीयसवने इहोपयात शवसो, वामदेवो गौतमः ऋभवः त्रिष्टुप्। २८।४।१, ४–५

उन्नेतु. शिरः कीकसा' अर्धं च वैकर्तस्य पशुभाग.। ३१।१।२

उपगातृणा सव्य पार्श्व पशुभागः। ३१।१।२.

उपप्रैषः मैत्रावरुणस्य होतार प्रति अध्रिगौ। ६।५।६.

उपवसथदिने आहिताग्नेर्मरणे उत्तरो यागो न कर्तव्य। ३२।१।१

उपवसथनिर्णय' दर्शपूर्णमासयो.। पूर्वां पौर्णमासीमुपवसेत् इति पैङ्ग्य उत्तरामिति कौषीतकम्। एव मम वास्यामपि। ३२।९।१-५.

उपवसथे अमत्याचरणे (दिवास्वापादि) आहिताग्नेः प्रायश्चित्तम् । 'अमत्याचरणे' इति शब्दे द्र० । ३२।७।२.

उपवसथे अश्रुकरणे आहिताग्नेः प्रायश्चित्त, 'अश्रुकरणे' इत्यत्र द्र० । ३२।७।१.

उपवासः (रात्रौ) यागप्राग्दिने मतार्थे कर्तव्यः । ३२।९।१.

उपविशति विष्टरे पुरोहितः या ओषधीः सोम राज्ञी विष्ठिताः पृथिवीमनु इति, वरणप्रयोगे । ४०।४.

उपविशेत् चेत् अग्निहोत्री धेनुः दोहकाले, तदा प्रायश्चित्तं 'अग्निहोत्रदोहकाले' इति शब्दे द्र० । २५।२।१-५, ३२।२।१-२.

उपशान्तिप्रायश्चित्तं (विशीर्णे), 'नाशप्रायश्चित्त गार्हपत्ये' इत्यत्र द्र० । ३२।४।८.

उपशान्तौ, 'अग्निना प्रयाणामपि' इति शब्देद्र. प्रायश्चित्तम् । ३२।७।२.

उपसत्प्रशंसा । ४।७।१-३ ४।८।११.

उपसत्सु तिस्रः सामिधेन्यः तिस्रो देवताः । १५।१।४.

उपसदः अग्निष्टोमे । ४।६-९ । आख्यायिका ४।६।१-७, कालः ।४।६।७। बर्हिः ।४।८।१। देवता ।४।८।२। द्रव्यं ।४।८।३। मत ।४।८।४-६। सामिधेन्यः ।४।८।७। याज्यानुवाक्याः ।४।८।८-१४। प्रयाजानुयाजनिषेधः ।४।९।१। छन्दतिक्रम्य आश्रावणं ।४।९।२। तत्तत्र शब्दे विवरण द्र० ।

उपसदः विस्त. अग्निष्टोमे । द्वादश द्वादशाहे । १०।२।३.

उपसदन्तासु इष्टिषु मन्द्रः स्वरः अग्निष्टोमे । १५।१।६.

उपस्थानं अग्नेः, प्रवासे प्राप्ते, प्रवासादेत्य, अहरहश्च । तूष्णीमेव अञ्जल्यादि विनयप्रदर्शनरूप, दिवा 'अभयं नोऽभयं मेऽस्तु' इति पठेत् । ३२।११।८.

उपस्थानं = 'आदित्योपस्थान' (इत्यत्र द्रष्टव्य) महाव्रते माध्यंदिने होतुः । ऐआ. ५।१।४६.

उपस्थानं = आहवनीयोपस्थानं (इत्यत्र द्र०) क्षत्रिययागे । ३४।५-६.

उपस्थानं 'चित्याग्नेः' (इत्यत्र द्र०) महाव्रते माध्यंदिने, होता । ऐआ. ५।१।२-६.

उपांशुग्रहं होमादूर्ध्वं होता 'प्राणं यच्छ स्वाहा सुहव सूर्याय इति अभिमन्त्रयेत । तं अभिप्राणेत् 'प्राण प्राणं मे यच्छ' इति, अग्निष्टोमे ८।३।३.

उपांशुग्रहहोमपर्यन्त अपोनप्त्रीयानुवचनमारभ्य होतुर्वाङ्नियमः । ८।३।१-२.

उपांशुत्व नाम 'करणवत् अशब्द अमनःप्रयोगं उपांशु' इति प्रातिशाख्यम् । करणवत्=ओष्ठव्यापारयुक्तम् । अमनःप्रयोग=न तु मनःप्रयोगव्यापारमात्रम् । अशब्दं=परैः श्रवणायोग्यम् । ऐआ ५।१।३ सायणः ।

उपांशु पात्नीवग्रहस्य याज्यामाह अग्नीध्रः । २६।३।८.

उपांशुसवनग्रावाणं 'व्यानाय त्वा' इत्यभिमृश्य वाचं विसृजते होता अग्निष्टोमे प्रातःसवने । ८।३।३.

उपावहरणं सोमस्य अग्निष्टोमे । सोमं क्रीत्वा प्राचीनवंशे नयनम् । तत्र होता सोमोपावहरणीयाः अष्टौ ऋचः अन्वाह । तत्रादौ 'सोमाय क्रीताय प्रोह्यमाणायानुब्रूहि' इत्याहाध्वर्युः । अथ होता भद्रादभिश्रेयः प्रेहि इत्येका, सोमं यास्ते मयोभुव इति तृच सौम्य गायत्र, सर्वे नन्दन्ति यशसा इत्येका, आगन्देव ऋतुभिर्वर्धतु इत्येका, याते धामानि हविषा इति सप्तमीं, इमां धियं शिक्षमाणस्य देवेति वारुण्या परिदधाति । तासां त्रिः प्रथमामन्वाह त्रिरुत्तमाम् । ३ । १-३.

उभममन्तरेण पाठः नाम क्रमपाठः । संहितापदक्रमाः । ऐआ. ३।२-६.

उष्ट्र अमेध्यः अभक्ष्यः । ६।८।६.

उष्ट्रस्य सृष्टिः प्रजापतेः रेतसः प्रदीप्तस्य भस्मनः सकाशात् । १३ । १० । २.

उष्णिक्त्वं संपादनीय 'गायत्रीषु' इति शब्दे द्र० महाव्रते निष्केवल्ये औष्णिहतृचाशीतौ । ऐआ. ५ । ११ । २ सायणः ।

ऊतयः नाम इष्टयश्च आहुतयश्च । १ । २ ।४.

ऊरु ऊर्ध्वभागः, सक्थि च अधोभागः इति भेदः

२१।१।२ सायणः.

उरू महाव्रते निष्केवल्यस्य । इन्द्राग्नी युवं सु नः इति सूक्तम् । तत्र द्वितीया षट्पदा, द्वादशी त्रिष्टुप्, इतराः पद्पदाः । तत्र द्वितीया ऋचं आदिमपादत्रयेण गायत्री कुर्यात्, उत्तरैश्चतुर्भिः पादैः अनुष्टुभं कुर्यात् । द्वादशीं त्रिष्टुभं पच्छः शंसेत् । इतरास्तु दश गायत्रीकारं शंसेत् । निविद्धानं सूक्तं प्रयोमहे मन्दमाना, निविदश्च (३ । १-२०) इन्द्रो देवः सोमं पिबतु इत्यादयः । सूक्तं यनेन वायो इत्यर्धर्चे, यो जात एव इति पञ्चदशर्चे, त्यमु षु वाजिनं तृच, इन्द्रो विश्व विराजति इत्येकपदा द्यारान्तरस्था, इन्द्रं विश्वा अवीवृध इत्यर्धर्चे आनुष्टुभ, तत्र आद्यन्तयोरर्धर्चयोः यथाम्नातपाठेन शंसन, मध्यमाना तु चतुर्दशानामर्धर्चाना व्यतिषङ्गेण शंसन, यथा प्रथमः अर्धर्चः यथाम्नातः शंस्तव्यः, तृतीयपादस्य संयोजन द्वितीयस्या ऋचः प्रथमपादेन इत्येकानुष्टुप् संपन्ना । ततः प्रथमायाश्चतुर्थ पाद द्वितीयस्याः द्वितीयपादेन संयोज्य प्रथमार्धर्चं कुर्यात्, ततो द्वितीयस्यास्तृतीय पाद तृतीयस्याः प्रथमपादेन संयोज्य द्वितीयमर्धर्चं कुर्यात्, सेयं द्वितीया अनुष्टुप् । एवमुत्तरत्रापि एकैकपदान्तरितत्वेन द्वौ द्वौ पादौ संयोज्य अर्धर्चान् कृत्वा तादृशाभ्यामर्धर्चाभ्या एकैका अनुष्टुप् संपादनीया । उत्तमः अर्धर्चस्तु यथाम्नात एव शंस्तव्यः इति । पिबा सोममिन्द्र मन्दतु त्वा इति षट्, योनिष्ट इन्द्र सदने इति षड्ऋच, तत्र आदिमाश्चतस्रः शस्त्वा षष्ठीं शंसेत् । पञ्चम्या परिदधाति तया निष्केवल्यस्य परिसमाप्तिः । ऐआ १।२०-२१, ५।१२।१-२.

ऊर्णास्तुकाः नाम अवि-(मेंढा) संबन्धिनःशीर्षस्था रोमाः । ५।२।२८ सायणः ।

ऊवध्यगोहं=पशोः पुरीषस्थापनार्थं अवटं खनति यत्रो । ७।१।८-९.

ऋक्तो यज्ञप्रेषप्रायश्चित्त भूःस्वाहा इति गार्हपत्ये जुहुयात् । २५।७।५.

ऋक्शः व्यतिमर्शविहरण वालखिल्याना । १ सूक्ते १ ऋक्+२ सूक्ते १ ऋक्,१ २।१+१।२ इति रीत्या सर्वत्र । २९।८।९ सायणः

ऋग्मः नाम ऋचं मिनोति मिमाति मीनाति वा । ऋचा युक्त इत्यर्थः । ऋग्मिरस्कः प्रैषमन्त्रः इति प्रकरणबलात्सिद्धो यौगिकार्थः । २२।४।६.

ऋग्वेदस्य मण्डलर्षयः प्राण एवेति उपासना । ते च शतर्चिनः माध्यमाः गृत्समदः विश्वामित्रः वामदेवः अत्रयः भरद्वाजः वसिष्ठः प्रगाथाः पावमान्यः क्षुद्रसूक्ताः महासूक्ताः इति । ऐआ. २।९-१०.

ऋग्वेदस्य हौत्रत्वं समाख्याबलात् मीमांसाया विचारितम् । ऐआउपक्रमे सायणः ।

ऋचा शौनःशेपाख्यानगतानां प्रतिगरः 'ओम्' इति । ३३।६।१२-१३.

ऋतुग्रहयागविधिः 'ऋतुयाजैश्चरन्ति' । ९।५।१.

ऋतुग्रहाः द्वादश । तत्र मैत्रावरुणेन प्रेषिताः होता पोता नेष्टा अग्नीत् ब्राह्मणाच्छंसी प्रशास्ता अच्छावाकः अध्वर्यू गृहपतिश्च इत्येते षड्ग्रहेषु 'ऋतुना सोम' इति याज्याया पठन्ति, सप्तमादिदक्षमान्तेषु चतुर्षु ग्रहेषु 'ऋतुभि सोम' इति, एकादशद्वादशयोस्तु 'ऋतुना सोम' इति पठन्ति । ऋतुयाजाना नानुवषट् कुर्यात् । ९।५।२-७.

ऋतुयाजेषु अग्निष्टोमे मैत्रावरुणः प्रैषमन्त्रं पठित्वा होतर्यज इति प्रेष्यति । होत्रादयश्च याज्या प्रैषरूपामेव पठित्वा तदन्ते वषट्कुर्वन्ति । षडहे षष्ठेऽहनि तु ऋग्मेभ्योऽपि उभयं कुर्वन्ति । २२।४।६ सायणः ।

ऋतुयाजेषु मैत्रावरुणेन प्रैषमन्त्रमुच्चार्य ऋच पठित्वा प्रैषः कर्तव्यः, होत्रादिभिरपि प्रैषमन्त्र पठित्वा ऋचमुच्चार्य वषट्कारः कर्तव्यः ' तस्मात् ऋग्मेभ्य एवाधि प्रैषितव्यं ऋग्मेभ्योऽधि वषट्कृत्यं " इदं सर्वे षडहे षष्ठेऽहनि ।२२।४।१ ६.

ऋतुयाजौ द्वौ द्वौ पोतुर्नेष्टुश्च भवतः उक्थ्ये क्रतौ । अग्निष्टोमेऽप्येवम् । होतुरपि द्वावेव ऋतुयाजौ । तत्र प्रथमः सप्तमश्च होतुः, द्वितीयोऽष्टमश्च पोतुः, तृतीयो नवमश्च नेष्टुः इति । १५।६।६.

· ऋतुयाज्या द्वादश क्रमेण होता पोता नेष्टा अग्नीत् ब्राह्मणाच्छंसी प्रशास्ता होता पोता नेष्टा अच्छावाकः अध्वर्यू (अध्वर्युः प्रतिप्रस्थात्रा सह) गृहपतिश्च पठन्ति

अग्निष्टोमे ।२४।४।२.

ऋतुयाज्यापठनार्थे मैत्रावरुणः होत्रादीन् प्रेष्यति अग्निष्टोमे । २४।४।२ सायणः]

ऋक्षयस्य पशोः सृष्टिः प्रजापतेः रेतसः प्रदीप्तस्य भस्मनः सकाशात् । १३।१०।२.

ऋषयः अश्वमेधकर्तॄणां पुरोहिताः 'ऐन्द्रमहाभिषेकफलोदाहरणानि' इत्यत्र द्र० ।

एकधनासु अप्सु आवर्तनं प्रतिदर्शनं इत्यादिक्रियायुक्तासु सतीषु होता अपोनप्त्रीया ऋचः आवर्तृतीरधनु इत्यादीरन्वाह 'अपोनप्त्रीयं सूक्तं' इत्यत्र द्र० । ८।२।२-२७.

एकपदाः षष्ठेऽहनि वालखिल्यानां प्रगाथेप्रगाथे एकैका अन्तेअन्ते प्रक्षेपणीयाः । ताश्च पञ्च । इन्द्रो विश्वस्य गोपतिः, इन्द्रो विश्वस्य भूपतिः, इन्द्रो विश्वस्य चेतति, इन्द्रो विश्वस्य राजति, इन्द्रो विश्वं विराजति इति । तत्र चतस्रः शाखान्तरे दशमेऽहनि पठिताः । पञ्चमी तु शाखान्तरे महाव्रते पठिता । तास्ततः अत्रानेतव्याः । २९।८।४-६ सायणः ।

एकविंशस्तोमः चतुर्थेऽहनि पृष्ठ्ये षडहे । २१।४।१-२.

एकविंशस्तोमस्य विष्टुतिः । १४।४।१-२ सायणः ।

एकाहेषु असर्वस्तोमेषु असर्वपृष्ठेषु ऐकाहिका एव होत्रकाः । ३६।४।१.

एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते, एतमग्नावध्वर्यवः, एतं महाव्रते छन्दोगाः । ऐआ. ३।९।११.

एवयामरुतं सूक्तं वैश्वदेवशस्त्रे षष्ठेऽहनि पृष्ठ्ये षडहे, प्रवोमहे मतयो यन्तु । सहचरसूक्तमिदम् । २२।१०। १-४.

एवयामरुते अच्छावाकशिल्पे षष्ठेऽहनि न्यूङ्खः प्रवो-महे इत्यत्र । ३०।४।१-२.

ऐकाहिका- परिधानीयाः । मैत्रावरुणस्य प्रातःसवने, ते स्याम देव वरुण, माध्यंदिने नू ष्टुत इन्द्र नू गृणान, तृतीयसवने इयमिन्द्रं वरुणमष्टमे, ब्राह्मणाच्छंसिनः प्रातःसवने स न इन्द्रः शिवःसखा, माध्यंदिने एवेदिन्द्र वृषण, तृतीयसवने बृहस्पतिर्नः परि पातु । अच्छावाकस्य प्रातःसवने गोमद्धिरण्यवत्, माध्यंदिने शुनं हुवेम मघवान, तृतीयसवने उभा जिग्यथुर्न परा । २७।५।१-५ सायणः ।

ऐतरेयं ब्राह्मणमारण्यकं च कस्य चिद् बहुपत्नीकस्य इतरायाः नामवत्याः पुत्रेण महिदासेन भूदेवताया अनुग्रहात् लब्धं, इति ऐतरेयकं इत्युच्यते । उपक्रमे सायणः ।

ऐतशप्रलापो नाम सप्ततिसंख्याकपदसमूहः । अयमेव अग्नेरायुः नाम अयातयामः नाम मन्त्रकाण्डम् । तत्र षष्ठेऽहनि ब्राह्मणाच्छंसिशिल्पे कुन्तापोत्तरं पदावग्राहं निविद्वत् शस्यते । उत्तमेन पदेन प्रणौति (अन्ते पदे प्रणवः) । एता अश्वा आप्लवन्ते, प्रतीपं प्रतिसत्वनं, इत्यादिः । ऋग्वेदखिले । तत्र अष्टादशपदान्येव शंस्तव्यानि इति के चित् । तं हैके भूयांसं शंसन्ति सर्वाण्येव । स न निषेधेत् यावत्कामं शंस इत्येव ब्रूयात् । ३०।७। १-१५.

ऐन्द्रः महाभिषेकः पुरुषार्थः । तत्र शपथदानं पुरोहितेन ।३९।१।१-२। शपथग्रहणं क्षत्रियेण।३। संभाराः। ३९।२।१-४, ३।१। चमसे पात्र्यां वा वानस्पत्यान् औषधांश्च संभारान् समोप्य दध्यादि अभ्यानयेत् । ततः चमसादिः भूमौ प्रतिष्ठापनीयः । ३९।३।१ अभिमन्त्रणं आसन्द्याः। १-२। आरोपणं क्षत्रियस्य आसन्द्या ।३-४। अभ्युत्क्रोशनं।५। अभिमन्त्रणं।६,३९।४।१। अभिषेकः। २।अभिमन्त्रणं। ३९।५।१-२। दक्षिणादान।३९।६।२। सुराकंसं क्षत्रियहस्ते आदधाति ।३। सुरापानं क्षत्रियेण । ४-७ । अभिमन्त्रणं । ६-७, अभिषेकप्रशंसा । ३९।७।९। (एतेषां क्रियाणां विवरणं तत्रतत्र शब्दे द्रष्टव्यम्)।.

ऐन्द्रमहाभिषेकः क्षत्रिययज्ञाङ्गः । उदवसानीयाया संस्थितायां अभिषिञ्चन्ति ।३७।१।२। संभाराः। ३। आसन्द्याः प्रतिष्ठापनं ।४। व्याघ्रचर्मास्तरणं ।३७।-२।१। अभिमन्त्रणं आसन्द्याः ।२-३। आरोहणं आसन्द्यां। ३-८। अपांशान्तिमन्त्रवाचनं। ।९-११। अभिषेकः।३७।-३।१-९ । होमः आभिषेकाङ्गम् । १०। प्रशंसा ।३७।-४।१-७। सुराकंसं क्षत्रियहस्ते आदधाति पुरोहितः

८-९। शान्तिवाचनं ।१० १२। सुरापान, सुराशेषदानं मित्राय ।१३-१४। अवरोहः ।३७।५।१-२। प्रत्यवरोह-मन्त्रः ।३-४। नमस्कारो ब्रह्मणे । ५ ६ । वरदान ।७। समिदाधानं आहवनीये ।८-१०। अभ्युत्क्रमणं ।११ १२। दिगुपस्थान ।१३, ३७।६।१। आमित्राणां व्यपनुत्तिः । ८। प्रपदहोमः ।९, ३७।७।१-४। आशीर्वादमन्त्रपाठः । ५-७। ऋत्विजा अभिषेकपरिज्ञानाभावे निन्दा ।८। प्रशंसा ।९-१०। ('अभिषेकः उदवसानीयोत्तरं' इति शब्देपि द्रष्टव्यम् ।तत्तत्पदार्थविवरण तु तत्तच्छब्दे द्रष्टव्यम्)

ऐद्रमहाभिपेकफलोदाहरणानि अमुना पुरोहितेन अमुष्य राज्ञोऽभिषेकः कृतः, तेन स राजा समन्तं पृथिवीं जयन् परीयाय अश्वेन च मेध्येन ईजे. इ.

पुरोहिताः	राजानः	
तुरः कावषेयः	जनमेजयः परिक्षितः	३९।-७।१-३
च्यवनः भार्गवः	शार्यातः मानवः	४
सोमशुष्मा वाजरत्नायनः	शतानीक. सात्राजितः	५
पर्वत ारदौ	आम्बाष्ठ्यः	६
,,	युधाश्रौष्टि. औग्रसेन्यः	७
कश्यपः	विश्वकर्मा भौवनः	८-१०
वसिष्ठ.	सुदा. पैजवनः	११
संवर्तः आङ्गिरसः	मरुत्त आविक्षितः	१२ १४
उदमयः आत्रेयः	अङगः वैरोचन.	३९।८।१-८
दीर्घतमा मामतेयः	भरतः दौष्यन्तिः	३९।९।१-७

ऐन्द्रमहाभिषेकविद्याप्राप्तिफलोदाहरणानि । बृहदुक्थ. आचार्यः दुर्मुखाय पाञ्चालाय प्रोवाच । -९।९।८ । विद्याप्राप्तिफले प्रत्युदाहरण, राजा अभिषिक्तः सन् जिगाय । परस्तात् पुरोहित सोऽपमानयाञ्चक्रे, तेन पराजिग्ये इति । स च राजा अत्यरातिः जानतपि. ३९।१०।९। यज्ञाङ्गाभिषेकविद्यावत उदाहरण तु जनमेजय पारिक्षितः । अभिषेकान्तक्षत्रिययागोदाहरणमपि जनमेजयः पारिक्षित एव । ऋत्विजा च तादृशविद्याशून्यानां निन्दा । ३७।७।७-१०.

ऐन्द्रमहाभिषेकविद्यावते पुरोहिताय न द्रुह्येत । ३९।९।११

ऐन्द्रमहाभिषेकविद्यावते पुरोहिताय अत्यरातिर्जानतपिर्दुद्रोह । तेन स पराजिग्ये । ३९।१०।९.

ऐन्द्रवायवः ग्रहः द्विदेवत्यः इन्द्रतुरीयः । पुरोऽनुवाक्ये द्वे अनुष्टुभौ इति के चित्, गायत्र्यौ सिद्धान्तः । वाय वायवायाहि, ऐन्द्रवायवी इन्द्रवायू इमे सुता उप प्रयोभिरागतम् । याज्ये द्वे, गायत्र्यौ इति के चित् परतु वायवी अग्र पिबा मधुना, ऐन्द्रवायवी शतेनानो अभिष्टिभिः इत्येव गायत्र्यौ इति सिद्धान्तः। ९।२।३-६। भक्षमन्त्रः एष वसुः पुरूवसुः-उपहूता वाक् सह प्राणेन० । भक्षणं पुरस्तात् प्रत्यञ्चम् । ९।३।३-८.

ऐन्द्राग्नं ग्रहं अध्वर्युः इन्द्राग्नी आगतं सुतं इति गृह्णाति । तदर्थं अच्छावाकस्य आज्यम् । १०।५।१७.

ऐन्द्राग्नग्रहस्य आज्यशस्त्रस्य याज्या अग्न इन्द्रश्च दाशुषो इति विराट् त्रयस्त्रिंशदक्षरा । १०।५।१२, १७.

ऐशान्या दिशः अपराजितत्वे आख्यायिका । देवासुरयुद्धे ऽन्यासु दिक्षु देवाना पराजयः, ऐशान्या तु न पराजयः किंतु जय एवेति तस्यास्तात्पर्यम् । ३।३।५ ६.

ओ ·—गृह्णम् । ४०।३।६.

ओषधी . शतविचक्षणा : = शतशाखाभिन्नाः । ४०।४।५

औदुम्बरः चमसः ऐन्द्रमहाभिषेके पुरुषार्थे । ३९।३।१, यज्ञाङ्गे । ३७।३।१.

औदुम्बरः वाणः शततन्तुः महाव्रते तन्तुवाद्यविशेषः । ऐआ. ५।४।१.

औदुम्बराणि प्रेङ्खस्य काष्ठानि पालाशानि वा महाव्रते माध्यंदिने । ऐआ ५।३।४.

औदुम्बराणि फलानि क्षत्रिय यज्ञे फलचमसार्थम् । ३५।४।२, ३५।६।१.

औदुम्बराणि फलानि चमसे पात्र्यां वा समोप्यानि ऐन्द्रमहाभिषेके । ३९।२।१-२, ३।१

औदुम्बरी आसन्दी ऐन्द्रमहाभिषेके पुरुषार्थे । ३९।३।१ । यज्ञाङ्गे, । ३७।१।३.

औदुम्बरीं आसन्दीमधिरोहति उद्गाता महाव्रते । ऐआ. १।८।१०-१२, ५।४।१६.

औदुम्बरीं शाखां समन्वारभन्ते सर्वे 'इषमूर्जमन्वारभामहे' इति चतुर्होतृमन्त्रव्याख्यानरूपशास्त्रकाले द्वादशाहस्य दशमेऽहनि मानमग्रहे । २४।५।१-५.

औदुम्बरी शाखा अत्यीयसी अभिषेकार्था । ३७।१।२, ३९।३।१.

औदुम्बरेण स्रुवेण होता आग्नीध्रीये तिस्र आज्याहुती र्जुहोति मरुत्वतीये शस्त्रे संस्थिते महाव्रते । 'आज्याहुतीः' इति शब्दे द्र० । ऐआ. ५।१।१०-१३.

औदुम्बर्या आर्द्रया शाखया सपलाशया यजमानम भिषिञ्चति ऐन्द्रमहाभिषेके । ३७।३।१-५, ३९।९।२.

औद्गात्र साम्ना (सामवेदेन) क्रियते । २५।७।३-४.

औष्णिही तृचाशीतिः अथ सूददोहाः महाव्रते निष्केवल्ये शस्त्रे । य इन्द्र सूक्तं (१-२३), इन्द्रः सुतेषु सूक्तं (१-२३), तम्वभिप्रगायत सूक्तं (१-१३), तत्र अन्त्यामुद्धरेत्, इन्द्राय साम गायत सूक्तं (१-१२), सखाय आशिषामहि सूक्तं (१-३०), तत्र अन्तिम तृचमुद्धरेत्, य एक इद् विदयते तृचः, आयाहीन्द्राभि-सुत तृच , यस्य त्यच्छम्बर मदे तृचः । वक्ष्यमाणासु सर्वासु गायत्रीषु उष्णिक्त्वं संपादनीयम् । यदिन्द्राह यथा त्वं इति सूक्तं गायत्र, प्र सम्राज चर्षणीना सूक्त गायत्रं तत्र उत्तमामुद्धरेत्, सुरूपकृत्नुमूतये सूक्तं गायत्रं, आ त्वेता नि षीदत इति सूक्तं गायत्रं, युञ्जन्ति ब्रध्नमरुषं इति सूक्त गायत्रं, एन्द्रसानसिं रयिं इति सूक्तं गायत्र, इन्द्रेहि मत्स्यन्धसः इति सूक्तं गायत्रं, य आनयत्परावतः इति सूक्त गायत्रं अत्र उत्तमास्तिस्र उद्धरेत्, रेवतीर्नः सधमादः इति तृचः गायत्रः । अत्र १३० गायत्र्यः उष्णिक्त्वेन संपादिताः सत्यः ११४ उष्णिहः संपद्यन्ते, स्तुतःशिष्टा उष्णिहः १२६, इति औष्णिही तृचाशीतिः (८० × ३ = २४०) संपद्यते । तदन्ते सूददोहाः । ऐआ. ५।१।१।१-२.

कद्वन्तः प्रगाथाः अहरहः शस्येषु अव्यक्तया मकारेकतारम्भहेतुत्वात् आरम्भणीयाः । कस्तमिन्द्र त्वावसु, कन्न यो अतमीना, कदून्वस्याकृतं इति । २९।५।१-४.

कन्यादानं आत्रेयः उदमयः अङ्गराजपुरोहितः दशसहस्राणि निष्ककण्ठीः आत्रेयन्याः अदात् । ३९।८।६.

कपालनाशे (इरवल्यास) प्रायश्चित्तं 'आश्विनी इष्टिः' इत्यत्र द्र० । ३२।८।२.

कयाशुभीय सूक्तं पञ्चदशर्चं कया शुभा सवयसः सनीळाः इति । इदमेव सज्ञानसूक्तं नाम, इन्द्रोऽगस्त्यो मरुतस्ते समजानत (तेषां एतेन ऐकमत्यमभूत्), संतानिसूक्तं इदमेव सतानकरत्वात्, आयुष्यसूक्तं चेद आयुष्करत्वात् । द्वादशाहे छन्दोमप्रथमेऽहनि मरुत्वतीये शस्त्रे इदमुपास्य सूक्तम् । २३।१।१३-१६.

करम्भः सवनीयपुरोडाशेषु द्वितीयं हविः । मन्थं संयुक्त करम्भः इत्याचक्षते । व्रीहियवाना सक्तवः मन्थः सन् करम्भः । (पाण्यात किंवा दह्यात कालविलेले भाताच्या लाह्यांचे पीठ) ८।५, ८।६।१। तस्य याज्या 'पूषण्वान् करम्भमस्तु' इति । ८।६।५.

कलि शयानो भवति । ३३।३।४ (भेसावधपणें झोपा काढणें म्हणजे कलि).

कवषस्य ऐलूषस्य आख्यायिका अपोनप्त्रीयसूक्तप्रशंसार्था । ऋषयो वै सरस्वत्या सत्रमासत । ते कवषमैलूषं सोमादनयन् दास्याः पुत्रः कितवोऽब्राह्मणः, कथं नो मध्येऽदीक्षिष्टेति, त बहिर्धन्वोदवहन् अत्रैनं पिपासा हन्तु, सरस्वत्या उदकं मा पादिति । स बहिर्धन्व उदूळ्हः पिपासया वित्त एतदपोनप्त्रीयमपश्यत् प्र देवत्रा ब्रह्मणे गातुरेतु इति । तेनापां प्रियं धामोपागच्छत् । तमापोऽनूदायन् तं सरस्वती समन्तं पर्यधावत् । तस्माद्धाप्येतर्हि परिसारकमित्याचक्षते यदेनं सरस्वती समन्तं परिससार । ते वा ऋषयोऽब्रुवन् विदुर्वा इमं देवाः, उपेमं ह्वयामहे इति तथेति, तमुपाह्वयन्त । ८।१।१-४.

कश्यपगोत्रजब्राम्हणरहितं यज्ञं जनमेजयश्चके । ३५।१।२.

काण्डवीणाः पत्न्यो वादयन्ते महाव्रते । ऐआ. ५।५।१३.

काम्येन नित्यसिद्धिः इति मीमांसकाना डिण्डिमः ।

१।२।१६ सायणः ।

कारव्याः नाम ऋचः कुन्तापसूक्ते चतस्रः । ताः पच्छः शस्तव्या., तासु निनर्दः । इन्द्रः कारुमबूबुधत् इत्याद्याः। ३०।६।१६–१८.

काल उपसदां अग्निष्टोमे । दिनत्रये सुपूर्वाह्ने स्व-पराह्ने ।४।६।७.

कालः दीक्षणीयायाः आमावास्येन वा हविषेष्ट्वा पौर्णमासेन वा तस्मिन्नेव हविषि तस्मिन् बर्हिषि दीक्षेत (तस्मिन्नेव दिने इत्यर्थः)। सा एका दीक्षा (एकः प्रकारः) । सोमपूर्वकमेवाधान इति द्वितीयः प्रकारः । १।१।१२.

कालः द्वादशाहस्य । शैशिरयोर्मासयोर्दीक्षेत। १९।४।१–३ । आपूर्यमाणपक्षेषु यजन्ते । १९।५।८.

काल. प्रातरनुवाकस्य । महति रात्र्यै, पुरा वाचः प्रवदितोः, पुरा शकुनिवादात्, अध्वर्युणा उपाकृते । ७।५।८–१५.

किंपुरुषः अमेध्यः अभक्ष्यः ।६।८।६.

किरिशः नाम राजा । तस्य पुत्रः सुत्वन्। स च सुत्वा भार्गायणः भर्गस्य गोत्रापत्यम् । ४०।५।१८.

कीकसाः = पार्श्वे स्थिता मांसखण्डा. । ३१।१।२ सायणः ।

कीर्तिकामस्य महाव्रते आज्यशस्त्रं, अबोध्यग्नि समिधा इति द्वादशर्चम् । ऐआ १।१।१५.

कुन्तापसूक्तं त्रिंशदृचं षष्ठेऽहनि ब्राह्मणाच्छंसिशिल्पे वृषाकपेरुत्तरम् । तत्रेतिहासः, " छन्दसा वै षष्ठेनाहा आप्ताना रसोऽत्यनेदत् (अतिक्रम्यागच्छत्) स प्रजापतिरबिभेत् पराङयं रसो लोकान् अत्येष्यतीति, त परस्ताच्छन्दोभिः पर्यगृह्णात्, नाराशंस्या गायत्र्यः, रैभ्या त्रिष्टुभः, पारिक्षित्या जगत्यः, कारव्यया अनुष्टुभः, तत् पुनश्छन्दःसु रसमदधात् " इति । ३०।६।१-२। नाराशंसीः शंसति इद जना उपश्रुत इत्याद्यास्तिस्र. । ३-६ । रैभीः शंसति, वच्यस्व रेभ वच्यस्व इत्याद्या स्तिस्र । ७-९ । पारिक्षितीः शंसति, राज्ञो विश्वजनीनस्य इत्याद्याश्चतस्रः ।१०-१५। कारव्याः शंसति, इन्द्रः कारुमबूबुधत् इत्याद्याश्चतस्रः । नाराशंस्यादिषु कारव्यान्तासु न्यूङ्खो नास्ति । निनर्दस्तु कर्तव्यः । १६-१८ । दिशां क्लृप्तीः शंसति, यः सभेयो विदथ्यः इत्याद्याः पञ्च. ता अर्धर्चशः शंसति । १९-२२ । जनकल्याः शंसति, योऽनाक्ताक्षः इत्याद्याः षट् अर्धर्चशः शंसति । २३-२४ । इन्द्रगाथाः शंसति, यदिन्द्रादो दाशराज्ञे इत्याद्याः पञ्च, अर्धर्चशः शंसति । दिशां क्लृप्त्यादिषु न्यूङ्खनिनर्दौ न स्तः । २५-२६.

कुम्ब्या = आचारशिक्षणरूपा ऋक् । ब्रह्मचार्यसि अपोऽशान । कर्म कुरु दिवा मा स्वाप्सीः इत्यादिः । ऐआ. २।२८।८ सायणः

कुष्ठाः = कोणाः । ऐआ ५।३।८ सायणः ।

कुहूः = या उत्तरा अमावास्या सा (सा नष्टेन्दुकला कुहूः इत्यमरः)। ३२।९।३.

कूर्चान् शौनकाः समारोहन्ति ब्रह्मा च महाव्रते दर्भासनानि । ऐआ. ५।४।१६.

कृतं संपद्यते चरन्, चरैव । ३३।३।४.

कृन्तत्रं कृन्तन छेदः । २३।१।१३.

कृष्णाजिनं दीक्षितसंस्कारः । उन्मुच्य कृष्णाजिनमवभृथमभ्यवैति । १।३।१७-१८.

कौपारवः = कुपारोः कुषारवस्य वा पुत्रः मैत्रेयो महर्षिः परिमरमन्त्रज्ञानवान् आसीत् । ४०।५।१८.

क्रम. । संहितापदक्रमोपासनाः । ऐआ. ३।१ ६.

क्रयः सोमस्य प्राच्यां दिशि अग्निष्टोमे । ३।१।१.

क्लोमा = हृदयपार्श्ववर्ती मांसखण्डः। ३१।१।२ सायणः ।

क्षत्र नाम मानसोत्साहरूप शौर्यम् । ४०।१।४ सायणः ।

क्षत्रिययज्ञ. उक्थ्यसंस्थ एव पञ्चदशस्तोम इति के चित् । वस्तुतस्तु ज्योतिष्टोमे एवाग्निष्टोमः स्यात् । तस्य चतुर्विंशति स्तुतशस्त्राणि भवन्ति। २६।४।२-६.

क्षत्रिययज्ञे विशेषः । देवयजनयाचनं आदित्यं प्रत्येव । दीक्षादिने पूर्वाह्णे उद्यन्तमादित्यमुपतिष्ठेत ' इद श्रेष्ठ ज्योतिषां ज्योतिरुत्तमं० ' ऋक्, ' देव सवितर्देवयजन मे देहि ' इति यजुश्च । ३४।२।१-२.

इष्टापूर्तस्यापरिज्यानि नाम होम पुरस्ताद्दीक्षाया चतुर्गृहीतमाज्य आहवनीये ' पुनर्न इन्द्रो मघवा ददातु ब्रह्म पुनरिष्ट पूर्तंदात् स्वाहा ' इति । ३४ ३।१ २ । अथ अग्नन्याया समिद्यजुषामुपरिष्टात् ' पुनर्नो अग्निर्जातवेदा ददातु क्षत्र पुनरिष्ट पूर्त दात् स्वाहा ' इति । ३ ४ । अथवा ' ब्रह्म प्रपद्ये ब्रह्म मा क्षत्राद् गोपा यतु ब्रह्मणे स्वाहा ' इति पूर्वहोममन्त्र , ' क्षत्र प्रपद्ये मा ब्रह्मणो गोपायतु क्षत्राय स्वाहा ' इत्युत्तरहोममन्त्र , ३४।४।१ ७ । आहवनीयोपस्थान पूर्वहोमादनन्तर ' नेन्द्राद्देवताया एमि न त्रिष्टुभश्छन्दसः ' इत्यादिना । ३४।५।१ ४ । उत्तरहोमादनन्तर नामदेवताया एमि न गायत्र्याश्छन्दस ' इत्यादिना । ३४।६।१ ४ । दीक्षितत्वावेदनं, ' अदीक्षिष्टाय ब्राह्मणोऽसौ अमुष्य पुत्र ' इत्यादिर्ब्राह्मणमन्त्र एव । ब्राह्मणप्रवरापेक्षाया तु पुरोहितस्यार्षेयेण ३४।७।१-४ । यजमानभाग दीक्षणीयादिषु ब्रह्मणे परिहृत्य, अग्नौ हैके जुहति ' प्रजापतेर्विभान्नाम लोकस्तस्मिंस्त्वा दधामि सह यज मानेन स्वाहा' इति । तत्तथा न कुर्यात् । ३४।८।१ ६ । फलचमस । न्यग्रोधस्यावरोधा फलानि चौदुम्बराणि आश्वत्थानि प्लाक्षाणि च अभिषुणुयात् । क्षत्रियस्य सोऽय फलभक्ष, न सोमभक्ष. । ३५।१ ५, ३५।६।१-३ । फलचमसस्य प्रयोग । सोमक्रयात् प्राक् न्यग्रोधावरोहान् औदुम्बराश्वत्थप्लाक्षफलानि क्रयेण सपादनीयानि । सोमाभिषव जात न्यग्रोधादि द्रव्य द्वेधा विभज्य एक भाग मध्यदिनाय ,अवस्थाप्य अपर भाग अभिषुणुयात् । ३५।६।४ । सोमचमसोन्नयन कृत्वा फलचमसमुन्नयेत् । तस्मिन् द्वे दर्भतरुणे प्रास्ते स्याताम् । वषट्कृते तयोरेक अन्त परिधि प्रास्येत् आ दधिका वणा ' इति ऋचा सस्वाहाकारया । सोमचमसाहरण काले यजमानचमसमाहरेत्, भक्षणार्थे सोमचमसोद्ग्रहण काले फलचमसमुद्गृह्णीयात् । इळामुपहूय यदा होता सोमचमस भक्षयेत् तदा यजमान सोमचमस भक्षयेत् । भक्षमन्त्रश्च ' यदत्र शिष्ट रसिन सुतस्य ' इति ब्राह्मणे पठित । ३५।७।१ ४ । आत्मस्पर्श भक्षणोत्तर श न पधि हृदे पीत प्राण आयुर्जीवसे सोम तारी. ' इति । ५। फलचमसाप्यायन मन्त्रद्वयेन 'आप्यायस्व समेतु ते ' ' स ते पयासि समुयन्तु वाजा ' इति ।७। आच्छादन प्रक्षम्यन सोमचमसवत् । ३५ । ८ । १ । अथ नाराशसस्य फलचमसस्य भक्षण 'नराशसपीतस्य देव सोम मतिविद ऊमै पितृभिर्भक्षितस्य भक्षयामि ' इति मन्त्रेण प्रात सवने । ' नराशसपीतस्य० ऊर्वै पितृभिर्भक्षितस्य भक्षयामि' इति माध्यदिने । नराशसपीतस्य० काव्यै. पितृभिर्०' इति तृतीयसवने । ३५।८।१। आत्मस्पर्श आप्यायन च पूर्ववत् । माध्यदिने· तृतीयसवने च प्रात सवनवत् सोमचमसावृता च । ५ ६ । स्तोत्रशस्त्रेषु विशेष, प्रात सवन तृतीय सवन च प्राकृतमेव । माध्यदिने माध्यदिन पवमान आभिजिदादिवत् । पवमान रथतरम् । मरुत्वतीयं शस्त्रं, प्रतिपत् ' आ त्वा रथ यथोतये ' तृच , अनुचर स्तृच ' इद वसो सुतमन्ध ' । बृहत् पृष्ठ, इन्द्रनिहव प्रगाथ ब्राह्मणस्पत्य प्रगाथ प्रकृतिवत् । धाय्या प्रकृतिवत्, मरुत्वतीय प्रगाथ ' प्र व इन्द्राय बृहते ' ऐवा हिक । ३६।१।१ ८ । निविद्धान सूक्त ' जनिष्ठा उग्र सहसे ' इत्येकादशर्चं गौरिवीतम् । निष्केवल्यं शस्त्र प्रतिपत् ' त्वामिद्धि हवामहे,' अनुचर ' अभि त्वा शूर', धाय्या ' यद्वावान ', सामप्रगाथ ' उभय शृणवश्च न '।२२।२।१-५। निविद्धान सूक्त 'तमु ष्टुहि य इति पञ्चदशर्चं भारद्वाज, बृहत् पृष्ठम् । ३६।३। १ ५ । होत्रकाणा शस्त्राणि प्रकृतिवत् । ३६।४।१। आभिषेको यज्ञाङ्ग । ३७।१ ७.

क्षत्रियस्य क्षत्रिय यजमान स्वान्यायुधानि निधाय ब्रह्मण आयुधानि स्वीकरोति । ३४।१।१९.

क्षत्रियस्य सर्वत्र बृहत् पृष्ठम् । ३६।३।५.

क्षत्रियस्य अग्निप्रणयनीयासु त्रिष्टुप् प्रथमा । ५।२।४ ९.

क्षत्रियस्य अभिषेकान्ताग्निष्टोमयागोदाहरण जन मेजय पारिक्षित. । ३७।७।७ ९.

क्षत्रियस्य आयुधानि अश्वरथ, कवच इषुधन्व च । ३४।१।२.

क्षत्रियस्य सान्नाय्यकस्य यत मेध्यत्वम् ।

३३।२।७-८.

क्षत्रियस्य सोमभक्षः दधिभक्षः अद्भक्षो वा नेष्ट, किंतु फल्चसमभक्ष एव। ३५।३।१-४.

क्षत्रियस्य सृष्टिः प्रजापतिर्यज्ञमसृजत, यज्ञं सृष्टमनु ब्रह्मक्षत्रे असृज्येताम्। ३४।१।१.

क्षत्रियात् ब्राह्मणो भूयात्। ३३।३।८.

क्षुत्पिपासयोः सर्वेष्वेव इन्द्रियेषु भागो भवति। ऐआ. २।२२।५.

क्षुद्रसूक्ताः मण्डलर्षयः प्राणदृष्ट्या उपास्याः। ऐआ. ११९।१-६.

खरमवेक्षते प्रवर्ग्ये ' गन्धर्व इत्था पदमस्य ' इति, होता। ४।५।३.

खरे महावीरस्य सादने अनुवचनीया ऋक् ' सद्दोदस्व महाँ असि ' इति। ४।२।५.

खादिरः यूपः स्वर्गकामस्य। ६।१।५.

गण्डूपदस्य सृष्टिः (गाडूळ-गाडवळ)। सोमाहरणकाले गायत्र्याः सोमपालेन नखच्छेदे कृते यानि स्नावानि, ते गण्डूपदा अभवन्। १३।२।१.

गतश्रियः प्रजातिकामस्य देविकाहवींषि देवीनां हवींषि च समुच्चयेन कर्तव्यानि अनुबन्ध्यापुरोडाशोत्तरम्। १५।४।६, ९.

गर्दभस्य सृष्टिः, प्रजापते. रेतसः प्रदीप्तस्य भस्मनः सकाशात्। १३।१०।२.

गवयः अमेध्यः अभक्ष्यः। ६।८।१.

गवयस्य सृष्टिः गर्दभस्येव। १३।१०।२.

गवामयन सत्र षट्यधिकशतत्रयदिनसाध्यम्। प्रतिदिनं च अग्निष्टोम-उक्थ्य-षोडशी-अतिरात्राणां संस्थानामन्यतमया युक्तः सोमयाग एवानुष्ठीयन। तत्र प्रथमे दिवसे अतिरात्रः, द्वितीये चतुर्विंशस्तोमः उक्थ्यः १७।६-८। अतिरात्रः अन्तिमः।१७।८।३-८। अभिप्लवः षडह। १८।१। षडहाः पञ्च। १८।२। स्वरविधिः १८।३।१-४। अभिप्लवषडहाः, पृष्ठ्यषडहाः १८।३।८। विषुवान्। १८।४-८। विषुवतः अवस्तात् परस्ताच्च दशाहद्वयम्।१८।४।४। स्वरसामानः त्र्यस्त्रयः इति पद्। १८।४५। अभिजित् सर्वस्तोमः, विश्वजित् सर्वपृष्ठ्यः। १८।५।२। महाव्रतं १८।८।८।१.

गाथानां प्रतिगरः ' एवं तथा ' इति, शौनःशेपाख्याने राजसूये। ३३।६।१२-१३.

गाथा सर्वलोकस्य प्रसिद्धार्थप्रतिपादिका ऋक्, ' प्रातःप्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्र ' इत्यादिः। ऐआ. २।१८।८ सायण.।

गायत्र प्रातःसवन अग्निष्टोमे।२६।२।८.

गायत्रतृतीयसवनः छन्दोमत्र्यहः। २३।२।१२, १७; ४।१४, १९. २४।२।१५, २१.

गायत्री अनुष्टुभमसृजत। १९।६।६.

गायत्री अष्टाक्षरा प्रातःसवनमुदयच्छत्। १३।४। १-२.

गायत्रीकारं शंसनं नाम पादद्वये अष्टाक्षरे अवसाय अष्टाक्षरतृतीयपादे प्रणवः इति। ऐआ. ५।१२।२ सायणः।

गायत्री छन्दः प्रथमेऽहनि षडहे। २०।१।१-२.

गायत्री तृचाशीतिः महाव्रते निष्केवल्ये शस्त्रे. गायत्रीं तृचाशीतिं शंसति, अथ सूददोहाः। ऐआ १।१९।१। महाँ इन्द्रो य ओजसा इति सूक्त, तत्रान्तिम तृचमुद्धरेत्, पुरोळाश नो अन्धसः इति तृचः, इद वसो सुतमन्धः इति सूक्त, तत्र प्रथम अन्तिमं च तृचमुद्धरेत्, तत्रैव स्वादवः सोमाः इति ऋचमुद्धृत्य, तत्स्थाने 'न ह्यन्य बळाकर' इत्येता प्रत्यवदधाति, शग्धो नु शतक्रतुः इति ऋक्, पान्तमावो इति सूक्त तत्रान्त्यामुद्धरेत्, प्रकृतान्यृजीषिणः इति सूक्तं, आ प्र द्रव इति सूक्तम्। एव २४० गायत्र्यः तृचाना अशीतिः। ततः सूददोहाः पठनीया। ऐआ. ५।११।२ सायणः।

गायत्रीषु उष्णिक्छन्दःसंपादनं महाव्रते निष्केवल्ये शस्त्रे औष्णिहतृचाशीतौ। यथा, सप्त गायत्र्यो मिलित्वा षट् उष्णिहः संपद्यन्ते। सप्तम्या गायत्र्या अक्षरचतुष्काणि षट् भवन्ति। तेषु एकैकं अक्षरचतुष्कं पूर्वासु षट्सु गायत्रीषु प्रत्येकमन्ते योजनीयं, एवं सर्वेष्वपि गायत्रीसप्तकेषु उष्णिक्त्वं संपद्यते। ऐआ.५।११।२ सायणः।

गायत्रीषु निविदं दधाति। २१।२।५; २२।१।१४; ३।५; ८।१३.

गायत्रीसोमाहरणादिमाहात्म्यशनरान् दानवाधम्। १३ । ४ । ६.

गायत्र्यः द्वितीयस्य त्र्यहस्य माध्यंदिन वहन्ति। २२।७।१३; ८।६.

गायत्र्यौ तृतीयसवने वैश्वदेवस्य प्रतिपदः तृचस्य उत्तरे द्वे ऋचौ, अनुचरश्च सर्वः गायत्रः। १३।४।३.

गायत्र्यौ माध्यंदिने मरुत्वतीयस्य प्रतिपदः उत्तरे द्वे ऋचौ, अनुचरश्च सर्वः गायत्रः। १३।४।२.

गार्हपत्याहवनीयौ यदि मिथः संसृज्येयातां तदा प्रायश्चित्तं, अग्नये वीतयेऽष्टाकपालं निर्वपेत्। 'अग्न आ याहि वीतये, यो अग्निं देववीतये' इति याज्यानुवाक्ये। आहुतिं वा आहवनीये जुहुयात् अग्नये वीतये स्वाहा इति। ३२।५।२.

गार्हपत्ये उपशान्ते, आहवनीये च सति सर्वमाहवनीयं भस्मसहितं पात्रे समोप्य. गार्हपत्यायतने निधाय अथ प्राञ्चमाहवनीयमुद्धरेत्। ३२।४।८.

गर्णं आर्त्विज्यं तत्र प्रायश्चित्तं च 'आर्त्विज्य निविध' इत्यत्र द्र०। १५।२।१ १०.

गुग्गुलु प्रसिद्ध धूपसाधनम्। ५।२।२८ सायणः।

गृत्समदः मण्डलर्षिः प्राणदृष्ट्या उपास्यः। ऐआ २।१।१-६; १०।१ ५.

गृहपतेः भार्यायाः यो व्रतप्रदः, तस्य सव्यौ पादौ ओष्ठार्धं च पशुभागः। गृहपतेर्यो व्रतपद', तस्य तु दक्षिणौ पादौ ओष्ठ.र्धं च पशुभागः। ३१।१।२.

गृहपतेः सद च अनूकं च (पृष्ठवंशश्च वरितश्च शास्ना वा) पशुभागः। ३१।१।२.

गोः यमलजनने प्रायश्चित्तं 'यमलजनने' इति इन्द्रे द्र०। ३२।८।८.

गोः सृष्टिः। देवताः ईश्वरमब्रुवन् 'आयतनं नः प्रजानीहि यस्मिन् प्रतिष्ठिता अन्नमदामेति। ताभ्यो गामानयत्। ता अब्रुवन् न वै नोऽयं अलं' इति। ऐआ २।२२.

गौः देवता पञ्चमेऽहनि षडहे। २२।२।१-५.

गौः मेध्यः। ६।८।२.

गौरमृगः नाम पशुः यस्य शृङ्गे अपि लोमशे। सः अमेध्यः अभक्ष्यः। ६।८।६। स च प्रजापतेः रेतसः प्रदीप्तस्य भस्मनः सकाशात् अजायत। १३।१०।२.

गौरिवीतं षोडशि साम विद्यते 'अभि प्र गोपतिं गिरा' इत्यस्या ऋचि उत्पन्नम्। १६।२।१, ४.

ग्रहग्रहणं द्विदेवत्यानां एकेनैव पात्रेण। यागस्तु पात्रद्वयेन। ९।३।१.

ग्रहाः प्रातःसवने नव गृह्यन्ते अग्निष्टोमे 'नव प्रातर्ग्रहा गृह्यन्ते'- धाराग्रहाः। ११।१।१.

ग्रहाणां द्विदेवत्यानां प्रतिग्रहणे होतुर्मन्त्रास्त एव, यैरध्वर्युः प्रयच्छति 'मयि वसुः पुरो वसुः' इत्यादयः ९।३।२.

ग्रहोक्थं पवमानोक्थं चेति द्वेधा उक्थम्। यत् पवमानस्तोत्रार्थं, तत् पवमानोक्थम्। प्रातःसवने प्रथमं होतुराज्य, माध्यदिने मरुत्वतीयं होतुः पृष्ठं, तृतीयसवने वैश्वदेव होतुः शस्त्र इति पवमानोक्थानि। माध्यंदिने होत्रकाणां चत्वारि शस्त्राणि ग्रहोक्थानि। ३६।१।४.

ग्रावस्तुत् अग्निष्टोमे माध्यंदिने ग्रावस्तोत्रमन्वाह। तच्च अर्बुदस्य काद्रवेयस्य ऋषेः। २६।१।१-३। तत्र उष्णीषेण ग्रावस्तुतः नेत्रवेष्टन।४-७। ग्रावस्तोत्रे ऋचः शतं वा त्रयस्त्रिंशत् वा, अपरामितिः इति मुख्यः पक्षः।२६।२।-५। शंसन च अक्षरशः, चतुरक्षरश', प छ, अर्धर्चशः, ऋक्शः इति पक्षाः। तत्र अर्धर्चशः इति सिद्धान्तः। ६-७। गायत्रीभिश्च जगतीभिश्च।८-९। सर्पेभ्यो नाम्नि।१०.

ग्रावस्तुतः स्कन्ध्या मणिकाः तिलश्च कीकसाः पशुभागः ३१।१।२.

ग्रावस्तोत्रीयं 'अभि त्वा देव सवित.' इयं ऋक् त्रिः, युञ्जते मनः इति ऋक्, आ तू न इन्द्र इति ऋक्, मा चिदन्यत् इति ऋक्, प्रैते वदन्तु (१-१३), आव ऋञ्जस ऊर्जो (१-८) प्र वो ग्रावाणः (१-४)। ततः यावदभिषुतः सोमो भवति, यावद् वा ग्रहा गृहीता भवन्ति, तावत् स्वादिष्ठया मदिष्ठया इत्यादिपावमानीभिरभिष्टुयात्। सुते 'अध्वरे अधि' इति परिधानीया। के चित्तु 'प्रैते वदन्ति' इति चतुर्दशर्चं अर्बुदसूक्तमेव

ग्रावस्तोत्रीयं, 'प्र वो ग्रावाणः' इति चतुर्ऋचमेवान्ये, गाणगारिमते तु 'आप्यायस्व समेतु ते' इत्यादि अन्यदेव ग्रावस्तोत्रम्। प्रयोगः।

ग्रीवाः महाव्रते पक्ष्याकारत्वेन कल्पितस्य निष्केवल्यशस्त्रस्य। 'ग्रीवा यस्येदमारजः' इति तृचः शाखान्तरीयः पञ्चमे शौनकेन पठितः, तदन्ते सूददोहा। ग्रीवा अर्धर्चशः शंसनीयाः। ऐआ १।१७।२–३,; ५।७।१–५,१४.

घर्मतन्वः नाम 'प्रथश्च यस्य सप्रथश्च नाम' इति तृचः।४।४।२–३.

घर्मसभरणविधिः। ४।१।१–२। प्रवर्ग्यानुष्ठाने अनुज्ञापनमन्त्रः 'ब्रह्मन् प्रवर्ग्येण प्रचरिष्यामः' इति। प्रैषमन्त्रः होतरभिष्टुहि इति। ३.

घर्मस्य स्विष्टकृत्त्वमि तस्यानुवषट्कारेण सिद्धिः। ४।५।६.

घृतयागस्य द्वितीयस्य याज्या वैष्णवी 'उरु विष्णो विक्रमस्व' इति। अग्निष्टोमे माध्यंदिने वैश्वदेवोत्तर घृतयागौ द्वौ, मध्ये सौम्यश्चरुश्च भवति।१३।८।१.

घृतयागस्य प्रथमस्य याज्या आग्नेयी 'घृताहवनो घृतपृष्ठो अग्निः' इति। १३।८।१.

घृते चरुः प्रतिष्ठाकामस्य दीक्षणीयायाम्। १।१।८–११.

चक्षुर्वैसत्यं, 'एतद्ध्येव मनुष्येषु सत्यं निहितं यच्चक्षुः'। ११६।१०–११.

चतुर्थमहः आनुष्टुभ पृष्ठ्ये षडहे। २१।४।६.

चतुर्थेऽहनि न्यूङ्खः निष्केवल्ये शस्त्रे 'इह श्रुत इन्द्रः परिमन्' इति सूक्ते, माध्यंदिनीयत्वात् प्रथमे पादे (२१।३।१२) पृष्ठ्ये षडहे। २१।५।१.

चतुर्थेऽहनि न्यूङ्खः प्रातरनुवाके प्रथमे पादे, आज्यशस्त्रे उत्तमार्धे तृतीये पादे, माध्यंदिने प्रथमे पादे पृष्ठ्ये षडहे। २१।२।१०-१२.

चतुर्थेऽहनि पृष्ठ्यषडहस्य 'प ते गिरो अति मृण्व' इति चाम्नः, 'प्र वो महे' इति मित्रः इति मत्र रिपाव. अन्तूहत्वाः अहीनसूक्तेषु आवापिकाः 'यज्ञा मह इन्द्र' इत्यादयः सन्त वैमदीरां आवापिकाः। २९।३।९.

चतुर्थेऽहनि पृष्ठ्ये षडहे वाग् देवता, एकविंशः स्तोमः, वैराजं साम, अनुष्टुप् छन्दः, आज्यशस्त्रं, प्रउग, मरुत्वतीयं, निष्केवल्यं।२१।४।१-१४। वैश्वदेवं आग्निमारुतम्। २१।५।१-१७.

चतुर्विंशस्तोमस्य विष्टुतिः। १७।६।१ सायणः।

चतुर्विंशं नाम गवामयनस्य द्वितीयमहः आरम्भणीयम्। उक्थ्यो वा अग्निष्टोमो वा १७।६-८। चतुर्विंशः स्तोमः।१७।६।३। उक्थ्यस्य पञ्चदश स्तोत्राणि, पञ्चदश शस्त्राणि, स्तोत्रियाः त्रीणि शतानि षष्टिश्च. अग्निष्टोमः स्यादित्याहुः, अष्टचत्वारिंशाः त्रयः पवमानाः चतुर्विंशानि इतराणि स्तोत्राणि। उक्थ्य एव स्यात्। बृहद्रथंतरे सामनी विकल्पेन। निष्केवल्यशस्त्रे 'तदिदास भुवनेषु' इति बृहद्दिव सूक्तं शस्तव्यम्।

चतुर्विंशे अहीनपरिधानीयाभिः परिदध्युः। तत्र मैत्रावरुणः ऐकाहिकाभिरेव सवनद्वये (१–२) परिदध्यात्, ब्राह्मणाच्छंसी प्रातःसवने अहीनगताभिः माध्यंदिने च ऐकाहिकाभिः परिदध्यात्, अच्छावाकः अहीनगताभिरेव परिदध्यात्। २९।७।७-९.

चतुर्विंशे अहीनसूक्तानि माध्यंदिने होत्रकाणाम्। २९।२।८.

चतुर्विंशेऽहनि महाव्रते च प्रातःसवने मैत्रावरुणस्य शस्त्रं 'ता नः शक्तं पार्थिवस्य', ब्राह्मणाच्छंसिनः पुरुपकृत्नुमूतये, अच्छावाकस्य 'आ सु ते सिञ्चत श्रियम्।' ऐआ. ५।१।५ सायणः।

चतुष्टोमपदस्य निर्वचनं, वसवो रुद्रा आदित्या विश्वेदेवाः इति चतुर्धा देवाः चतुर्भिः स्तोमैः त्रिवृत्पञ्चदशसप्तदशैकविंशैः अस्तुवन् तस्माच्चतुःस्तोमः, स एव चतुष्टोमः। १४।५।२.

चतुर्होतृमन्त्रः .अविवाक्ये दशमेऽहनि. तेषा निविदः सुगार्हपत्याऽऽऽन्, चित्तिपात्रमार्गाऽऽऽन्' इत्यादीनि. दशहोतानि. तच्छंसनविधिश्च 'अविवाक्यं दशम' इत्यत्र द्र०। २४।६।३–१२. २४।३–६.

चत्वारः पुरुषा इति बाध्वः ऋषिः 'शरीरपुरुषः, छन्दः पुरुषः, वेदपुरुषः' महापुरुषः इति। ऐआ. ३।१.

चन्द्रमसो वै वृष्टिर्जायते । ४०।५।१५.

चन्द्रमा आदित्याज्जायते । ४०।५।१४.

चन्द्रमा वै अमावास्यामनुप्रविशति सोऽन्तर्धीयते । ४०।५।८.

चमस औदुम्बर । तत्र दधि, मधु, सर्पि, आतपवर्ष्या आप, शष्पाणि, तोक्मानि, सुरा, दूर्वा, इत्यष्टौ द्रव्याणि प्रक्षेप्याणि यशाद्राजाभिषेकसमारेषु । ३७।१।३.

चमस औदुम्बर तत्र वानस्पत्यानि फलानि, ओषधानि तोक्मानि, दधि, मधु, सर्पि, आतपवर्ष्या आप, इति प्रक्षेप्याणि ऐन्द्रमहाभिषेकसमारोपु । ३९।३।१.

चमस होमार्थे भक्षणार्थे च सोमस्य पात्र दीर्घ-चतुरस्र समुष्टिकम् । ३५।६।४ सायण ।

चयनानुष्ठाननिषेध पितृआचार्येतरयागे निष्केव ल्योपासकस्य । ऐआ. ३।१०।१–६.

चराति चरतो भग (प्राप्नर्थ)। ३३।३।३

चरु घृते प्रतिष्ठाकामस्य अग्निष्टोमे दीक्षणीयायाम् । १।१।८–११

चरैव । 'नानाश्रान्ताय श्रीरस्ति इति रोहित शुश्रुम । पापो नृषद् (परगृहे वर्तमान अलस) वर (अपि) जन, इन्द्र इत् चरत सखा ॥ चरैव' । ३३।३।१. 'पुष्पिण्यश्चरतो जङ्घे, भूष्णुरात्मा फले ग्रहि । शेरे (शेरते) ऽस्य सर्वे पाप्मान श्रमेण प्रपथे हत. ॥ चरैव ।' २. 'आस्ते भग आसीनस्य ऊर्ध्व स्तिष्ठति तिष्ठतः । शेते निपद्यमानस्य चराति चरतो भग. ॥ चरैव'। ३ 'कलि शयानो भवति सञ्जिहानस्तु द्वापर । उत्तिष्ठस्त्रेता भवति कृत सपद्यते चरन् ॥ चरैव' । ५

चर्मवेधनं राजपुत्रेण महाव्रते । ऐआ ५।५।१३.

चातुर्मास्याना राजसूयोत्पन्नानामपि पृथक् प्रयोगो भवति । ऐआ ५।५।१ सायण .

चातुर्मास्येषु अग्निमन्थनम् । १४।२।६.

चित् एव आत्मा ब्रह्म । ऐआ २।२५.

चित्याग्ने उपस्थानम् । शिरस, प्रदक्षिणमग्नि निष्क्रम्य अग्रेण यूप पुरस्तात् प्राङ्मुखस्तिष्ठन् अग्नेः शिर उपतिष्ठते 'नमस्ते गायत्राय यस्ते शिर इति । ऐआ ५।२।२। तेनैव पथेत प्रत्येत्य दक्षिणमुदङ्मुख पक्ष नमस्ते राथतराय यस्ते दक्षिण पक्ष' इति । ५।२।३। अपरेणाग्निपुच्छमुपगम्य प्राङ्मुख उत्तर (पक्ष) 'नमस्ते बृहते यस्ते उत्तर पक्ष, इति । ५।२।४। पश्चात् प्राङ् पुच्छ 'नमस्ते भद्राय यस्ते पुच्छ य ते प्रतिष्ठा इति । ५।२।५ दक्षिणत पुच्छस्य आत्मान 'नमस्ते राजनाय यस्त आत्मा' इति । ५।२।६। इद महाव्रत माध्यदिने, होता ।

चित्याग्नेरुपस्थानानन्तर होतु सद प्रवेश. महाव्रते माध्यदिने । ऐआ ५।३।१.

छन्द पृष्ठ्ये षडहे प्रथमेऽहनि गायत्री २०।१।१–२, द्वितीये त्रिष्टुप् २०।३।१–२, तृतीये जगती २१।१।१–२, चतुर्थे अनुष्टुप् २१।४।१–२, पञ्चमे पङ्क्ति २२।१।१, षष्ठे अतिच्छन्दा २२।७।१.

छन्द पुरुष वर्णसमाम्नाय । तस्य रस अकार, अग्निमीले इत्यकारादित्वात् । ऐआ. ३।१।२,४.

छन्दासि गायत्री उष्णिक् अनुष्टुप् बृहती पङ्क्ति त्रिष्टुप् जगती इति सप्त पूर्वाणि, विराट् द्विपदा अति-छन्दा अन्यश्च किंचित् इति चत्वारि उत्तराणि । ऐआ ५।४।९ सायण ।

छन्दासि पृष्ठ्ये षडहे पृष्ठस्तोत्रसामाधाराणि क्रमेण गायत्री त्रिष्टुप् जगती अनुष्टुप् पङ्क्ति अतिच्छन्दा इति । १९।६।६ सायण ।

छन्दोगेभ्य वाण शततन्तु सस्कृत्य होता प्रयच्छति महाव्रते । ऐआ ५।४।१–७.

छन्दोमप्रथमेऽहनि आज्य शस्त्र २३।१।१–१० । प्रउग ११, । मरुत्वतीय १२–१९। निष्केवल्य २०–२९, २३।२।१–५ । वैश्वदेव २३।२।६–१२ । आग्निमारुतम् १३–१६। छन्दोमद्वितीयेऽहनि आज्य त्रैष्टुभ २३।३।६–७। प्रउग ८–९। मरुत्वतीय १०–२०। निष्केवल्य २१–२४, २३।४।१–७। वैश्वदेव ८–१४। आग्निमारुत १५–१९। छन्दोमतृतीयेऽहनि आज्य त्रैष्टुभ २४।१।५–८ प्रउग त्रैष्टुभ ९–१०

मरुत्वतीयं ११–१८। निष्केवल्यं २१-२२, २४।२-१–६। वैश्वदेवं ९–१५। आग्निमारुतं १६–२१.

छन्दोमाः त्रयः द्वादशाहे अष्टमनवमैकादशेषु अहःसु। प्रथमः चतुर्विंशः, द्वितीयः चतुश्चत्वारिंशः, तृतीयः अष्टाचत्वारिंशः । छन्दोभिः गायत्रीत्रिष्टुप्जगतीभिः स्वाक्षरसंख्याद्वारेण मीयन्ते परिछिद्यन्ते इति छन्दोमशब्दस्य व्युत्पत्तिः । २३।१।८, २४।१-२.

छन्दोविशेषः प्रातरनुवाके अग्निष्टोमे । आग्नेयानि उषस्यानि आश्विनानि च सप्तसप्त छन्दांसि, देवतास्तिस्रः, छन्दांसि सप्तछन्दसा क्रमश्चात्र गायत्री अनुष्टुप् त्रिष्टुप् बृहती उष्णिक् जगती पङ्क्तिः इति । ७।७।१२–१७ । अत्र व्यूढत्वेऽपि बृहतीमध्यकत्वात् अव्यूढत्वम् । ७।८।५.

जगती अतिच्छन्दसमसृजत । २९।६।६.

जगती छन्दः पृष्ठ्ये षडहे तृतीयेऽहनि । २१।१।१-३.

जगती मूलतः चतुरक्षरा, सोमाहरणप्रसङ्गेन एकाक्षरा अभूत् । सा पुनः गायत्र्या. त्रिष्टुभायाः संमेलनेन द्वादशाक्षरा सपन्ना । सा द्वादशाक्षरा जगती तृतीयं सवनमुदयच्छत् । १३।४।३.

जगतीषु निविदं दधाति । २३।१।१८; २।४; ३।१७; ४।४. २४।१।१८;२।७.

जगतीसहस्रं महाव्रते निष्केवल्ये शस्त्रे शंसनीय इत्येके । ऐआ. २।१७।३.

जगत्प्रातः सवनः द्वितीयः त्र्यहः व्यूढस्य पृष्ठ्यषडहस्य । २१।४।५.

जगत्प्रासङ्गाः । जगत्यः बह्व्यो यासु, ताः तृतीयसवनगता : प्रथितयाज्याः । २८।४।१५.

जगत्यो वै छन्दोमव्यहस्य मध्यंदिनं वहन्ति व्यूढत्वात् । २३।१।१८; ३।१७; ४।३. २४।१।१८.

जग्धं आर्त्विज्यं तत्र प्रायश्चित्तं च 'आर्त्विज्यं त्रिविधं' इत्यत्र द्र. । १५।२।१-१०.

जनकल्पा नाम मन्त्राः कुन्तापसूक्तेषु षट् 'योऽनाक्रान्तः' इत्यादयः, ते अर्धर्चशः शंसनीयाः । ३०।६।२१–२४.

जननाशौचं दशाहम् । यदा वै पशुर्निर्दशो भवति अथ स मेध्यो भवति । ३३।२।३.

जन्मत्रयं जीवस्य । पुरुषशरीरात् रेतोरूपेण स्त्रीशरीरे प्रवेशः प्रथमं जन्म, मातुः सकाशात् द्वितीयं, मृत्वा पुनर्जन्म तृतीयम् । ऐआ. २।१४.

जन्यानि सपत्नाः, प्रतिजन्यानि द्विषन्तो भ्रातृव्याः' ४०।३।३,११.

जपः पुरोहितस्य । यदा राजा पुरोहितं वृणीते, तदा 'अग्निर्वाव पुरोहितः पृथिवी पुरोधाता, वायुर्वाव पुरोहितः अन्तरिक्षं पुरोधाता, आदित्यो वाव पुरोहितः द्यौः पुरोधाता' इति । ४०।४१.

जपः होतुः पशौ अध्रिगुपाठानन्तर 'शमितारो यदत्र सुकृतं कृणवथास्मासु तत्, यद्दुष्कृतं अन्यत्र तत्' इति । ६।७।१२-१३.

जपः होतुः महाव्रते प्रस्तोत्रा प्रथमप्रतिगरस्य काले कथिते सति, 'सुपर्णोऽसि.' इति, उत्तमवीर्याणि च जपति, 'सं प्राणो वाचा' इत्यादि च जपति, आहूय 'वाक्' इति च जपति । ऐआ. ५।५।४-९.

जपः होतुः, व्याहृतिजपः महाव्रते प्रेङ्खं चालयति जपति, पुनश्चालयति । ऐआ. ५।४।८-१०.

जागतं वै तृतीयसवनम् । २८।४।१५; ७।१,५.

जातवेदसः आयतनं तृतीयसवनं आग्निमारुतशस्त्रे। १०।७।१०.

जातवेदस्यं सूक्तं आग्निमारुतशस्त्रे । अग्निष्टोमे अनुरूपोत्तरं, प्रतव्यसी नव्यसी जागतमन्त्या त्रिष्टुप् । १३।१२।१-२ । छन्दोमप्रथमेऽहनि 'दूतं वो विश्ववेदसं' गायत्रं अनिरुक्तम् । २३।२।१६ । छन्दोमद्वितीयेऽहनि 'अग्ने मृळ महाँ असि' गायत्रम् । २३।४।१८ । छन्दोमतृतीयेऽहनि 'प्राग्नये वाचमीरय' गायत्रम् । २४।२।१९ २१ । पृष्ठ्ये षडहे प्रथमेऽहनि 'प्रतव्यसीं नव्यसीम्' । २०।२।१४ । द्वितीयेऽहनि 'यज्ञेन वर्धत जात' जागतम् । २०।४।११ । तृतीयेऽहनि 'त्वमग्ने प्रथमो अङ्गिराः' जागतं त्रिष्टुभः । २१।२।१७ । चतुर्थेऽहनि 'अग्निं नरो दीधितिभिः' विराडस्त्रिष्टुमध्य । २१।५।१६–१७.

पञ्चमेऽहनि 'अग्निर्होता गृहपतिः' अतिच्छन्दाः तृचः। २२।३।१४। षष्ठेऽहनि 'स प्रत्नथा सहसा जायमानः' त्रैष्टुभं सूक्तम्। २०।८।८-१०.

जातवेदस्या ऋक् आग्निमारुतशस्त्रे एव, 'जातवेदसे सुनवाम' इति छन्दोमप्रथमे। २३।२।१५। छन्दोमद्वितीये। २३।४।१७। छन्दोमतृतीये। २४।२।१८। पृष्ठ्ये षडहे प्रथमेऽहनि। २०।२।१२-१३। द्वितीये २०।४।१०। तृतीये २१।२।१६। चतुर्थे २१।५।१५। पञ्चमे २२।३।१३। षष्ठे २२।१०।७.

जाया। 'तज्जाया जाया भवति यदस्यां जायते पुनः'। ३३।१।१०। सखा ह जाया। ३३।१।८। पतिर्जायां प्रविशति गर्भो भूत्वा।९। आभूतिरेषा भूतिः बीजमेतन्निधीयते १०। देवाश्चैतामृषयश्च तेजः समभरन् महत्। ११.

जाया बह्व्यः। तस्मादेकस्य बह्व्यो जाया भवन्ति नैकस्यै बहवः सह पतयः। १२।१२।१.

जीवति मृतशब्दश्रवणे प्रायश्चित्तं (स्वविषये)। 'अग्नये सुरभिमते अष्टाकपालं निर्वपेत्।' 'अग्निर्होता न्यषीदत्, साध्वीमकर्देववीतिं' इतियाज्यानुवाक्ये। आहुतिं वा आहवनीये जुहुयात् 'अग्नये सुरभिमते स्वाहा' इति। ३२।८।७

जीवरूपेण ब्रह्मणः शरीरे प्रवेशः। 'स एतमेव सीमानं (ब्रह्मरन्ध्रं) विदार्य एतया द्वारा प्रापद्यत। ऐआ. २।२३।७-८.

जीवस्य जन्मत्रयम्। 'जन्मत्रय जीवस्य' इत्यत्र द्र०। ऐआ. २।२४.

जीवो ब्रह्मैव नापरः। तद्य चिदेव। 'प्रज्ञानं ब्रह्म' ऐआ. २।२५।६०.

ज्योतिःष्टोमः चतुःसंस्थः अग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्रश्चेति। स च सार्धेन अध्यायचतुष्केन अभिहितः (ऐतरेयकब्राह्मणे)। अस्यैतास्वतस्रः संस्था आश्रित्यैव गवामयनं प्रवर्तते। १७।७।१ सायणः।

ज्योतिष्टोमे वामदेव्यसाम्नि तृतीयस्यामृचि प्रतिपादान्ते 'पु, रु, षः' इति अक्षरोपजनः कर्तव्यः। १५।२।१-१०.

तन्तुमती इष्टिः 'सूतकान्नभक्षणे प्रायश्चित्तं' इत्यत्र द्र० ३२।८।६.

तस्मादेकस्य बह्व्यो जाया भवन्ति, नैकस्यै बहवः सह पतयः। (परस्परैकमत्येन सह वर्तमाना न दृश्यन्ते इति सायणः) १२।१२।१.

तस्य य आत्मानमाविस्तरां वेद। ऐआ. २।१४।१.

तस्य (प्राणरूपस्य ईश्वरस्य) वाक् तन्तिः (दावन) नामानि दामानि। ऐआ. २।६।१.

तानूनपत्रम्। ते देवा अबिभयुः अस्माकं विप्रेमाणमनु इदमसुरा आ भविष्यन्ति इति (आमच्या आपसातील यादवीमुळें असुरांचें फावतें) ते व्युत्क्रम्य (एकान्तामध्यें पृथक् पृथक् सभा घेऊन) अमन्त्रयन्त। अग्निर्वसुभिरुदक्रामत्, इन्द्रो रुद्रैः, वरुण आदित्यैः, बृहस्पतिर्विश्वैर्देवैः। तेऽब्रुवन् हन्त या वै नः इमाः प्रियतमास्तन्वः ता वरुणस्य राज्ञो गृहे संनिदधामहै। ताभिरेव नः स न संगच्छातै, यो न एतदतिक्रामात् (जो कोणी एकीचा नियम मोडील त्याची प्रियतनू त्याला परत मिळणार नाहीं) य आलुलोभयिषात् (लोभानें लबाडी करून उपद्र्व्याप करील) तथेति। ते यद् वरुणस्य राज्ञो गृहे तनूः संन्यदधत, तत् तानूनप्त्रमभवत्। तत् तानूनप्त्रस्य तानूनप्त्रत्वम्। तत्कर्मस्वरूप तु आतिथ्यायाः ध्रौवात् स्रुचि चमसे वा आज्यं समवद्यति चतुरवत्तं पञ्चावत्तं वा, 'आपतये त्वा गृह्णामि' इत्येतैः प्रतिमन्त्रम्। 'अनाधृष्टमसि०' इति यजमानसप्तदशा ऋत्विजः तानूनप्त्रं समवमृशन्ति (आज्याला स्पर्श करून मैत्रीची शपथ घ्यावी) इति। ४।७।४-८.

तानूनप्त्रं कुर्वद्भिः परस्पर द्रोहो न कर्तव्यः। ४।७।७.

तार्क्ष्यं सूक्तं 'त्यमू षु वाजिनं देवजूतं' इति, छन्दोमेषु त्रिषु, पृष्ठ्ये षडहे च षट्स्वपि अहःसु, निष्केवल्यशस्त्रे भवति। २०।१।१६-१७; २०।३।१४ इ.

तिथिस्वरूप, या परि अस्तमियात् अभ्युदियाद् वा इति, सा तिथिः (यागार्हा)। ३२।९।४.

तीर्थं उत्करचात्वालयोर्मध्यदेशः । ऐआ ५।३।३ सायणः।

तीर्थे मार्जयित्वा । पत्नीशालायाः प्रसृप्य तीर्थे मार्जयित्वा, आग्नीध्रं संप्रपद्य, समन्वारभध्वमित्युक्त्वा 'उप सृजं धरुणं' इति आग्नीध्रीये जुहुयात् । द्वादशाहस्य दशमेऽहनि मानसग्रहे । सदसः प्रसृप्य, तीर्थे मार्जयित्वा पत्नीशालां संप्रपद्य, समन्वारभध्वमित्युक्त्वा 'इह रमेह रमध्वं' इति शालामुखीये जुहुयात् । २४।३।६-१६.

तूष्णींशंसः प्रथमे आज्यशस्त्रे । भूरग्निर्ज्योतिर्ज्योतिरग्नोऽऽऽम्, इन्द्रो ज्योतिर्भुवोज्योतिरिन्द्रोऽऽऽम्, सूर्यो ज्योतिर्ज्योतिः स्वः सूर्योऽऽऽम् । इति षट्पदः तूष्णींशंसः । ९।७।४; ८।१ । आहावोत्तरं उपांशु तिर इव (अस्पष्ट) षट्पदः । १०।७।१-४; १०।९।१। त्रिपदः षट्पदो वा इति आश्वलायनः (५।९।११)। तूष्णींशंस शस्त्वा उच्चैः पुरोरुचं (निविदं) शंसति १०।७।५-६.

तूष्णींशंसे शस्ते केन चिन्निन्दायां कृतायां शापे वा दत्ते 'एष एवैतामार्तिमारिष्यति प्रातर्वाव वयमद्येमं शस्ते तूष्णींशंसे संस्थापयामस्तं यथा गृहानित कर्मणाऽनुसमियादेवमेवैनमनु समिमः' इति मन्त्र जपेत् । ९।७।६.

तूष्णींशंसे शस्ते केन चिन्निन्दा न कर्तव्या शापो वा न देयः (शंसन० कर्मे)। ९।७।६.

तृतीयसवनं ऐन्द्रार्भवम् । २८।४।६.

,, जागतम् । २८।४।१५; ७।१.

,, जातवेदस आयतन आग्निमारुते शस्त्रे १०।७।१०.

,, द्वादशाक्षरा जगती उदयच्छत् । १३।४।३.

,, नाराशंस वै तृतीयसवनम् ।२८।८।१.

,, वैश्वदेवम् । २७।१।६-११; २८।७।१.

,, सद्नाराशंसम् । ८।६।३.

तृतीयसवनारम्भे आदित्यग्रहः । ११।५।१-३.

तृतीयसवने अग्निष्टोमे अहीने च मैत्रावरुणस्य परिधानीया. 'इयमिन्द्र वरुणं', ब्राह्मणाच्छंसिनः 'बृहस्पतिर्नः परिपातु', अच्छावाकस्य 'उभा जिग्यथुः' । २७।५।५। सायनः ।

तृतीयसवने अग्निष्टोमे होत्रकाणां शस्त्राणि न सन्ति अतिरात्रे तु सन्ति ।३०।५।१०

,, सवनीयपशोः श्रपयित्वा अङ्गहोमः । ७।३।८-९.

,, अच्छावाकः अन्ततः शिल्पेषु, अनाराशंसीः शंसति. (नाराशंससंबन्धरहिताः ऋतुर्जनित्री इत्यादयः ऋचः) । २८।८।१-३.

तृतीयसवने आरम्भणीयानि सूक्तानि ऐन्द्राणि जागतानि शस्यन्ते उक्थ्ये ।२८।७।१.

तृतीयसवने उन्नीयमानसूक्तं मैत्रावरुणस्य इहोपयात शवसो नपात' इति सूक्तगता आदिमा नव ऋचः । सप्तैवेति के चित्. तन्न । २८।१।६-१२; ४।१.

तृतीयसवने प्रतिगरः । 'शंसामोदैवोम्' इति अध्वर्युः प्रतिगृणाति पञ्चाक्षरेण । १२।१।४.

तृतीयसवने प्रस्थितयाज्याः होतुः 'इन्द्रऋभुभिर्वाजवद्भिः,' मैत्रावरुणस्य 'इन्द्रावरुणा सुतपा,' ब्राह्मणाच्छंसिनः इन्द्रश्च सोमं पिबतं,' पोतुः 'आ वो वहन्तु सप्तयः, नेष्टुः 'अमेव नः सुहवा', अच्छावाकस्य 'इन्द्राविष्णू पिबत', आग्नीध्रस्य 'इमं स्तोममर्हते' ।२८।४।६-१२.

तृतीयसवने बलिष्ठतमया वाचा शंसेत् ।१४।६।५.

,, महत्तृतीयसूक्तस्य आरम्भणीयं सूक्तं 'वैश्वानराय पृथुपाजसे' इति वैश्वानरीयम् । १२।३-४-५.

तृतीयसवने महाव्रते आग्निमारुतं शस्त्रम् । ऐआ. १।२२।११-१४, वैश्वदेवम् । १।२२।१-१०, ५।१३।१४.

तृतीयसवने मैत्रावरुणः ऐन्द्रावारुणं 'इन्द्रावरुणा युवं' इति सूक्तं शंसति । तस्य स्तोत्रियः आग्नेयः 'एदग्नु' इति, अनुरूपः आग्नेयः 'आग्निरगामि' इति । ब्राह्मणाच्छंसी ऐन्द्राबार्हस्पत्यं 'प्र मंहिष्ठाय' इति शंसति । तस्य स्तोत्रियानुरूपौ ऐन्द्रौ 'वयमुत्वा' 'यो न इदं' इति । अच्छावाकः ऐन्द्रावैष्णवं शंसति 'ऋतुर्जनित्री' इति, तस्य स्तोत्रियानुरूपौ ऐन्द्रौ 'अपादिन्द्र गिर्वणः', 'इयत इन्द्र गिर्वणः' । २८।६।९-१०

तृतीयसवने वैश्वदेवशस्त्रस्य, प्रातिपदरतृचस्य उत्तरे द्वे ऋचौ गायत्र्यौ अनुचरश्च गायत्रः ।१३।४।३.

तृतीयसवने शस्त्रजपः होतुः ' उक्थं वाचीन्द्राय देवेभ्यः' इत्येकादशाक्षरः, अध्वर्योः ओम् इत्येकाक्षरः । १२।११४.

तृतीयसवने शस्त्रेषु एका ऋच शिष्ट्वा निविद्धानम् ।११।१०।३–५, १०–११.

तृतीयसवने सवनीयपशवङ्गहोमाः ।७।३।८-९.

तृतीयसवने स्तोमविवृद्धौ अतिशंसन अपरिमिताभिरेव ऋग्भिः तथा माध्यंदिने । प्रातःसवने तु एकया द्वाभ्यां वा । २७।५।७–८;२९।७।१०–१३.

तृतीयसवने ' स्वरिन्द्रवन्तः स्तुध्व ' इति ब्रह्मा स्तोत्रप्रसवमाह । २५।९।५–६.

तृतीयसवने होतुः एवयामरुत् सूक्तं शस्यं भवति। ३०।५।३। तच श.नः करति इति रौद्याः धाय्याया उपरिष्टात् मारुतसूक्तस्य च पुरस्तात् । ३०।४।१४-१५.

तृतीयेऽहनि पृष्ठ्ये षडहे व्यूढे विश्वेदेवा देवता, सप्तदशः स्तोमः, वैरूप साम, जगती छन्दः । २१।१। १-३ । आज्य शस्त्र ' युक्ष्वा हि देवहूतमान '। ११। प्रउग ' वायवायाहि वीतये ' इत्यौष्णिहम् । १२। मरुत्वतीयं ।१३–१७। निष्केवल्य।१८–२२, २१।२। १-५। वैश्वदेव ।६-१३। आग्निमारुतम् ।१४–१७.

तेजस्कामस्य अपोनप्त्रीये ' अमूर्या उप सूर्ये ' इत्यनया अनुप्रपदन एकधनासु । ८।२।२२.

तेजस्कामस्य पालाशो यूपः। ६।१।१०–१३.

तोक्माः = धान्याङ्कुराः (मोड फुटलेलें धान्य) यज्ञाङ्गराजाभिषेके संभारेषु चमसे पात्र्यां वा प्रक्षेप्याः। ३७।१।३। ऐन्द्रमहाभिषेके तु धान्यचतुष्टयस्य व्रीहीणां महाव्रीहीणां प्रियङ्गूनां यवानामिति ।३९।२।३–४; ३।१.

त्रयस्त्रिंशः स्तोमः षष्ठेऽहनि पृष्ठ्ये षडहे । २२।७।१.

त्रिणवः स्तोमः पञ्चमेऽहनि पृष्ठ्ये षडहे । २२।१।१–५.

त्रिवृत् स्तोमः प्रथमेऽहनि । २०।१।१८-२.

त्रिवृत् स्तोमस्य उद्यती नाम विष्टुतिः । ' उपास्मै गायता, दविद्युतत्या रुचा, पवमानस्य ते कवे, इति त्रिषु तृचेषु आदिमाः तिस्रः ऋचः प्रथमे पर्याये गातव्याः, द्वितीया द्वितीये पर्याये, अन्तिमाश्च तृतीये पर्याये' सेय उद्यती विष्टुतिः। १४।४।१ सायणः।

त्रिष्टुप् छन्दः द्वितीयेऽहनि पृष्ठ्ये षडहे । २०।३।१–३.

त्रिष्टुप् पङ्क्तिमसृजत ।१९।६।६.

त्रिष्टुप्प्रातःसवनः छन्दोमत्र्यहः । २३ । १ । १० –११; ३।७, ९; २४।१।८–१०.

त्रिष्टुप् मूलतः चतुरक्षरा, सोमाहरणकाले एकाक्षरा अभूत् । पुनः गायत्रीसमेलनेन एकादशाक्षरा संपन्ना सा एकादशाक्षरा त्रिष्टुप् माध्यंदिन सवनमुदयच्छत् । १३।४।२.

त्रिष्टुप्सहस्रं महाव्रते निष्केवलशस्त्रे शंस्तव्यं इति के चित् । ऐआ. २।१७।३.

त्रेता, उत्तिष्ठंस्त्रेता भवति । ३३।३।४.

त्रैष्टुभानि च जागतानि च सूक्तानि गवामयने विषुवति शस्यन्ते ' यस्तिग्मशृङ्गः, ' ' दिवश्चिदस्य इति । १८।७।६, १८।८।३-७.

त्रैष्टुभो हि माध्यंदिनः । ऐआ. १।६।२२.

त्र्यहः द्वितीयः जगत्प्रातःसवनः २३।४।५.

त्र्यहे उत्तरस्मिन् आवापिकाः ऋचः अन्यूङ्ख्याः। विराजश्चतुर्थेऽहनि, ' न ते गिरो अपिमृष्ये '(१–४), ' प्रवोमहे महिवृधे '(१–३) इति सप्त ऋचः । तासु मैत्रावरुणस्य (१–३), ब्राह्मणाच्छंसिनः (३–५), अच्छावाकस्य (५–७) इति । अथवा वैमदीः आवपेरन्, ' यजामह इन्द्र' इत्याद्याः सप्त । तासु मैत्रावरुणस्य (१–३) , ब्राह्मणाच्छंसिनः (३–५) , अच्छावाकस्य (५–७) इति । पङ्क्तीः पञ्चमे, ' यच्चिद्धि सत्यसोमपाः ' इति सप्त । तत्र विभागः पूर्ववत् । पारुच्छेपीः षष्ठे ' इन्द्राय हि द्यौः ' इत्यादयः सप्त । विभागः पूर्ववत् ।२९।३।८-९.

दक्षिणाः माध्यंदिने सवने नीयन्ते । १३।१।३.

दक्षिणाग्नेरन्वाधानं कर्तव्यमेव । ३२।११।४-६.

दक्षिणाग्नौ 'अन्नादायान्नपतये स्वाहा' इत्याहुतिं जुहोति अन्वाधानोत्तरम्। ३२।११।५.

दक्षिणा। दातव्यैव यज्ञे दक्षिणा भवति अन्याल्पिकाऽपि।३०।९।११.

दक्षिणादानं आचार्याय ऐन्द्रमहाभिषेके। अभिषिक्तः अभिषेक्त्रे ब्राह्मणाय सहस्रं दद्यात्, क्षेत्रं दद्यात्, चतुष्पाद् दद्यात्, अपरिमितमेव दद्यात्। ३९।६।२.

दक्षिणा दोषं दृष्ट्वा त्यक्ता सती तेनैव वा अन्येन वा न ग्राह्या। 'न निवृत्तदक्षिणां प्रतिगृह्णीयात्'। ३०।९।२-३.

दक्षिणासु नीतासु, ता अनु सुब्रह्मण्या संतिष्ठते अग्निष्टोमे। २६।३।१२.

दधिघर्मे दध्ना चरन्ति। १४।२।९.

दधि चमसे पात्र्यां वा अभ्यानीय ऐन्द्रमहाभिषेके संभारः। ३९।३।१। यज्ञाङ्गे च राजाभिषेके। ३७।१।३.

दधि वैश्यानां भक्षः सोमयागादौ, न सोमः। ३५।३।१.

दन्तोत्पत्त्यनन्तरं, द्वितीयदन्तोत्पत्त्यनन्तरं मेध्यत्वं कुमारस्य। ३३।२।४-७.

दर्शपूर्णमासयोः उपवसथदिननिर्णयः। पूर्वां पौर्णमासीमुपवसेदिति पैङ्ग्यं, उत्तरामिति कौषीतकम्। या पूर्वा पौर्णमासी साऽनुमतिः, योत्तरा सा राका। या पूर्वाऽमावास्या सा सिनीवाली, योत्तरा सा कुहूः, उत्तरामुपवसेत्। ३२।९।१-५.

दर्शपूर्णमासयोः पञ्चदश सामिधेन्यः। १४।२।४.

दर्शपूर्णमासाविष्टिविकल्पः इळादधः, सर्वाननियतः, वसिष्ठयज्ञः, शौनकयज्ञश्च। १४।२।९ (आपस्तम्ब) सायणः।

दशममहः द्वादशाहे-२४।३।६। प्रशंसा। २४।३।१-४। इदं अविवाक्यं नाम,। नास्मिन्नहनि केन चित् कस्य चित् विवाच्यं (न वक्तव्यम्)। संशये बहिर्वेदि स्वाध्यायप्रयोग, अन्तर्वेदि इत्येके (आश्व.)। ५। शालामुखीये गार्हपत्यहोमः। ६-१३। आग्नीध्रीये होमः। १४-१६। सर्पराज्ञीषु स्तोत्रं। २५।४।१-५। होता चतुर्होतॄन् व्याचष्टे, तदेव शस्त्रं। ६-१०; २४।६।१-१३। प्रजापतेस्तनूः ब्रह्मोद्यं च अनुद्रवति। १४-२२। शस्त्रादौ औदुम्बरीसमन्वारम्भः।२४।५।१-५। वाङ्नियमः।६-९। वाग्विसर्गः समयाविषिते सूर्ये अस्तमिते एव वा। १०-१६ मानसग्रहः। २४।३।६-१३, २४।४-६.

दशमेऽहनि मानसग्रहे। सदसः प्रसृप्य तीर्थे मार्जयित्वा पत्नीशाला संप्रपद्य 'समन्वारभध्वं' इत्युक्त्वा 'इह रमेह रमध्वं' इति शालामुखीये जुहुयात्। पत्नीशालायाः सृप्य (सर्वे) तीर्थे मार्जयित्वा आग्नीध्रे सम्प्रपद्य 'समन्वारभध्वं' इत्युक्त्वा 'उपसृजं धरुणं०' इति आग्नीध्रीये जुहुयात् २४।३।६-१६.

दशापवित्रं यज्ञाङ्गराजाभिषेके अध्वर्युरुपकल्पयति। ३५।६।४.

दाक्षायणयज्ञे पयसा प्रचरति। १४।२।७.

दाधिक्री ऋक् अनुष्टुप् 'दधिक्राव्णो अकारिषं' इति षष्ठेऽहनि ब्राह्मणाच्छंसिशिल्पे। ३०।१०।८-९.

दानं अदानं च। काले एव दद्यात् काले न दद्यात्। न सर्वदैव दातव्यं रिक्तत्वप्रसङ्गात्। न च सर्वदैव अदातव्यं अपकीर्तिप्रसङ्गात्। ऐआ. २।१८।१३.

दानपात्रं गायत्रीसोमाहरणादिमाहात्म्यज्ञानवान् १३।४।६.

दासीपरिनर्तनं मार्जालीयं परितः महाव्रते माध्यंदिने। तिस्रः अवमाः षड्उत्तमाः (यमीति क्मी ३, जास्तीति जास्त ६) शिरस्स्थितपूर्णकुम्भाः प्रेष्याः प्रति संशास्ति (होता) इमं धिष्ण्यं उदकुम्भं च (तत्र स्थापितं) त्रिः प्रदक्षिणं परिव्रजाय दक्षिणैः पाणिभिः दक्षिणानूरून् आघ्नानाः 'एह्नेऽऽऽऽइदं मधुऽऽऽइदं मधु इतिवदन्त्यः' इति। ताश्च उदकुम्भान् शिरसि अधि निधाय दास्यो मार्जालीयं परि नृत्यन्ति पदो निघ्नतीः इदमधु गायन्त्यः। ऐआ. ५।१।२७-२८। उपाकृते स्तोत्रे संशास्ति 'कुम्भमुदकं सैध निनयाथ स्व (मार्जालीये), उत्तरे मार्जालीये (आग्नीध्रीये इत्यर्थः), शेषमन्तर्वेदि' इति। तासया कुर्वन्ति। ५।२।१.

दाहे। अग्निदाहे प्रायश्चित्तं 'अग्नय: अग्नेण' इत्यत्र, तदुत्तरे च द्र०। ३२।६।; ७।४.

दिगुपस्थानं यशाङ्गराजाभिषेके समिदाधानोक्रमणोत्तरं 'क्लृतिरसि दिशां मयि०' इति अपराजितां दिशमुपतिष्ठते। ३७।५।१३.

दिवाकीर्त्यं, दिवैव कीर्तनीयं मन्त्रजातं यस्मिन्, तत् त्रिवृदहः दिवाकीर्त्यं गवामयने मध्यममहः। १८।४।४.

दिव्येनाग्निना अग्नीनां संसर्गे प्रायश्चित्तं 'अग्नीनां' इत्यादौ द्र०। ३२।६।.

दिशांक्लृप्तीः नाम मन्त्रान् कुन्तापसूक्ते अर्धर्चशः शंसति. 'यः सभेयो विदथ्यः' इत्यादीन् पञ्च। ३०।६।१९–२२.

दीक्षणीया अग्निष्टोमे। देवता अग्नाविष्णू।१।१।१–२। द्रव्यं एकादशकपालः पुरोडाशः घृते चरुर्वा प्रतिष्ठाकामस्य ३–७। कालः, आमावास्येन वा हविषेष्ट्वा पौर्णमासेन वा तस्मिन्नेव हविषि तस्मिन् बर्हिषि दीक्षेत। एषो (एषा उ) एका दीक्षा। १२। सप्तदश सामिधेनीरनुब्रूयात्। १३–१५। संस्काराः यजमानस्य दीक्षितस्य।१।३।१–२३; १।६।६–१२। आज्यभागयो.। पुरोऽनुवाक्ये १।४।१–७, प्रधानस्य याज्याऽनुवाक्ये। १।४।८–११। संयाज्याः काम्याः नित्ये च।१।५।१–२५; १।६।१–५। तत्रतत्र शब्दे द्र०

दीक्षणियादिषु इष्टिषु यजमानभागो ब्रह्मणे देयः क्षत्रियेण यजमानेन। अग्नौ हैके जुहति 'प्रजापतेर्विभाजाम' इति मन्त्रेण। ३४।८।१–६.

दीक्षणीया पत्नीसंयाजान्ता। १५।१।१.

दीक्षा द्वादश द्वादशाहे। १९।२।२.

दीक्षायाः पूर्वे होमः क्षत्रिययागे। चतुर्गृहीतमाज्यं आहवनीये 'पुनर्न इन्द्रो मघवा' इति ऋचमनुद्रुत्य 'ब्रह्म पुनरिष्टं पूर्तं दात् स्वाहा' इति। इष्टापूर्तस्यापरिज्यानिः नाम होमोऽयम्।३४।३।२।१-२; ४।१-४.

दीक्षायाः प्राक् द्वादशाहे प्राजापत्यं पशुं आलभेत। १९।४।४–१२.

दीक्षितत्वावेदने क्षत्रियेऽपि यजमाने ब्राह्मणशब्दस्यैव प्रयोगः। ३४।७।१–४.

दीक्षितविमितात् दीक्षितेन बहिर्नं गन्तव्यं, गमनेऽपि सूर्योदये, सूर्यास्तमये च प्रत्यागन्तव्यं, अन्यैरपि यजमानाय ज्ञापनीयं तथा इति नियमः। १।३।१२-१४.

दीक्षितस्य संस्काराः दीक्षायाम्। स्नानं१।३।२–३। अभ्यञ्जनं नवनीतेन।४-५। अञ्जनं नेत्रयोः। ६–७। पावनं दर्भपुञ्जीलैः। ८-९। शालाप्रवेशः। १०-११। नियमविशेषः दीक्षितविमितात् बहिर्गमनाभावः इत्यादिः। १२-१४। अहतं वासः।१५-१६। कृष्णाजिनम्।१७-१८। उन्मुच्य कृष्णाजिनं अवभृथमभ्यवैति। २३। मुष्टीकरणम्। १९। सत्यवदनम्। १।६।६। विचक्षणपदप्रयोगः अन्यसंबोधने। ७-१२.

दुरुक्तोक्तस्य (अपवादेन जनैर्व्यवह्नतस्य) अग्निष्टोमे प्रातरनुवाके ऋचां अष्टौ शतानि अनूच्यानि। ७।७।६.

दुग्धे केशकीटादिना सायं सानाय्ये प्रायश्चित्तं, एवं प्रातः, उभयस्मिंश्च। एतत् सर्वं 'सानाय्यं' इति शब्दे द्र०। त्रयाणामेव हविषा दोषे प्रायश्चित्त 'हवींषि' इति शब्दे द्र.। ३२।३।४.

दुहिता कृपण अबलात्वात् परकीयत्वात्।३३।१।८.

दूरोहणं रोहति. हंसवत्या ऋचा 'हंसः शुचिषत्' इत्यनया। १८।६।१-१९, स्वर्गकामस्य तु तार्क्ष्येण सूक्तेन 'त्यमू षु वाजिनं' इत्यनेन। २०-२१, आहूय दूरोहणं रोहति (मन्त्रशंसनमेव दूरोहणारोहणम्). पच्छः प्रथम, अर्धर्चशो द्वितीयं, अथ त्रिपद्या, सर्वया ऋचा चतुर्थं इति चतुर्वारमावृत्तिः आरोहे। प्रत्यवरोहणं तु त्रिवारमेव. तत्र त्रिपद्या प्रथमं, अर्धर्चशो द्वितीयं, पच्छस्तृतीयमिति। स्वर्गकामानां तु प्रत्यवरोहणं नास्त्येव। १८।७।१-५.

. दूरोहणं 'हंसः शुचिषद्' इतिहंसवत्या ऋचः पच्छः अर्धर्चशः त्रिपद्या ऋक्शः (अनवानं) त्रिपद्या अर्धर्चशः पच्छः इति सप्तभिः प्रकारैः पठनम्। २९।९।१, पशुकामस्य तु ऐन्द्रे जागते महासूक्ते बहुणा ऋषिणा दृष्टे 'प्र ते महे' इति त्रयोदशर्चे दूरोहणं, प्रतिष्ठाकामस्य तु 'श्रुष्टी वां यज्ञ उद्यत.

सजोषा ' इति ऐन्द्रावरुणे सूक्ते, सौपर्णे वा ' इमानि वां भागधेयानि ' इति खैलिके सूक्ते ' प्रधारयन्तु ' इति गृह्योक्ते वा सूक्ते दूरोहणं रोहेत् । २९।९।२-७.

दूरोहणोत्तरं ऐकाहिकानि शस्त्राणि शंसनीयानि न तु वालखिल्याभ्यः पूर्वम् । तत्रापि ' चर्षणीधृतं ' इत्यैन्द्रं ऐकाहिकं त्याज्यं, ' आ वा राजानौ ' इति ऐन्द्रावरुणं तु शंसनीयं, नान्यत् । २९।१०।१-१०.

दूर्वा यज्ञाङ्गराजाभिषेकसंभारेषु चमसादौ प्रक्षेप्या । ३७।१।३.

देवता आतिथ्याया विष्णुः । ३।४।४.

देवता उदयनीयाया प्रायणीयावत् । विशेषस्तु पथ्या स्वस्तिः आज्यहविषा उत्तमा (आश्वला. ६।१४।३, सत्याषाढ: ९।६।८) तथा च अग्निः, सोमः, सविता, पथ्या स्वस्तिः, अदितिः इति क्रमः, देशास्तु प्रायणीयानुरोधेन तत्तद्देवतानियत एव । २।५।७-८.

देवताः उपसत्सु अग्नि. सोम. विष्णुश्च । ४।८।२.

देवताः त्रिविधाः आहुतिभागा· स्तोमभागाः छन्दोभागा. इति । या अग्नौ आहुतयो हूयन्ते ताभि राहुतिभागास्तुप्यन्ति, अथ यत् स्तुवन्ति उद्गातार , तेन स्तोमभागास्तुप्यन्ति, अथ यत् शसन्ति होतार., तेन छन्दोभागास्तुप्यन्ति । ७।८।६.

देवताः दीक्षणीयाया आग्नावैष्णव एकादशकपाल पुरोडाश निर्वपन्ति दीक्षणीय अग्निष्टोमे । १।१।१-७.

देवताः पृष्ठ्ये षडहे । प्रथमेऽहनि अग्निः २०।१।१-२, द्वितीये इन्द्रः २०।३।१-२, तृतीये विश्वेदेवाः २१।१।२-२, चतुर्थे वाक् २१।३।२, पञ्चमे गौः २१।३।२. २२।१।१, षष्ठे द्यौः । २१।१।२. २२।७।१.

देवताः प्रउगे शस्त्रे सप्त । वायव्यं शसति, ऐन्द्रवायवं शसति, मैत्रावरुण शसति, आश्विन शंसति, ऐन्द्रं शंसति, वैश्वदेव शसति, सारस्वत शसति ११।१।२-८. ११।२।५-१०. (वायो नर, वायव्यैन्द्रवायवमैत्रावरुणास्तृचाः, अश्विना द्वादश, आश्विनैन्द्रवैश्वदेवसारस्वतास्तृचाः, सप्तैताः प्रउगदेवताः इति सर्वानुक्रमणी).

देवताः प्रातरनुवाके अग्निः उषाः अश्विनौ ७।५।२-७। आग्नेयानि सप्त च्छन्दांसि, उषस्यानि सप्त, आश्विनानि सप्त । ७।७।१२-१७.

देवताः प्रायणीयाया अग्निष्टोमे । पथ्या स्वस्ति यजति पुरस्तात् , अग्निं यजति दक्षिणतः, सोम यजति प्रतीच्या, सवितारं यजति उत्तरतः, उत्तमामदितिं यजति ऊर्ध्वाया दिशि (मध्ये इत्यर्थः) पञ्च देवता यजति । उदयनीयायामेता एव, परंतु पथ्या स्वस्तिश्चतुर्थी, देशास्तु ते एव । २।१।३-१६. २।२।११-१६.

देवताध्यान वषट्कारात् प्राक् होत्रा कर्तव्य ' यस्यै देवतायै हविर्गृहीतं स्यात् (अध्वर्युणा) ता ध्यायेत् वषट् करिष्यन् ' । ११।८।१.

देवनीथः नाम मन्त्रः ब्राह्मणाच्छंसिशिल्पे षष्ठेऽहनि. ' आदित्या ह जरितरङ्गिरोभ्यः ' इत्यादीनि सप्तदश पदानि, तानि पदावग्राहं निविद्वत् शंसनीयानि ३० । ८-९.

देवयजनयाचनं यज्ञभूमियाचनम् । ब्राह्मणो राजन्यो वैश्यो दीक्षिष्यमाणः क्षत्रियं (राजानं) देवयजनं याचति. राजा तु यद्दर्दीक्षिष्यमाणो भवति, तदह पूर्वाह्ने एव उद्यन्तमादित्यमुपतिष्ठेत ' इद श्रेष्ठं ज्योतिषा ज्योतिरुत्तमं ' इति जपन् ' देव सवितर्देवयजनं मे देहि देवयज्यायै ' इति देवयजन याचति । ३४।२।१-५.

देवरातः शुनःशेपः वैश्वामित्रः आस, कापिलेयाः बाभ्रवाश्च तस्य वंश्य. अभवन् । ३३।५।२.

देवाना पत्नीः नाम ' देवाना पत्नीरुशती ' इति ऋग्द्वय आग्निमारुते शस्त्रे अहिर्बुध्नियोत्तरम् । १३।१३।१-५.

प्रतिपत् तृचः मरुत्वतीये शस्त्रे छन्दोमप्रथमेऽहनि आ त्वा रथ २०३।१।१२। द्वितीयेऽहनि विश्वानरस्य विस्पतिं २३।३।१०। तृतीयेऽहनि तंतमिद्राधसे । २४।१।११.

प्रतिपत् तृचः मरुत्वतीये शस्त्रे पृष्ठ्ये षडहे प्रथमेऽहनि आ त्वा रथं २०।१।७। द्वितीयेऽहनि विश्वानरस्य वस्पतिं २०।३।६। तृतीयेऽहनि तंतामिद्राधसे २१।१।१३। चतुर्थेऽहनि तं त्वा यज्ञेभि २१।४।११। पञ्चमेऽहनि यत् पाञ्चजन्यया २२।१।८। षष्ठेऽहनि स ञ्यों महानाम् । २२।७।६.

प्रतिपत् तृचः मैत्रावरुणशस्त्रे अग्निष्टोमे प्रातःसवने

आ नो मित्रावरुणा। माध्यंदिने कया नश्चित्र.। वैश्वदेवशस्त्रे तत् सवितुर्वृणीमहे। प्रयोगे.

प्रतिपत् तृचः वैश्वदेवशस्त्रे अग्निष्टोमे तत् सवितुर्वृणीमहे .। छन्दोमप्रथमेऽहनि तत् सवितुर्वृणीमहे २३।२।६। द्वितीयेऽहनि -विश्वो देवस्य नेतुः इत्येका तत् सवितुर्वरेण्य इति द्वे मिलित्वा एकस्तृच.२३।४।८। तृतीयेऽहनि तत् सवितुर्वृणीमहे। २४।२।९.

प्रतिपत् तृचः वैश्वदेवशस्त्रे पृष्ठ्ये षडहे। प्रथमेऽहनि तत्सवितुर्वृणीमहे २०।२।३। द्वितीयेऽहनि विश्वो देवस्य इत्येका तत्सवितुर्वरेण्यं इति द्वे २०।३।२। तृतीयेऽहनि तत्सवितुर्वृणीमहे २१।२।६। चतुर्थेऽहनि द्वितीयाहवत् २१।५।६। पञ्चमेऽहनि तृतीयाहवत् २२।२।६। षष्ठेऽहनि अभि त्यं देव इत्येका तत्सवितुर्वरेण्य इति द्वे। २२।८।७.

प्रतिपत् नवर्चः निष्केवल्ये शस्त्रे पृष्ठ्ये षडहे पञ्चमेऽहनि महानाम्नीषु अत्र स्तुवते शाक्वरेण साम्ना, 'विदा मघवन् विदा (१–९)'। २२।२।१–४.

प्रतिपत् निष्केवल्ये महाव्रते। 'तदिदास भुवनेषु' इति त्रिष्टुप् 'नदं व ओदतीना' इत्यनुष्टुप्, अनयोः पादशो विहरणं तदिदासपादः नदंवपादः इति रीत्या। तदिदासऋचः प्रथमपादान्ते 'षु' इत्यक्षरं, द्वितीयपादान्ते 'र', चतुर्थपादान्ते च 'प.' इति अक्षर. विहरणं कृत्वा 'नद वः' इत्यास्याः पादाना विरहण कर्तव्य, तेन बृहतीद्वयं संपद्यते। एव त्रि. प्रथमा ऋक्। मिलित्वा षट् बृहत्यो भवेयुः। सेयं एतावती प्रतिपत्। ऐब्रा. ११११-१२. ११३।१–६. ५।६।६.

प्रतिपत् प्रगाथः अच्छावाकशस्त्रे अग्निष्टोमे माध्यंदिने तरोभिर्वो, निष्केवल्ये अभि त्वा शूर, आग्निमारुते यज्ञायज्ञा वो। प्रयोगे.

प्रतिपत् प्रगाथः निष्केवल्ये छन्दोमप्रथमेऽहनि त्वामिद्धि हवामहे .२३।१।१३ ! द्वितीयेऽहनि अभि त्वा शूर २३।३।२३। तृतीयेऽहनि त्वामिद्धि हवामहे। २४।१।२१.

प्रतिपत् प्रगाथः निष्केवल्ये पृष्ठ्ये षडहे प्रथमेऽहनि अभि त्वा शूर २०।१।१३। द्वितीयेऽहनि त्वामिद्धि हवामहे २०।३।११। तृतीयेऽहनि यद् द्याव इन्द्र ते। २०।१।१८.

प्रतिपत् प्रगाथ. ब्राह्मणाच्छंसिशस्त्रे अग्निष्टोमे माध्यंदिने 'तं वो दस्म', मरुत्वतीये शस्त्रे 'आ त्वा रथम्'। प्रयोगे.

प्रतिपत् प्रातरनुवाकस्य ऋक् त्रिः पठनीया, 'आपो रेवतीः' इति। ७।६।१–६.

प्रतिपत् वैश्वदेवशस्त्रस्य तत्सवितुर्वृणीमहे।१३।५।४.

प्रतिपत् शस्त्रारम्भे पठ्यमान अवयवविशेषः। स च ऋक् प्रगाथः तृच. सूक्तं वा भवति। प्रायः सामाधारभूतो यः स्तोत्रियो नाम तृचादिः सैव शस्त्रे प्रतिपत्। औद्गाले स्तोत्रिमः, हौत्रे प्रतिपत् इत्युच्यते। १३।१२।४.

प्रतिपत् सूक्त वैश्वानरीय आग्निमारुतशस्त्रे अग्निष्टोमे वैश्वानराय पृथु १३।११।१। पृष्ठ्ये षडहे प्रथमेऽहनि वैश्वनराय पृथु २०।२।१० द्वितीयेऽहनि 'पृक्षस्य वृष्णो अरुषस्य २०।४।८। तृतीयेऽहनि वैश्वानराय धिषणा २१।२।१४। चतुर्थेऽहनि वैश्वानराय सुमतौ २१।५।१२ षष्ठेऽहनि 'अहश्च कृष्णमह'। २२।१०।५.

प्रतिपदः उत्तरे द्वे ऋचौ गायत्र्यौ अग्निष्टोमे माध्यंदिने मरुत्वतीयशस्त्रे, तृतीयसवने च वैश्वदेवशस्त्रे। १३।४।२–३.

प्रतिपदः सूक्तप्रतिपदः त्रिष्टुभः अहरहः शस्येषु। एताः प्रगाथानां पुरस्तात् धाय्यात्वेन शंस्तव्याः इति केचित्त। मैत्रावरुणस्य 'अप प्राच इन्द्र', ब्राह्मणाच्छंसिनः 'ब्रह्मणा ते ब्रह्म युजा', अच्छावाकस्य 'उरु नो लोकमनु इति। २५।६।१–७.

प्रतिप्रस्थातुः सव्योऽंसः पशुभागः सत्रे।३१।१।२.

प्रतिराधः नाम मन्त्राश्रयः ब्राह्मणाच्छंसिशिल्पे पठ्यते इति 'भुगित्यभिगत.' इत्यादयः। तानि पदानि नाम। ३०।७।१९.

प्रतिष्ठाकामस्य दीक्षणीयाया घृते चरु. अग्निष्टोमे। १।१।८–११.

प्रतिहर्तुः कण्ठः काकुदश्च (काकुदं) पशुभाग. सत्रे ३१।१।२.

प्रतिहारः प्रतिहर्त्रा गातव्यः पाञ्चभक्तिके चतुर्थः, साप्तभक्तिके च षष्ठः सामावयवः। १२।१२।४ सायणः।

प्रतिहारः महाव्रते। प्रस्तोतारं प्रशास्ति होता। राजनाख्यस्य साम्नः पञ्चविंशस्य स्तोमस्य तिसृषु, अर्धतृतीयासु (२॥) अर्धत्रयोदशासु (१२॥) वा परिशिष्टासु (इति प्रथमः पक्षः) प्रथमं प्रतिहारं प्रसूतात्' इति। 'अर्धत्रयोदशासु प्रवाचयत' इति अस्तू्रूर्ध्यः। ऐआ. ५।५।१-३.

प्रतृण्णपाठः नाम पदपाठः। ऐआ. ३।३।२-६.

प्रथमेऽहनि पृष्ठ्ये षडहे अग्निर्देवता, त्रिवृत् स्तोमः, रथंतरं साम, गायत्री छन्दः। २०।१।१-२। आज्यं, प्रउगं, मरुत्वतीयं, निष्केवल्यम्। २०।१।४-१७। वैश्वदेवं, आग्निमारुतम्। २०।२।१-१५.

प्रधानस्य याज्याऽनुवाक्ये दीक्षणीयाया 'अग्निर्मुखं प्रथमो देवतानां, अग्निश्च विष्णो तप उत्तमं' इति त्रिष्टुभौ।१।४।८-११.

प्रधानानां याज्याऽनुवाक्याः प्रायणीयोदयनीययोः। पथ्यायाः स्वस्तेः त्रिष्टुभौ 'स्वस्ति नः पथ्यासु, स्वस्तिरिद्धि प्रपथे' इति। अग्नेस्त्रिष्टुभौ 'अग्ने नय सुपथा, आ देवानामपि पन्थाम्' इति। सोमस्य त्रिष्टुभौ 'त्वं सोम प्रचिकितो, या ते धामानि दिवि' इति। सवितुर्गायत्र्यौ 'आ विश्वदेवं सत्पतिं, य इमा विश्वा जातानि' इति। अदितेर्जगत्यौ 'सुत्रामाणं पृथिवीं द्यां, महीमू षु मातरं' इति। २।३।७.

प्रपदं नाम होममन्त्राः। प्रक्षिप्तं पदजातं यस्मिन्नुच्चारणे, तदुच्चारणं प्रपदं नाम। ३७।७।१-२ सायणः।

प्रपदहोमः यज्ञाद्गृहं राजाभिषेके गृहे आगमनोत्तरम्। एत्य गृहान् गृहस्थानामिस्थपविश्य अन्वारब्धाय ऋत्विक् सर्वप्रयोगान्ते कंसेन चतुर्गृहीतास्तिस्र आज्याहुतीः ऐन्द्रीः प्रपदं जुहोति। पर्यूषु धन्ववाजसातये, अनु हि त्वा सुतं सोम, अजीजनो हि पवमान इति मन्त्रत्रये द्वितीयपादेषु मन्त्रान्तरप्रक्षेपोऽस्ति, ते मन्त्राः तैर्होमश्च प्रपदं नाम। ३७।६।१; ७।१-४.

प्रमंहिष्ठीयं साम 'प्र मंहिष्ठाय गायत' इति ऋचि उत्पन्नम्। १५।५।१ सायणः।

प्रमंहिष्ठीयेन साम्ना उक्थ्यस्तोत्राणि कर्तव्यानि साम्मयेन वा। १५।५।८-१०.

प्रयाजयाज्याः आप्रियः जामदग्न्याः 'समिद्धो अद्य मनुषो'। द्वादशाहे प्राजापत्यपशौ।१९।४।६-८.

प्रयाजाः अग्नीषोमपशोरेकादश। समिधः, तनूनपात् वसिष्ठशुनकेतरेषां गोत्राणां; नराशंसः, इळः बर्हिः, दुरः, उषासा नक्ता, दैव्या होतारा, तिस्रो देवीः, त्वष्टा, वनस्पतिः, स्वाहाकृतयः इति। यथर्षि आप्रियः। ६।४।१-१६.

प्रयाजा अनुयाजाश्च प्रायणीयायां, प्रयाजाः सन्ति अनुयाजा न सन्ति, उदयनीयायाया तु प्रयाजा न सन्ति अनुयाजाश्च सन्ति इति पूर्वः पक्षः। उभयत्र उभयं इति सिद्धान्तः। २।५।१-४.

प्रयाजाः पशौ यथर्षि भवन्ति। 'यथर्षि' इति शब्दे द्रष्टव्यम्। १९।४।७.

प्रयाजानुयाजनिषेधः उपसत्सु। ४।१।१.

प्रयाजेषु काम्याः प्रकाराः प्रायणीयायाम्। प्रयाजा इतिभिः प्राङियात् ब्रह्मवर्चसकामः। दक्षिणा इयात् अन्नाद्यकामः। प्रत्यङ् इयात् पशुकामः। उदङ् इयात् भूयः सोमपीथकाम.। मध्ये स्वर्गकामः।२।२।१-१०.

प्रवर्ग्यः। आख्यायिका, प्रैष', अभिष्टवः उत्तरं पटलम्।४।१-५.

प्रवर्ग्ये अभिष्टवनार्था ऋचः। पूर्वे पटलम्। ब्रह्मजज्ञानं, इयं पित्र्ये, महान् मही (ब्राह्मणस्पत्या) अभि त्यं देव (सावित्री) एताश्चतस्रः शाखान्तरगता आश्वलायनेन (४।६।३) पठिताः। सं सीदस्व महान् इति महावीरस्य खरे संस्थापनार्था। अञ्जन्ति य इति महावीराय अज्यमानायाभिरूपा। पतङ्गमक्त, यो नः सनुत्यो, भरानो अग्ने इति द्वे द्वे। कृणुष्व पाजः इति पञ्च राक्षोघ्न्यः। परि त्वा गिर्वणो, अधि द्वयोरदधाः, शुक्रं ते अन्यत्, अपश्यं गोपाम्। ता एकविंशतिर्भवन्ति ४।२।१-११। सके द्रप्सस्य इति नव पावमान्यः, अयं वेनश्चोदयत्, पवित्रं ते, तपोष्पवित्रं, वियत्पवित्र, गणानां त्वा ब्राह्मणस्पत्यं एकोनविंशतिऋचं, प्रथश्च तृचं घर्मतन्वः नाम, अपश्य त्वा

तृचं० काराधत् नवर्चं शाक्षीवतमाश्विनं, आ भात्यग्निः पञ्चर्चं त्रैष्टुभं, ग्रावाणेव अष्टर्चं त्रैष्टुभं, ईळे द्यावा पञ्चविंशत्यृचं जागत, 'अरूरुचत्' उपोत्तमा आधेया, ईळेद्यावीया उत्तमा परिधानीया। इति नु पूर्वं पटलम्। ४।३-४। अथोत्तरं पटलम्। उपह्वये (त्रि) हिङ्कृण्वती, अभित्वा देव सवित॰, समी वत्स, स वत्स इव, यस्ते स्तन, गौरमीमेत्, नमसेदुप, सजानाना, आ दशभिर्, दुहन्ति सप्तैका, 'समिद्धो अग्निरश्विना, समिद्धो अग्निर्वृषणा' इति द्वे ऋचौ शाखान्तरीये आश्वलायनेन पठिते। तदु प्रयक्ष, आत्मन्वन्। उत्तिष्ठ ब्राह्मणस्पते इत्यवतिष्ठते। अधुक्षत् पिप्युषी इति धेन्वा दुग्धायाम्। उपद्रव पयसा इत्याह्रियमाणे दुग्धे। इय शाखान्तरगता आश्वलायनेन पठिता। आ नूनमश्विनोर्ऋषिः इति गव्ये दुग्धे आसिच्यमाने। आसुते सिञ्चत इति आजे दुग्धे आसिच्यमाने। समु त्ये महतीरपः इत्याक्षिप्तयोः उदु ष्य देव. सविता हिरण्यया इति अनूत्तिष्ठति प्रैतु ब्रह्मणस्पति इत्यनुप्रैति। गन्धर्व इत्था पदमस्य इति खर (महावीरस्थापनार्थो वेदिः)। अवेक्षते। नाके सुपर्णमुप इत्युपविशति। 'तप्तो वा घर्मो (इति शाखान्तरगता आश्वलायनेन पठिता) उभा पिबतमश्विना' इति द्वाभ्या पूर्वाह्णे यजति (द्वे याज्ये इत्यर्थः)। अग्ने वीहि इत्यनुवषट्कार॰। 'उदुस्रियास्स्वाहुत (शाखान्तरगता आश्वलायनेन पठिता), अस्य पिबतमश्विना' इति द्वाभ्या अपराह्णे यजति। अग्ने वीहि इत्यनुवषट्कारः। ब्रह्मजपः 'विश्वा आशा दक्षिणसात्' (शाखान्तरगता आश्वलायनेन पठिता) इति ऋक्। होता होमादूर्ध्वं पठनीयाः सप्त ऋच., 'स्वाहाकृतः शुचिर् (शाखान्तरगता आश्वलायनेन पठिता), समुद्रादूर्मिमुदियर्ति, द्रप्सः समुद्रमभि, सखे सखाय, ऊर्ध्व ऊ षु णः, ऊर्ध्वो नः पात्यंहसः, स घेमित्या' इति। पावक शोचे इति भक्षमावाह्यते। हुतं हविर्मधु (ब्राह्मणपठिता) इति घर्मस्य भक्षयति। श्येनो न योनिं, आ यस्मिन् सप्त वासवाः (आश्वलायनेन पठिता) इति द्वे प्रवर्ग्यपात्रसंसादने। हविर्हविष्मो महि इति ऋक् उपोत्तमत्वेन आवपनीया यदहरुत्सादयिष्यन्तो भवन्ति। सूयवसाद् भगवती इत्युत्तमया परिदधाति। अथ प्रवर्ग्यप्रशंसा। ४।५।१-१५.

प्रवर्ग्ये पयसा प्रचरति। १४।२।७.

प्रवह्लिका नाम मन्त्राः ऐतशप्रलापोत्तरं ब्राह्मणाच्छंसिशिल्पे षष्ठेऽहनि 'विततौ किरणौ द्वौ' इत्यादयः षट् अनुष्टुभः अर्धर्चशः शंसति। ३०।७।१६-१७.

प्रवासे प्राप्ते अग्न्युपस्थानम्। प्रवासादेत्य च अहरहश्च तूष्णीमेव विनयप्रदर्शनम्। किंवा 'अभय वोऽभय मेऽस्तु' इति पठेत्। ३२।११।८.

प्रवासे यजमानमरणे स्वगृहे पुत्रादिः अभिवान्यवत्सायाः पयसा जुहुयात्। अपि वा यत एव कुतश्च पयसा जुहुयात्। किंवा अग्नीन् अजस्रान् होमरहितानेव इन्धीरन् आ शरीराणामाहर्तोः। ३२।१।४-६.

प्रवेशः परब्रह्मणः जीवरूपेण शरीरे। ऐआ. २।२३।७-८.

प्रस्तावः प्रस्तोत्रा गातव्यः द्वितीयः सामावयवः। १२।१२।४.

प्रस्तोतारं प्रेङ्खारूढो होता सशास्ति महाव्रते। 'राजनसाम्नः पञ्चविंशस्य स्तोमस्य तिसृषु अर्धतृतीयासु (२॥) अर्धत्रयोदशासु (१२॥) वा परिशिष्टासु प्रथम प्रतिहार प्रब्रूतात्' इति। ऐआ. ५।५।१-२.

प्रस्तोतुः हनू सजिह्वे पशुभागः षड्शे। ३१।१।२.

प्रस्तोत्रा प्रथमप्रतिहारकाले प्रोक्ते होता जपति सुपर्णोऽसि गरुत्मान् इत्यादि मन्त्रत्रयं महाव्रते। ऐआ ५।५।३-९.

प्रस्थितयाज्याः तिस्र. पोतुः उक्थ्ये क्रतौ। १५।५।६.

प्रस्थितयाज्याः प्रातःसवने। होतु॰, इदं ते सोम्यं मधु। ब्राह्मणाच्छंसिनः, इन्द्र त्वा वृषभ वयम्। मैत्रावरुणस्य, मित्र वय हवामहे। पोतुः, मरुतो यस्य हि क्षये। नेष्टुः, अग्ने पत्नीरिहावह। आग्नीध्रस्य, उक्षा-

माय यशात्राय । अच्छावाकस्य, प्रातर्यावभिरागनम् । २८।२। माध्यंदिने । होतु', पिबा सोममभि । मैत्रावरुणस्य, स ईं पाहि यः । ब्राह्मणाच्छंसिनः, एवा पाहि प्रत्नथा । पोतुः, अर्वाङेहि सोमकामम् । नेष्टुः, तवायं सोमस्त्वमेह्यर्वाङ् । अच्छावाकस्य इन्द्राय सोमाः प्रदिवो। आग्नीध्रस्य, आ पूर्णो अस्य कलशः । २८ । ३ । तृतीयसवने । होतुः, इन्द्र ऋभुभिर्वाजवाद्भिः । ब्राह्मणाच्छंसिनः, इन्द्रश्च सोमं पिबतम् । मैत्रावरुणस्य, इन्द्रावरुणा सुतपा । पोतुः आ वो वहन्तु सप्तयो । नेष्टुः, अमेव नः सुहवा । अच्छावाकस्य, इन्द्राविष्णू पिबतं मध्वो । आग्नीध्रस्य, इमं स्तोममर्हते । २८।४.

प्रस्थितयाज्याना सप्ताना पुरस्तात् प्रत्येकं एकैका पाङ्क्तेपी ऋक् उपधातव्या पृष्ठ्ये षडहे । प्रातःसवने क्रमेण वृषन्निन्द्र, सुषुमा यात, वनोति हि सुन्वन्, मो षु वो अस्मदभि ओ.ष्‌ू णो अग्ने, अग्निं होतारं मन्ये, दध्यङ् ह यन्मे ' इति (आश्वला ८।१।२) माध्यंदिने तु ' पिबा सोममिन्द्र ' इत्येका, इन्द्राय हि द्यौरसुरो इति षट् (आश्वला ८।१।४) २२।५।१–५.

प्रहरणं यूपस्य (अग्नौ) स्वर्गकामस्य ।६।३।८.

प्रहरणं स्वरोरेव यूपप्रतिनिधित्वेन प्रतिष्ठाकामस्य । ६।३।८.

प्राजापत्यं पशुमालभेत द्वादशाहे दीक्षायाः पुरस्तात् । तत्र सामिधेन्यः सप्तदश आप्रियः जामदग्न्यः ' समिद्धो अद्य मनुषो ' इत्यादयः ।१९।४।४–८.

प्राज्यापत्या ऋक् ' तन्तुं तन्वन् ' इति आग्निमारुतशस्त्रे ' वैष्णव्याः उत्तर, प्राजापत्योत्तरं च ' एवा न इन्द्रो मघवा ' इति परिधानीया । १३।१४।५–८.

प्राणः प्रपदाभ्यां शरीरे प्रापद्यत आत्मा तु मूर्ध्ना । ऐआ. २।४।१.

प्राणश्रैष्ठ्यार्थे इन्द्रियकलहः । ऐआ ४।४।९-१५.

प्राणस्य वंशत्वं शरीरे । वंशो गृहस्य मध्यस्थूणा । ऐआ. ३।४।२; ७।१.

प्राणाः शरीरे द्वादश । सप्त शीर्षण्याः, द्वौ स्तन्यौ, सयोऽवाञ्चः नाभ्या सह । ऐआ. १।२०।७.

प्राणोपासनम् । महाव्रतगतनिष्केवल्यशस्त्रस्य प्राणदृष्ट्या उपासनम् । प्राणः सूक्ष्मदेहात्मकः। अतः सूक्ष्मदेहरूपेण उक्थोपासनं इत्युच्यते । अहंग्रहोऽत्र । ऐआ. २।४।२०.

प्रातःसवनं आग्नेयम् । २७।१।४-५.

प्रातःसवनं गायत्री उदयच्छत् । १३।४।२.

प्रातःसवनं द्विनाराशंसम् । ८।६।३.

प्रातःसवने अच्छावाकशस्त्रं अग्निष्टोमे (आज्यं) ' इन्द्राग्नी आगतं सुतं ' इति । प्रयोगे ।

प्रातःसवने अच्छावाकशस्त्रं चतुर्विंशे महाव्रते च ' आ सुते सिञ्चत ' इति । ऐआ. ५।१।५.

प्रातःसवने अच्छावाकस्य परिधानीया ' आहं सरस्वतीवतोः । ' सा च युक्तियोगः । २९।७।२.

प्रातःसवने उन्नीयमानसूक्तं (मैत्रावरुणस्य) ऐन्द्रीर्गायत्रीरेव ' आ त्वा वहन्तु हरयः ' इत्यादयः । आदिमाः सप्तैवेति के चित्, तत्र । २८।१।१-१२.

प्रातःसवने नव ग्रहा गृह्यन्ते (धाराग्रहाः), नवभिः पवमाने स्तुवते । अग्निष्टोमे । ११।१।१.

प्रातःसवने प्रतिगरः ' शंसामो दैवोम् ' इति । १२।१।१.

प्रातःसवने प्रस्थितयाज्याः । २८।२।१–१० । प्रस्थितयाज्या शब्दे द० ।

प्रातःसवने बहिष्पवमानोत्तर आज्यशस्त्रं, ततः प्रउगम् । १०।५।१.

प्रातःसवने ब्राह्मणाच्छंसिनः अग्निष्टोमे परिधानीया ' स न इन्द्रः शिवः सखा ' इति । विकृतौ तु ' इन्द्रेण रोचना दिवः ' इति । २७।४।९.

प्रातःसवने ब्राह्मणाच्छंसिनः अहीने ' अयन्तरिक्ष ' इति पर्यासतृचः । ' इन्द्रेण रोचना दिवः ' इति परिधानीया । २९।७।२.

प्रातःसवने ब्राह्मणाच्छंसिशस्त्रं अग्निष्टोमे ' आ याहि सुषुमा हि ' इति । चतुर्विंशे महाव्रते च ' सुरूपकृत्नुमूतये ' इति । ऐआ. ५।१।५.

प्रातःसवने ब्राह्मणाच्छंसिशस्त्रस्य अग्निष्टोमे स्तोत्रियतृचः त्रिकद्रुकेषु महिषो, अनुरूपस्तृचः ' एन्द्रया ह्युप नः ' इत्येका, ' इन्द्राय हि द्यौः ' इत्येका

'ग्रोप्वस्मै' इत्येका इति मिलित्वा । प्रयोगे । प्रातःसवने 'भूरिन्द्रवन्तः स्तुध्वं' इति ब्रह्मा स्तोत्रप्रसवमाह । २५।९।५–६.

प्रातःसवने मन्द्रया वाचा शंसेत् । माध्यंदिने बलीयस्या वाचा । तृतीयसवने बलिष्ठतमया वाचा । उत्साहानुसारेण उत्तरोत्तरिण्या वाचा शंसेत् । १४।६।५.

प्रातःसवने माध्यंदिने च षष्ठेऽहनि प्रस्थितयाज्यानां पुरस्तात् प्रत्येकं एकैका पादच्छेपीं उपदध्यात् । २२।५।१-५.

प्रातःसवने मैत्रावरुणस्य अग्निष्टोमे अहीने च परिधानीया ते स्याम देव वरुण । ब्राह्मणाच्छंसिन. अग्निष्टोमे 'स न इन्द्रः शिवः सखा' इति, विकृतौ तु 'इन्द्रेण रोचना दिवः ।' अच्छावाकस्य अग्निष्टोमे गोमद्धिरण्यवत्, विकृतौ तु आह सरस्वतीवतो. इति । २७।४।२; ५।२.

प्रातःसवने मैत्रावरुणशस्त्रं अग्निष्टोमे 'आ नो मित्रावरुणा घृतैः' इत्यादि । ऐआ. ५।१।५ सायण. । चतुर्विंशे महाव्रते च 'ता नः शक्तं पार्थिवस्य' इति । ऐआ, ५।१।५ सायणः ।

प्रातःसवने याज्या अनवानम् । २७।५।६.

प्रातःसवने शस्त्रजप. होतुः 'उक्थं वाचि' इति चतुरक्षरम् । अध्वर्योः 'ओमुक्थशाः' इति चतुरक्षरम् । १२।१।२.

प्रातःसवने शस्त्राणां पुरस्तात् निविद्धानम् । ११।१०-११.

प्रातःसवने स्तोमविवृद्धौ अतिशंसन एकया द्वाभ्यां वा, नाधिकया । २७।५।७-८. २९।७।१०-११ सायणः ।

प्रातरनुवाकः । प्रैष. 'देवेभ्यः प्रातर्यावभ्यो होतरनुब्रूहि' इत्याहाध्वर्युः । महति रात्रे अनूच्य. पुरा वाचः प्रवदितोरनूच्यः, पुरा शकुनिवादादनुब्रूयात् । अथो खलु यदैवाध्वर्युरुपाकुर्यात् (प्रैषं दद्यात्) अथानुब्रूयात् ।७।५।१।१५। शतमनूच्यमायुष्कामस्य । त्रीणि च शतानि षष्टिश्चानूच्यानि यज्ञकामस्य । सप्त च शतानि विंशतिश्चानूच्यानि प्रजापशुकामस्य । अष्टौ शतान्यनूच्यानि अब्राह्मणोक्तस्य, यो वा दुरुक्तोक्तः शमलगृहीतो यजेत । सहस्रमनूच्यं स्वर्गकामस्य । अपरिमितमनूच्यं सर्वेषां कामानामवरुध्यै । सप्त आग्नेयानि छन्दांस्यन्वाह । छन्दःक्रमश्च गायत्री अनुष्टुप् त्रिष्टुप् बृहती उष्णिक् जगती पङ्क्तिः इति । सप्त उषस्यानि छन्दांस्यन्वाह । सप्त आश्विनानि छन्दांस्यन्वाह । ७।७।१–११। 'आपो रेवतीः' इत्यनया ऋचा आरम्भः । ७।६।१–६ । पच्छः अनूच्यः इति केचित् । अर्धर्चश एवानूच्यः इति सिद्धान्तः । ७।८।१–४ । 'अभूदुषा रुशत्पशुः' इत्युत्तमया परिदधाति । ७।८।२२। (आश्वला ४।१३–१५.)

प्रातरनुवाकस्य न्यूढस्य सतः अन्यूढत्वं बृहतीमध्यस्त्वात् । ७।८।५.

प्रातरनुवाके न्यूङ्खः प्रथमपादे द्व्यक्षरेण चतुर्थेऽहनि पृष्ठ्ये षडहे ।२१।३।१०.

प्रायणीया शय्वन्ता । १५।१।२.

प्रायणीये धाय्यारहिताः सामिधेन्यः पञ्चदश । १४।२।४.

प्रायणीयोदयनीये अग्निष्टोमे । होता एकः, देवताः, देशक्रमः, प्रयाजानां साम्याः प्रकाराः, याज्यानुवाक्याः प्रधानानां, सयाज्ये, प्रयाजानुयाजाः, पत्नीसंयाजास्तु न सन्ति, समिष्टयजुश्च नास्ति, प्रायणीयानिष्कासे, स्थाल्यां वा उदयनीयानिर्वापः, व्यतिषङ्गो याज्याऽनुवाक्यानां, द्रव्यं आदित्यश्चरुः प्रायणीयो भवति आदित्यश्चरुरुदयनीयः इतरेषां चतुर्णामाज्यम् । (आश्वला ६।१४।३) (तत्तच्छब्दे तत्तद्विशेषा द्रष्टव्याः) २।१–५.

प्रायश्चित्तं अग्नौ अग्नेरुद्धरणे । 'उद्धरणे' इत्यत्र, द्र० ३२।५।१.

प्रायश्चित्त अग्निदाहे । 'अग्नयः ग्राम्येण' इत्यत्र द्र० ३२।६।१.

प्रायश्चित्त अग्निनाशे । 'अग्निनाशे' इत्यत्र । 'अग्नीनां त्रयाणामपि उपशान्तौ' इत्यत्र द्र० ३२।४।८; ३२।७।४.

प्रायश्चित अग्निषु 'अन्तरागमने' इत्यत्र द्र० । १२।११।३,७.

प्रायश्चित्तं अग्निसंसर्गे । 'गार्हपत्याहवनीययोः' इत्यत्र, अग्निना ग्रयाणा' इत्यत्र, 'अन्यैराग्निभिः' इत्यत्र, 'अग्नीनां दिव्येनाग्निना' इत्यत्र, 'शवाग्निना' इत्यत्र च द्रष्टव्यम् । ३२।५–६.

प्रायश्चित्त 'अग्निहोत्रदोहकाले' इत्यत्र द्र० । धेनुः यदि उपविशेत्, यदि वाश्येत, यदि स्पन्देनेन पयः स्कन्दयेत् । २५।२।७–११; ३२।२।१-४.

(इत उत्तरं अवतरणचिह्नयुक्ते शब्दे तत्तत् प्रायश्चित्त द्रष्टव्यम्, पौनरुक्त्यभयात् अत्र न विवृतम्)

प्रायश्चित्त अग्निहोत्रहविषि अमेध्यपाते । 'अग्निहोत्रं अधिश्रितं अमेध्य' इत्यत्र । ३२।४।१.

प्रायश्चित्तं अमावास्यायाः पौर्णमास्याः वा 'अत्यये' ३२।७।३.

प्रायश्चित्तं 'अविज्ञातप्रायश्चित्त' । २५।७।५.

प्रायश्चित्तं 'अस्नातेन' अग्निहोत्रहोमे कृते । ३२।८।५.

प्रायश्चित्तं 'आग्रयणेनानिष्ट्वा' नवान्नप्राशने । ३२।८।१.

प्रायश्चित्त आरण्येनाग्निना विहारस्थाग्निना संसर्गे, अग्नये क्षामवते अष्टाकपालं निर्वपेत्, तस्य याज्याऽनुवाक्ये अक्रन्ददग्निः स्तनयन्, अधा यथा नः पितरः इति । आहुतिं वा आहवनीये जुहुयात् अग्नये क्षामवते स्वाहा इति । ३२।५।४.

प्रायश्चित्तं आर्त्विज्यदोषानिरासार्थं पृष्ठस्तोत्रे वामदेव्यसामगाने 'अभी षु णः सखीना षु', 'अविता जरितृणा ध,' 'शतं भवास्यूतिभिः यः' इति पुरुषपदाक्षराणि प्रक्षिप्य उद्गातारः गायेयुः । नित्येऽप्येतत् कर्तव्यम् । १५।२।६–१०.

प्रायश्चित्त आहिताग्निना उपवसथदिने 'अश्रुकरणे' । ३२।७।१.

प्रायश्चित्तं 'अधिश्रिते' अग्निहोत्रे, सान्नाय्ये, हवि षु वा आहिताग्नेर्मरणे ।३२।१।२.

प्रायश्चित्तं आहिताग्नेः उपवसथदिने 'अमत्याचरणे' ३२।७।२.

प्रायश्चित्त आहिताग्नेः उपवसथदिने मरणे । ३२।१।१.

प्रायश्चित्तं प्रवासे यजमानमरणे ।३२।१।४–६.

प्रायश्चित्त प्रवासे मरणेन अस्थ्यादीनामलाभे यदि शरीराणि (अस्थीनि) न विन्देरन् पर्णशरः कर्तव्यः । 'प्रेतास्थिविनाशे' । ३२।१।७–९.

प्रायश्चित्त आहिताग्नेः 'हविःषु वेद्यामासन्नेषु' मरणे । ३३।१।३.

प्रायश्चित्तं उद्धरणाभावे 'सूर्यास्तमये' 'सूर्योदये' च । ३२।११।१–२.

प्रायश्चित्तं ऋक्तः आर्तौ 'भूः' इति गार्हपत्ये जुहुयात्, यजुष्टः आर्तौ 'भुवः' इति यज्ञे आग्नीध्रीये हविर्यज्ञेषु च 'अन्वाहार्यपचने । सामतः आर्तौ 'स्वः' इत्याहवनीये । अविज्ञातायामार्तौ सर्वतो वा आर्तौ 'भूर्भुवःस्वः' इति सर्वाभिः आहवनीये एव ।२५।७।५। एतत् ब्रह्मा करोति । २५।९।४.

प्रायश्चित्त 'कपालनाशे' । ३२।८।२.

प्रायश्चित्त 'जीवति मृतशब्दश्रवणे' ।३२।८।७.

प्रायश्चित्त निविद्धानविस्मरणे । अन्यत् तद्दैवत्यं तच्छन्दस्कं सूक्तमाहृत्य तस्मिन् निविद दध्यात् । आहृतात् सूक्तात् प्राक् 'मा प्रगाम पथो वय' इति तृच सूक्त पठेत् । सैव तत्र प्रायश्चित्तिः । ११।११।१४–२२.

प्रायश्चित्त 'पवित्रकनाशे' । ३२।८।३.

प्रायश्चित्त प्रायः नाम नाशः तस्य चित्तं समाधानम् । प्रायश्चित्तिरपि तदेव । ३२।१।२ सायणः ।

प्रायश्चित्तं भिन्ने 'स्रुक्' इत्यत्र । ३२।४।७.

प्रायश्चित्त 'सूतकान्नभक्षणे' । ३२।८।६.

प्रायश्चित्तं स्त्रियां गवि वा 'यमलजनने' । ३२।८।८

प्रायश्चित्तं 'हविर्दोषादिविषये' । ३२।३।४; ४।१.

प्रायश्चित्त 'हिरण्यनाशे' । ३२।८।४.

प्रायश्चित्तानि त्रिचत्वारिंशत् उक्तानि । मरणे ३२।१। दोहविषये ।३२।२। हविर्दोषे ।३२।३। हविषि-अमेध्यपाते, स्कन्ने, स्खल्ने भ्रंशे वा, भिन्ने, अग्निनाशे ।

३२।४। उद्धरणविषये, अग्निसर्गे ।३२।५; ६।२-३। अग्नीना येन चिदन्येनाग्निना दाहे ।३२।६। अश्रुकरणे, अमत्याचरणे, यागालये, अग्नीना उपशान्तौ ।३२।७। आग्रयणाकरणे, कपालनाशे, पवित्रनाशे, हिरण्यनाशे, अस्नातेन होमे, सूतकान्नभक्षणे, जीवति मृतशब्दश्रवणे, यमलजनने। ३२।८.

प्रार्थनामन्त्रः, शान्तिमन्त्र। वाङ्मे मनसि प्रतिष्ठिता, मनो मे वाचि प्रतिष्ठितम्। आविराविर्म एधि, वेदस्य म आणी स्थः, श्रुतं मे मा प्रहासीः, अनेनाधीतेनाहोरात्रान् सन्दधामि, ऋतं वदिष्यामि, सत्यं वदिष्यामि, तन्मामवतु तद् वक्तारमवतु, अवतु मा, अवतु वक्तारमवतु वक्तारम्। ऐआ. २।२६।१.

प्रासादः=चातुरस्यम्। जगत्प्रासादाः जगतीछन्दस्कफलतुल्याः तृतीयसवनगताः प्रतिपदाग्राः। २८।४।-१५ सायन। वसिष्ठप्रासादाः निष्केवल्यस्य उत्तरः पक्षः। तमिमं वसिष्ठो मुनिः स्वतपसा संपादितवान्, अतोऽयं वसिष्ठप्रासादः। एवं भरद्वाजप्रासादः। ५।८।७.

प्रियङ्गुतण्डुला सोमपानि चमसे पात्रा वा चमसोप्यानि ऐन्द्रमहाभिषेके संभाराः। ३९।२-३.

प्रेङ्खसमारोपणकाले महाव्रते निष्केवल्य शंसनम्। तस्य फलक एकमेवेति के चित्, [illegible], द्वे इति सिद्धान्तः। द्वे फलके औदुम्बरे भूमिनिखातस्तम्भयोः। उद्ग्रथ्नाति स्थूणे भूमि [illegible] च ([illegible]) यथा न [illegible]। [illegible] दक्षिणावृतया सव्यावृतयेति उभयत्, दार्भ्यः। प्रेङ्खस्य [illegible] आ नमति भूमेरन्तरं इति के चित्। [illegible] इत्यन्ये। मुष्टि मात्रे इति सिद्धान्तः। [illegible] अभि [illegible] स्यात्। [illegible] अविरोहेत् [illegible]। [illegible] पादं भूमौ स्थापयेत्। प्रेङ्खं होता आरोहति। [illegible] औदुम्बरी [illegible]। होतकाः [illegible] अभिरोहन्ति। [illegible] प्रेङ्खमारोहेत्। [illegible] के चित्, [illegible] इत्यन्ये। [illegible] अवरोहेत् इति सिद्धान्तः। [illegible]। ऐआ. ५।७-८.

प्रेङ्खं होता दार्ढ्यपरीक्षणार्थं चालयति। 'भूतेभ्यस्त्वा' इति। पश्चार्धे फलके पाणी प्रतिष्ठापयति। 'प्राणमनु प्रेङ्खस्व' इति प्राञ्चं प्रेङ्खं प्रणयति। 'व्यानमन्वीङ्खस्व' इति तिर्यञ्चम्। अपानमन्वीङ्खस्व इत्यभ्यात्मम्। भूर्भुवःस्वरिति जपति। 'प्राणाय त्वा' इति प्राञ्चमेव पुनश्चालयति, व्यानाय त्वा इति तिर्यञ्चं, अपानाय त्वा इति अभ्यात्मम्। ऐआ. ५।४।८-१०.

प्रेङ्खः महाव्रते माध्यंदिने अध्वर्युभिरुपकल्पनीयः। ऐआ. ५।४।१ सायणः।

प्रेङ्खः महाव्रते माध्यंदिने सदःप्रवेशात् पुरस्तात् उपकल्प्यो भवति। स्थूणे रज्जू पीठमः इत्येतत् प्रक्षाल्य तीर्थेन प्रपाद्य उत्तरेणाग्नीध्रीयं परिसृज्य पूर्वया द्वारा सदः, अर्थात् पिण्डियानुचरेण। औदुम्बराणि काष्ठानि प्रेङ्खस्य भवन्ति, पालाशानि, मिश्राणि वा। तानि पल्कानि उभयतस्तष्टानि, द्वे वा, सूत्यश्च तावत्यः। इषुमात्रः प्राङ् प्रेङ्खः, निमुष्टिः (मुष्टिन्यूनेषुमात्रः) तिर्यङ् (प्राङ् = रुंदी, तिर्यङ् = लांबी)। उदगग्रः प्रागग्राभ्यां स्थूणाभ्यां प्रयुतः (प्रोतः=आत भरलें)। दक्षिणोत्तरे स्थूणे निखाय अभितो होतृषदनं पीठफलकयोरधस्तात् धारयन्ति। यजमानाय। प्रेङ्खफलके कुशाग्र ([illegible]) छिद्राणि भवन्ति, रज्जुभ्यामूर्ध्वमुद्ग्रथ्नाति, दक्षिणतो दक्षिणया (दक्षिणावृतया रज्ज्वा), उत्तरतः सव्यया (सव्यावृतया रज्ज्वा)। दार्भ्ये त्रिगुणे स्यातां रज्जू। अन्यतरस्मिन् पक्षप्रान्ते द्विगुणे, [illegible] त्रिः प्रदक्षिणं [illegible] निहवे (मुण्डा) करोति। शालाभिः दूर्वाभिर्वा प्रतिकर्षन्ति (पांघरूं अर्थात् पांघरतात) अग्र [illegible] यथा स्यात्। चतुरङ्गुलेन [illegible] ([illegible]) प्रेङ्खः स्यात् मुष्टिमात्रेण वा। [illegible] ([illegible])। प्रेङ्ख [illegible]। ऐआ. ५।१।२-१२.

[illegible] ([illegible]) [illegible]। [illegible] (१६०) [illegible]

शरीरमध्ये, ७०+७० सक्थिनी, २५+२५ ऊरू, शेषं (२०) शिरसि इति पुरुषरूपकक्लृप्तिः। ३२।१७-९.

प्रैयमेधाः (प्रियमेधपुत्राः) ऋषयः उदमयं नाम अङ्गराजपुरोहितं अयाजयन्। ३९।८।४.

प्रैषः। अग्निप्रणयने 'अग्नये प्रणीयमानायानुब्रूहि' इत्याहाध्वर्युः। ५।२।१। अग्निमन्थनीयाऽनुवचने 'अग्नये मथ्यमानायानुब्रूहि' इति। ३।५।२। अग्निहोत्रे उद्धरणे 'उद्धराहवनीयं' इति। २५।१।१२। अग्नीषोमप्रणयनीयासु अग्निष्टोमे 'अग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रूहि' इति। ५।४।१। अग्निगौ मैत्रावरुणं प्रति, 'उपप्रेष्य होतर्हव्या देवेभ्यः' इति। ६।५।६। उच्छ्रयणे यूपस्य 'यूपायोच्छ्रीयमाणायानुब्रूहि' 'उच्छ्रीयमाणायानुब्रूहि' इति वा (आश्वलायनः)। ६।२।६· सायणः। घर्मसंभरणविधौ (प्रवर्ग्याभिष्यवने) 'ब्रह्मन् प्रवर्ग्येण प्रचरिष्यामो होतरभिष्टुहि' इति अध्वर्युः प्रतिप्रस्थाता च। ४।१।३। पशुप्रयाजस्य उत्तमस्य 'होता यक्षदग्निं स्वाहा०' इति प्रैषसूक्ते अन्तिमः। ७।३।१-२ सायणः। पशोः पर्यग्निकरणानुवचने 'पर्यग्नये क्रियमाणायानुब्रूहि' इति। ६।५।१। प्राचीनवंशे सोमे नीयमाने 'सोमाय क्रीताय प्रोह्यमाणायानुब्रूहि' इति। ३।२।१। प्रातरनुवाके 'देवेभ्यः प्रातर्यावभ्यो होतरनुब्रूहि' इति।७।५।१। मनोताऽनुवचने 'मनोतायै हविषोऽवदीयमानायानुब्रूहि' इति। ६।१०।१। यूपस्याञ्जनानुवचने 'अञ्जो यूपमनुब्रूहि' इति। ६।२।१। यूपस्य परिव्याणे 'यूपाय परिवीयमाणायानुब्रूहि' इति।६।२।१२। षष्ठेऽहनि ऋतुयाजेषु मैत्रावरुणेन ऋक्शिरस्कप्रैषमन्त्रोत्तरं पठनीयः,न तु अग्निष्टोमे इव केवलप्रैषमन्त्रोत्तरम्। २२।४।१-६। सोमप्रोहणानुवचनीयासु 'सोमाय क्रीताय प्रोह्यमाणायानुब्रूहि'। ३।२।१। स्तोकानुवचनीयासु वपां स्रुवेणाभिघारयन्नाहाध्वर्युः, 'स्तोकेभ्योऽनुब्रूहि' इति।७।२।१-२। हविर्धानप्रवर्तनीयासु 'हविर्धानाभ्यां प्रोह्यमाणाभ्यामनुब्रूहि' इति। ५।१।१। प्रशास्तिष्ठन् प्रेष्यति। ११।१।५-८.

प्रैषसूक्ते (५।१,८) पोत्रः मधुयाजी, उभये मतौ। १५।५।६.

प्रोहणं (शकटेन नयनं) सोमस्य क्रीतस्य प्राग्वंशे अग्निष्टोमे।३।१-३.

प्लक्षस्य फलानि चमसे पात्र्यां वा समोप्यानि ऐन्द्रमहाभिषेके सभारः। ३९।२-३.

फलकानि प्रेङ्खस्य त्रीणि द्वे वा उभयतष्टानि महाव्रते माध्यंदिने निष्कैवल्यार्थम्। ऐआ. ५।३।५.

फलचमसः क्षत्रियस्य। न्यग्रोधावरोहान् औदुम्बर-आश्वत्थ-प्लाक्षाणि च फलानि पुरस्तादुपक्लृप्तानि भवन्ति। अथ सोमं राजानं क्रीणन्ति। राज्ञ एवावृता (रीत्या) उपवसथपर्यन्तं चरेत् (पूजयेत् फलानि)। यदा राजानं प्रातरभिषुण्वन्ति तदा एतानि द्वेधा विगृह्णीयात्, एकं भागमभिषुणुयात् अपरं भागं माध्यंदिनाय परिशिंष्यात्। ३५।६।४ चमसान् यदा उन्नयेयुः, तदा यजमानचमसमुन्नयेत्, तस्मिन् द्वे दर्भतरुणके प्रास्ते स्याताम्। तयोः पूर्वं (एकं दर्भं) वषट्कृते अन्तःपरिधि प्रास्येत् दधिक्राव्णो अकारिषं इत्येतयर्चा सस्वाहाकारया। अनुवषट्कृते अपरं (दर्भं) 'आ दधिक्राः शवसा' इति। यदा एतांश्चमसानाहरेयुः तद् एतं यजमानचमसमाहरेत्। तान् यदा उद्गृह्णीयुः तद् एनं उपोद्गृह्णीयात्। यदा होता चमसं भक्षयेत् अथैनं 'यदत्र शिष्टं रसिनः' इति भक्षयेत् (क्षत्रियो वैश्यो वा यजमानः)। 'श न एधि हृदे०' इत्यात्मनः प्रत्यभिमर्शः। 'आप्यायस्व समेतु ते, सं ते पयांसि' इति द्वाभ्यां चमसमाप्याययति।३५।७।१-७। तथा च, फलचमसस्य उन्नयनं, होमः, भक्षः, आत्मस्पर्शः, आप्यायनं, आसादनं, प्रकम्पनं, नाराशंसचमसभक्षणं, आत्मस्पर्शः, आप्यायनं इति कर्माणि भवन्ति, मन्त्रास्तु सोमचमसादन्ये। ३५।८।१।६.

फलचमसकर्तारो महाक्षत्रियाः तदनुज्ञापका ऋषयश्च।

ऋषयः	राजानः
रामो मार्गवः श्यापर्णः	विश्वंतरः सौषद्मनः
तुरः कावषेयः	जनमेजयः पारिक्षितः

पर्वतनारदौ	सौमकः साहदेव्यः सहदेवः सार्ञ्जयः (सृञ्जय) बभ्रुः दैवावृधः भीमः वैदर्भः नग्नजित् गान्धारः
अग्निः	सनःश्रुतः अरिंदमः क्रतुविद् जानकिः
वसिष्ठः	सुदाः पैजवनः

३५।८।७-१०.

पलाशमसप्रशंसा । महाराजो भवति । आदित्य इव श्रियां प्रतिष्ठितस्तपति । सर्वाभ्यो दिग्भ्यो बलिमावहति । उग्रं हास्य राष्ट्रमव्यथ्यं भवति । ३५।८-९.

वद्वम् = कोटिशतम् । ३९।८।४ । वद्व वृन्द इति पर्यायौ ।३९।९।३ सायणः । द्वेद्वे सहस्र वद्वानाम् । ३९।८।४। शतं वद्वानि सप्त च गजान् ददौ ।३९।९।३। बद्वशो गा विभेजिरे सहस्र ब्राह्मणाः ।३९।९।४। श्रीमद्भागवते टीकायां श्रीधरेस्तु वद्व = १३०८० इति संख्या उक्ता ।

बहिष्पवमानस्य उपास्मै गायता नरः इति स्तोत्रियः । १२।३।१.

बहिष्पवमाने नवभिर्ऋग्भिः स्तुवते उद्गातारः । उपास्मै, दविद्युतत्या, पवस्व इति त्रयस्तृचाः । तत आश्विनो ग्रहो गृह्यते दशमत्वेन, हूयते च तृतीयत्वेन । ११।१।१.

बहिष्पवमाने होता सर्पेदित्येके, न सर्पेदिति सिद्धान्तः किंतु उपविष्टासीनः 'यो देवानामिद', 'मुग्धमसि मुग्धं भूयासं' इति चानुमन्त्रयेत । ८।४।१-९.

बहिष्पवमानोत्तरं आश्विनस्य ततः प्रउगम् । १०।५।१.

बहुपत्नीकस्य पुरुषस्य, एकपतिकस्य च स्त्रियाः । 'तस्मादेकस्य बह्व्यो जाया भवन्ति नैकस्यै बहवः सह पतयः'। न तु विपर्ययेण एकस्याः स्त्रियाः बहवः पतयः परस्परैकमत्येन वर्तमाना दृश्यन्ते इति सायणः (बहवः पत्न्यः ऐकमत्येन वर्तमाना दृश्यन्ते वा नवेति ! इति पृच्छति लेखकः) ।१२।११२।१.

बार्हती तृचाशीतिः महाव्रते निष्केवल्ये शस्ते । 'मा चिदन्यद्विशंसत' इति एकयानत्रिंशत् (२९), पिबा सुतस्य रसिनः इति विंशतेः सप्तमीं चाष्टमीं चोद्धरति, 'यदिन्द्र प्रागपागुदक्' इति चतुर्दश, वयं घत्वा सुतावन्तः इति पञ्चदश, मो षु त्वा वाघतश्चन इत्येतस्य द्विपदां चोद्धरति राथंतरं च प्रगाथं (अभित्वा शूर इति ऋग्द्वयमुद्धरति) । अथ हास्य नकिः सुदासो रथ इत्येतं प्रगाथमुद्धृत्य (तस्य स्थाने) त्वामिदा ह्यो नरः इत्येतं प्रगाथं प्रत्यवदधाति, अभि प्र वः सुराधसं इति षड् वालखिल्यानां सूक्तानि, यः सत्राहा विचर्षणिः इति (त्वामिद्धि हवामहे इति सूक्तस्य द्वादशप्रगात्मकः)-शेषः, अय ते अस्तु हर्यतः इति सूक्ते (अयं ते, आमन्द्रैः इति द्वे सूक्ते इत्यर्थः), उभयं शृणवच्च नः इति (सूक्तं, तत्र) सप्तमीं चाष्टमीं चोद्धरति, तरोभिर्वो विदद्वसुं (इति सूक्त, तत्र) उत्तमामुद्धरति, यो राजा चर्षणीना इत्येकादश, सं घो दस्ममृतीषहं (सूक्तं), आ नो विश्वासु हव्यः (सूक्तं), या इन्द्र भुज आभर इति नव, षडदोहाः । इति । ऐब्रा. ५।१०।१-३.

बृसी=बृचंः तृणवंशशलाकादिनिर्मितः आसनविशेषः । ऐब्रा. । १।८।१३ सायणः । तपस्विनामासनार्थं तृणवल्लीतालपत्रवेणुदलादिनिर्मितः अल्पः पटविशेषः । ऐब्रा. ५।३।९ सायणः ।

बृहतः अनुरूपः प्रगाथः त्वं ह्येहि चेरवे इति । २०।३।११.

बृहतः योनिः प्रगाथः त्वामिद्धि हवामहे । २०।३।११.

बृहतः पक्षाणाम् वैराजस्य सृष्टिः रैवतस्य च । १९।६।२,४.

बृहतीसहस्रं महाव्रते निष्केवल्ये शस्त्रे (अत्र साक्षात् ऋचां सहस्रं नास्ति, किं तु अक्षरादिगणनयैव कदा चित् पूरणम्) । ऐब्रा. २।१२.

बृहद्दिवं नाम सूक्तं 'तदिदास भुवनेषु ज्येष्ठं' इति। तच्च महाव्रते चतुर्विंशाख्ये द्विषष्टिरात्रे महाव्रताख्ये च उत्तरविषुवति समानं निष्केवल्ये शस्त्रे १७।८।१-२.

बृहद्रथंतरयोर्विकल्पश्चतुर्विधः ।१०।७।१-७.

बृहस्पतिर्ह वै देवानां पुरोहितः, तमनु अन्ये मनुष्यराज्ञां पुरोहिताः । ४०।२।४.

बृहस्पतेः सृष्टिः । प्रजापतेः रेतःपिण्डस्य प्रदीप्तस्य अङ्गाराः पुनरवशान्ताः उददीप्यन्त तद् बृहस्पतिरभवत् । १३।१०।१.

बैल्वः यूपः अन्नाद्यकामस्य पुष्टिकामस्य च । ६।१।६–९.

ब्रह्मचारिपुंश्चल्योः संप्रवादः महाव्रते । स च सामब्राह्मणे दर्शितः । ऐआ. ५।५।१३.

ब्रह्मजपः प्रवर्ग्ये ' विश्वा आशा दक्षिणसात् ' इत्यादिः सौत्रो मन्त्रः ।४।५।७.

ब्रह्मणः जीवरूपेण शरीरे प्रवेशः।ऐआ।२।२·।७–८.

ब्रह्मणः परिमरोपासना तदङ्गजपश्च पुरोहितस्य । ४०।५।१–२०.

ब्रह्मणः षष्ठ्या श्रोणिः पशुभागः सत्रे ।३१।१।१२.

ब्रह्मणे यजमानस्य क्षत्रियस्य (वैश्यस्य च) भागो देयः दीक्षणीयादिषु । अग्नौ हैके जुह्वति ' प्रजापते विभान्नाम लोकः० ' इति मन्त्रेण, तन्न तथा । ३४।८।१–६.

ब्रह्मत्वम् । यदेतत् त्रय्यै विद्यायै शुक्र (व्याहृतित्रय) तेन ब्रह्मत्वमकरोत् । २५।७।३ । केन ब्रह्मत्वं क्रियते इति (प्रश्ने) त्रय्या विद्यया इति ब्रूयात् । २५।८।१ । यदि यज्ञे ऋक्त आर्तिर्भवति, भूरिति गार्हपत्ये जुहवाथ, यदि यजुष्टः, भुव इत्याग्नीध्रीये (सोमे) अन्वाहार्यपचने वा हविर्यज्ञेषु ।, यदि सामतः, स्वरित्याहवनीये, यद्य, विज्ञाता सर्वव्यापद् वा, भूर्भुवःस्वरिति आहवनीये एव जुहवाथ । २५।७।५ । ब्रह्मा उपाकृते प्रातरनुवाके वाचंयमः स्यात् आ उपांश्वन्तर्यामयोर्होमात्, उपाकृतेषु पवमानेषु आ उदृचः (समाप्तिपर्यन्तम्) , अथ यानि स्तोत्राणि सशस्त्राणि आ तेषां वषट्कारात् । प्रस्तोता उपाकृते स्तोत्रे आह ' ब्रह्मन् प्रस्तोष्यामः प्रशास्तः' इति,-स भूरिति ब्रह्मा प्रातःसवने ब्रूयात्, भुव इति माध्यंदिने, स्वरिति तृतीयसवने, भूर्भुवः स्वरित्युक्थ्ये वा अतिरात्रे वा ब्रूयात् । प्रत्येकान्ते च ' इन्द्रवन्तः स्तुध्वं ' इति ब्रूयात् । २५।९।५.

ब्रह्मवर्चसकामः अपोनप्त्रीये एकधनासु अमूर्या उप सूर्ये इत्यनया अनुप्रपद्येत । ८।२।२२.

ब्रह्मवर्चसकामस्य पालाशो यूपः । ६।१।१०–१३.

ब्रह्मा ऋत्विक् ब्रह्मिष्ठः स्यात् । ऐआ ।३।९।६.

ब्रह्माणं नमस्करोति त्रिः अधस्तादासीनो राजा, ' नमो ब्रह्मणे नमो ब्रह्मणे नमो ब्रह्मणे ' इति । यज्ञाङ्गराजाभिषेके । ३७।५।५६.

ब्रह्मा होत्रकाश्च कूर्चान् समारोहन्ति महाव्रते । ऐआ. ५।४।१६.

ब्रह्मोद्यं = ब्राह्मणाना उच्च संवादः । अग्निर्गृहपतिरिति हैक आहुः इत्यादिः । अविवाक्ये दशमेऽहनि । २४।६।२२.

ब्राह्मणः आदायी (प्रतिग्रहधर्मा) आपायी (सोमपायी याजनधर्मा) आवसायी (परगृहे भोजनयाचनधर्मा) यथाकामप्रयाप्यः (कोणी हि धुडकावून लावावें, घरानून घालवून द्यावें असा) ।३५।३।२.

ब्राह्मणः क्षत्रियात् भूयान् । ३३।३।८.

ब्राह्मणः देवयजन (यज्ञभूमिं) क्षत्रियं याचते । ३४।२।१.

ब्राह्मणः विद्वान् राज्ञो राष्ट्रगोपः पुरोहितः । ४०।२.

ब्राह्मणस्पत्यः प्रगाथः अग्निष्टोमे, छन्दोमतृतीयेऽहनि पृष्ठ्ये षडहे तृतीये षष्ठे चाहनि 'प्र नूनं ब्रह्मणस्पते ' इति। छन्दोमद्वितीयेऽहनि, पृष्ठे षडहे द्वितीये पञ्चमे चाहनि ' उत्तिष्ठ ब्रह्मणस्पते' इति । छन्दोमप्रथमेऽहनि, पृष्ठे षडहे प्रथमे चतुर्थे चाहनि 'प्रैतु ब्रह्मणस्पते' इति । २०।१।९; २०।३।७; ३०

ब्राह्मणस्य अग्निप्रणयने गायत्री प्रथमा ' प्र देवं देव्या धिया ' इति । ५।२।२–३.

ब्राह्मणस्य अब्राह्मणत्वेन शिष्टहस्तस्य अग्निष्टोमे प्रातःसुवाके अष्टौ शतानि ऋचा अनूच्यानि अब्राह्मणोक्तः = राजसेवाधिकारी । ७।७।६.

ब्राह्मणाः हुतादा. आर्त्विज्यात् । ३४।१।११.

ब्राह्मणाना सोमो भक्षः, न क्षत्रियवैश्ययोः । ३५।३।२०.

ब्राह्मणाना सृष्टिर्यज्ञमनु । हुतादः प्रजाः, यद्

ब्राह्मणा । ३४।१।१

ब्राम्हणस्पत्य प्रगाथ अग्निष्टोमे, छन्दोमतृतीयेऽहनि, पृष्ठ्ये षडहे तृतीये षष्ठेचाहनि 'प्र नून ब्राम्हणस्पति' इति । छन्दोमद्वितीयेऽहनि, पृष्ठ्य षडहे द्वितीये पञ्चमे चाहनि 'उत्तिष्ठ ब्राम्हणस्पते' इति । छन्दोमतृतीयेऽहनि, पृष्ठ्ये षडहे प्रथमे चतुर्थे चाहनि 'प्रैतु ब्रम्हण स्पति' इति ।२०।१।९ २०।३।७, इ

ब्राह्मणाच्छंसिन अग्निष्टोमे प्रात सवने परिधानीया 'स न इन्द्र शिव सखा' इति, विकृतौ 'इन्द्रेण रोचना दिव' इति । उभयत्र माध्यंदिने 'एवेदिन्द्र वृषणम्' । उभयत्र तृतीयसवने 'बृहस्पतिर्न परिपातु'। २७।५.

ब्राह्मणाच्छंसिन अहरह शस्य उदु ब्रह्माण्यैरत इति वासिष्ठ षड्ऋच सपातादुपरिष्टात् ।२९।४।७ १२। अहरह शस्ये सूक्त प्रतिपत् ऋक् 'ब्रह्मणा ते ब्रह्म युजा' ।२९।६।४। अहीनसूक्त माध्यंदिने अस्मा इदु प्र तवसे । चतुर्विंशे, अभिजिति, विषुवति, विश्व जिति, महाव्रते च ।२९।२।५,८। अहीने परिधानीया 'एवेदिन्द्रम्' ।२९।६।८-१०। अहीने प्रात सवने 'व्यन्तरिक्ष' इति पर्यासस्तृच., 'इन्द्रेण रोचना दिव' इति परिधानीया युक्तिर्नाम । माध्यंदिने 'एवेदिन्द्रम्' इति परिधानीया विमुक्तिर्नाम ।२९।६।२। उक्थ्ये तृतीयसवने आरम्भणीय सूक्त जागत 'प्र मंहिष्ठाय' ।२८।७।१। ऐन्द्रे शस्त्रे अहर्गणेषु आरम्भणीया 'इन्द्र वो विश्वतस्परि' । २७।३।१-६। चतुर्थेऽहनि आवापिकस्तृच तुभ्येदिमा सवना, प्र वो महे महि वृधे, उरु त्वचसे महिने इति विराज । हरीन्वस्य, यदा वज्र, सोचिन्नु वृष्टिर् इति तृच वैमद । पञ्चमेऽहनि शिग्मिन् यजाना, निष्वापया, सस नु त्वा इति तृच पाङ्क्त । षष्ठेऽनि विश्वेषु हि त्वा, वि त्वा ततस्रे, विष्टुष्टे अस्य वीर्यस्य इति तृच पारुच्छेप ।२९।३।८-९। परिधानीया बृहस्पतिर्न परि पातु ।२८।७।६। प्रात सवने प्रस्थित याज्या इन्द्र त्वा वृषभ वयम् । २८।२।१। माध्यंदिने प्रस्थितयाज्या 'एवा पाहि प्रत्नथा' २८।३।९। तृतीयसवने प्रस्थितयाज्या 'इन्द्रश्च सोम पिबतम्'। २८।४।८। माध्यंदिने द्वे सूक्ते शसनीये इन्द्र पूर्भित्, उदु ब्रम्हाणि । २८।५।६। व्यन्तरिक्षमतिरत् इति सूक्ते तृतीया 'इन्द्रेण रोचना दिव' इति परिधानीया अहीने प्रात सवने ।२७।४।३-९। षष्ठेऽहनि शिल्पशस्त्रे नाभाकस्तृच 'पूर्वीष्ट इन्द्रोप' । २९।८।१-३। स्तोम विवृद्धौ आवापिक सूक्त 'वने न वा यो न्यधायि'। २९।३।१०-११

ब्राह्मणाच्छंसिन सव्य सक्थि पशुभाग सवे । ३१।१।२,

ब्राह्मणाच्छंसिशस्त्र अग्निष्टोमे प्रात सवने । ऐन्द्रम् । प्रतिपत् तृच 'आ याहि सुषुमा' इति । अनुरूप तृच 'आ नो याहि' । सूक्त त्रयोदशर्चं 'आ याहि सुषुमा' (इत्यनुवर्तते) । सूक्त नवर्चं 'इन्द्र त्वा वृषभ' इति । सूक्त तृच उद्घेदभि श्रुता इति, तत्र तृतीया परिधानीया । प्रयोगे । एआ. ५।१।५ सायण ।

ब्राह्मणाच्छंसिशस्त्र अग्निष्टोमे माध्यंदिने । प्रतिपत् प्रगाथ 'न वो दस्ममूतीषह' इति, अनुरूप प्रगाथ तत्वा यामि सुवीर्यम्, प्रगाथ ऐन्द्र. उदु त्ये मधुमत्तमा, सूक्त ऐन्द्र इन्द्र पूर्भिदातिरत् एकादशर्चम्, सूक्त ऐन्द्र 'उदु ब्रह्माण्यैरत' तत्र षष्ठी परिधानीया । प्रयोगे।

ब्राह्मणाच्छंसिशस्त्र चतुर्विंशेऽहनि महाव्रते च प्रात सवने 'सुरूपकृत्नु' इति । ऐआ ५।१।५.

ब्राह्मणाच्छंसिशस्त्र महाव्रते प्रात सवने । प्रतिपत् तृच त्रिकद्रुकेषु महिषो, अनुरूप तृच एन्द्र याह्युप न इत्येका, इन्द्राय हि द्यौरसुरो इति द्वितीया, प्रोष्वस्मै पुरोरथ इति तृतीया । इद ब्राह्मणान्तरानुसारेण । ऐआ ५।१।७.

ब्राह्मणाच्छंसिशस्त्रे उक्थ्ये क्रतौ 'उदप्रुतो न वयो' इति द्वादशर्चं सूक्त, अच्छा इन्द्र मतय इत्येकादशर्चं सूक्त च शसनीयम् । १५।५।२.

ब्राह्मणाच्छंसिशिल्प षष्ठेऽहनि । सुकीर्ति शसति 'अप प्राच' । वृषाकपिं शसति पाङ्क्त 'विहि सोतो रसृक्षत' न्यूङ्खयति । वृषाकपिसूक्त पञ्च शस्यम् । ३०।३।१-५ । कुन्तापसूक्त त्रिंशदृच, तत्र नाराशंसीस्तिस्र प्रगाह (पादे पादेऽवसाय) शसति, रैभी

स्तिस्रः प्रगाहं शंसति, पारिक्षितीश्चतस्रः प्रग्राहं शंसति, कारव्याश्चतस्रः प्रग्राहं शंसति । नाराशंस्यादिषु न्यूङ्खो न कर्तव्यः, निनर्दस्तु कर्तव्यः । दिशां क्लृप्तीः पञ्च अर्धर्चशः शंसति, जनकल्पाः षट् अर्धर्चशः शंसति, अत्रोभयत्र न्यूङ्खो निनर्दश्च न कर्तव्यौ । इन्द्रगाथाः पञ्च अर्धर्चशः शंसति, न्यूङ्खनिनर्दौ न स्त एव । ३०।६। ऐतशप्रलापं सप्ततिसंख्याकपदसमूहात्मकं पदावग्राहं शंसति, तस्योत्तमेन पदेन प्रणौति । प्रवह्लिकाः षट् अर्धर्चशः शंसति । आजिज्ञासेन्याः चतस्र ऋचः अर्धर्चशः शंसति । प्रतिराधं पदत्रयात्मकं मन्त्रं शंसति । अतिवादं मन्त्रं अर्धर्चशः शंसति । ३०।७। देवनीथं सप्तदशपदात्मकं पदावग्राहं शंसति, तस्योत्तमेन पदेन प्रणौति । ३०।८-९ । भूतेच्छदास्तिस्रः अर्धर्चशः शंसति । आहनस्याः दश शंसति, ताः न्यूङ्खयति । दधिक्राव्णो अकारिषमिति दाधिक्रीं शंसति । सुतासो मधुमत्तमाः इति पावमानीस्तिस्रः शंसति । अव द्रप्सो अंशुमतीं इति ऐन्द्राबार्हस्पत्यं तृचं शंसति । ३०।१०.

ब्राह्मणाच्छंसी उक्थ्ये तृतीयसवने प्रमंहिष्ठाय इति ऐन्द्राबार्हस्पत्यं शंसति । तस्य स्तोत्रियानुरूपौ ऐन्द्रौ 'वयमु त्वा, यो न इदं' इति । २८।६।१०.

ब्राह्मणाच्छंसी महाव्रते प्रातःसवने स्वशस्त्रान्ते ईङ्खयन्तीरपस्युवः इति पञ्चर्चे सूक्तमावपेत । माध्यंदिने 'आ नो विश्वासु हव्य' इति स्वशस्त्रान्ते 'तीव्रस्याभिवयसः' इति पञ्चर्चे सूक्तमावपेत । ऐआ. ५।१।६.

भक्षः आदित्यग्रहस्य नास्ति । १३।५।१२.

भक्षः उक्थ्यपात्रादीनां, आहरति अध्वर्युरुक्थ्यपात्रमतिग्राह्यान् चमसांश्च, भक्षं प्रतिख्याय (ज्ञात्वा) होता प्राङ् प्रेङ्खादवरोहति, अथैतं प्रेङ्खं प्रत्यञ्चमवघ्नन्ति यथा शंसितारं भक्षयिष्यन्तं नोपहनिष्यति, प्रेङ्खस्यायतनमासीनो होता भक्षयति, अथ तदुक्थ्यपात्रं होता उपसृष्टेन (अनुज्ञापूर्वकेण, जनेन भक्षयति 'वाग्देवो सोमस्य तृप्यतु । सोमो मे राजाऽऽयुः प्राणाय वर्धतु । स मे प्राणः सर्वमायुर्दुहां महत्' इति । ऐआ. ५।१३।९-१३.

भक्षः द्विदेवत्यग्रहाणां, ऐन्द्रवायवस्य मैत्रावरुणस्य पुरस्तात् प्रत्यञ्च, आश्विनस्य तु सर्वतः। परिहारं (स्वशिरः प्रदक्षिणीकृत्य) । एष वसुः पुरूवसुरिह वसुः इत्यादिमन्त्रेण ऐन्द्रवायवं भक्षयति, एष वसुर्विदद्वसुः इत्यादिना मैत्रावरुणं भक्षयति, एष वसुः सयद्वसुः इत्यादिना आश्विनं भक्षयति ।९।३।२-८.

भक्षः पात्नीवतग्रहस्य, आग्नीध्रः नेष्टुरुपस्थमासीनो भक्षयति । २६।३।१०-११.

भक्षः प्रवर्ग्ये, पावकशोचे तव हि क्षयं परि इति भक्षमाकाङ्क्षते । 'हुतं हविर्मधु हवि० मा मा हिंसीः' इति घर्मस्य भक्षयति । ४।५।९-१०.

भक्षः सावित्रग्रहस्य नास्ति । १३।५।४.

भरतः दौःषन्तिः ऐन्द्रेण महाभिषेकेण समन्तं पृथिवीं जयन् परीयाय अश्वेन च मेध्येनेजे । ३९।९।१-७.

भरतद्वादशाहः । तस्य अहःक्लृप्तिः । अतिरात्रः, अग्निष्टोमः, अष्टौ उक्थ्याः, अग्निष्टोमः, अतिरात्रः इति । १९।१।१-६.

भरद्वाजः मधुलर्षिः प्राणदृष्ट्या उपास्यः । ऐआ. ११।१०.

भरद्वाजप्रमाहः । भरद्वाजेन संपादितः महाव्रते निष्केवल्यस्य उत्तरः पक्षः, बार्हतः, सप्तदशस्तोमः द्विशतम् (१०२)। ऐआ. ५।८।७.

भरद्वाजो वै ऋषीणामनूचानतमः दीर्घजीवितमः तपस्वितम आस । ऐआ. १।६।८.

भर्गः नाम राजा, तस्य गोत्रापत्यं क्रिरिशस्य पुत्रः सुत्वा नाम । तस्य शत्रुभूताः पञ्च राजानः परिमरमन्त्रपाठात् परिमम्रुः । ४०।९।१८.

भागाधिकारिणे भागादाने अदातुर्नाशः । 'यो वै भागिनं भागान्नुदते चयते (न्यावयति) वैनं, स यदि वैनं न चयते, अथ पुत्रमथ पौत्रं, चयते त्वेवैनम्। ६।७।४.

भिन्ने प्रायश्चित्तं 'सुक्' शब्दे द्र० । ३२।४।१.

भूतानां मैथुनं (मागधपुंश्चल्योः) उत्तरस्या वेदिश्रोण्या परिश्रिते । महाव्रते । ऐआ. ५।५।१३.

भूतेच्छदः नाम मन्त्राः ब्राह्मणाच्छंसिशिल्पे पठ्य-

महाँमिन्द्र, महाश्चिरत्यमिन्द्र, पिबा सोम मभि य, महाँइन्द्रो एवदा, सूक्त जागत ऐन्द्र निविध्दान तमस्य द्यावापृथिवी इति। २३।३।१०-२०.

मरुत्वतीय शस्त्र छन्दोमतृतीयेऽहनि। प्रतिपत् तृच तंतमिद्राधसे। अनुचर तृच अय इन्द्रस्य सोमा। इन्द्रनिहव. प्रगाथ इन्द्र नेदीय। ब्राह्मणस्पत्य प्रगाथ प्र नून ब्रह्मण। धाय्या अग्निर्नेता, त्व सोम, पिन्व न्त्यप। मरुत्वतीय प्रगाथ नकि सुदासो। सूक्तानि त्रैष्टुभानि चत्वारि इन्द्र स्वाहा पिबतु, गायत् साम न भन्य, तिष्ठा हरी रथ आ, इमा उ त्वा पुरुतमस्य। सूक्त जागत निविध्दान प्रमदिने पितुमदर्चता। २४।१। ११-१८.

मरुत्वतीय शस्त्र पृष्ठ्ये षडहे प्रथमेऽहनि। प्रतिपत् तृच आ त्वा रथ यथोतये। अनुचर तृच इद वसो सुतमन्ध.। इन्द्रनिहव प्रगाथ इन्द्र नेदीय। ब्राह्मण स्पत्यः प्रगाथ प्रैतु ब्रह्मण। धाय्या अग्निर्नेता, त्व सोम पिन्वन्त्यप। मरुत्वतीय प्रगाथ प्र व इन्द्राय बृहते। सूक्त निविध्दान आयात्विन्द्रोऽवस। २०।१।७ १२

मरुत्वतीय शस्त्र द्वितीयेऽहनि। प्रतिपत् तृच विश्वा नरस्य वस्पतिम्। अनुचर तृच इन्द्र इत् सोमपा। इन्द्रनिहव प्रगाथ इन्द्र नेदीय। ब्राह्मणस्पत्य प्रगाथ। उत्तिष्ठ ब्रह्मण। धाय्या. अग्निर्नेता, त्व साम, पिन्व न्त्यप। मरुत्वतीय प्रगाथ बृहदिन्द्राय गायत। सूक्त निविद्धान इन्द्र सोम सोमपते। २०।३।६-१०.

मरुत्वतीय शस्त्र तृतीयेऽहनि। प्रतिपत् तृच ततमिद्राधसे। अनुचर तृच अय इद्रस्य सोमा। इन्द्रनिहव प्रगाथ इन्द्र नेदीय। ब्राह्मणस्पत्य प्रगाथ प्र नून ब्रह्मण। धाय्या अग्निर्नेता, त्व सोम, पिन्वन्त्यप। मरुत्वतीय प्रगाथ नकि सुदासो। सूक्त निविद्धान त्र्यर्यमा मनुषो। २११।१।१३-१७

मरुत्वतीय शस्त्र चतुर्थेऽहनि। प्रतिपत् तृच त त्वा य शोभे। अनुचर तृच इद वसो सुत। इन्द्रनिहव प्रगाथ इन्द्र नेदीय। ब्राह्मणस्पत्य प्रगाथ प्रैतु ब्रह्मण। धाय्या अग्निर्नेता, त्व सोम, पिन्वन्त्यप। मरुत्वतीय प्रगाथः प्र व इन्द्राय बृहते। सूक्त श्रुधी हवमिन्द्र। सूक्त त्रैष्टुभ मरुत्वाँ इन्द्र। निविद्धान तृच. पर्यास. गायत्र इम नु मायिनम्। २१।४।११-१८.

मरुत्वतीय शस्त्र पञ्चमेऽहनि। प्रतिपत् तृच यत् पाञ्चजन्यया। अनुचर तृच इन्द्र इत् सोमपा। इन्द्रनिहव प्रगाथ इन्द्र नेदीय। ब्राह्मणस्पत्य प्रगाथ उत्तिष्ठ ब्रह्मण। धाय्या अग्निर्नेता, त्व सोम, पिन्वन्त्यप। मरुत्वतीय प्रगाथ बृहदिन्द्रस्य गायत। सूक्ते पाङ्क्ते पञ्चपदे द्वे अवितासि सुन्वतो, इत्था हि सोम इन्मदे। सूक्त त्रैष्टुभ इन्द्र पिब तुभ्य सुतो। निविद्धानः तृच. पर्यास गायत्र मरुत्वाँ इन्द्र मीढ्व। २२।१।८-१४.

मरुत्वतीय शस्त्र षष्ठेऽहनि। प्रतिपत् तृच स पूर्व्यो महानाम्। अनुचर तृच. अय इन्द्रस्य सोमा। इन्द्रनिहव प्रगाथ इन्द्र नेदीय। ब्राह्मणस्पत्य प्रगाथ प्र नून ब्रह्मण। धाय्या अग्निर्नेता, त्व सोम, पिन्वन्त्यप। मरुत्वतीय प्रगाथ नकि सुदासो। सूक्त पारुच्छेप प्र त्व रयमिन्द्र। सूक्त स यो वृषा वृष्ण्येभि। तृच त्रैष्टुभ इन्द्र मरुत्व इह पाहि। निविद्धान तृच पर्यासो गायत्र अय ह येन वा इदम्। २२।७।६-१३.

मरुत्वतीय शस्त्र महाव्रते माध्यंदिने चतुर्विंशात् ग्राह्यम्। तदन्त च असत्सु मे जरित, पिबा सोममभि, कया शुभा, मरुत्वाँ इन्द्र वृषभो इति चत्वारि सूक्तानि शसनीयानि सर्वान्ते च प्रकृतिवत् जनिष्ठा उग्रः इति सूक्तेन समाप्ति। ऐआ ५।१।८-९। प्रतिपत् तृच ऐकाहिक आ त्वा रथम्। अनुचर तृच ऐकाहिक. इद वसो सुत। इन्द्रनिहव प्रगाथ इन्द्र नेदीय। ब्राह्मणस्पत्या प्रगाथा त्रय प्रैतु ब्रह्मण, उत्तिष्ठ ब्रह्मण, प्र नून ब्रह्मण। धाय्या अग्निर्नेता, त्व सोम, पिन्वन्त्यप। प्रगाथा अय प्र व इन्द्राय बृहते, बृहदिन्द्राय गायत, नकि सुदासो। ऐआ १।५।१ १४। सूक्तानि चत्वारि असत्सु मे जरित इति चतुर्विंशत्यृच वामुक्र प्राजापत्य, पिबा सोममभि इति पञ्चदशर्चं भारद्वाज, कया शुभा इति पञ्चदशर्चे, मरुत्वा इन्द्र वृषभो पञ्चर्चं वैश्वामित्रम्। सूक्त निविद्धान एकादशर्चं ऐकाहिक जनिष्ठा उग्र। ऐआ. १।६।१।१७.

मरुत्वतीय शस्त्र विश्वजिति अग्निष्टोमादतिदिश्यते।

अधिकाश्च के चिद्विशेषाः विश्वजिति भवन्ति । तदेतत्सर्वं महाव्रते अतिदिश्यते । पूर्वस्माच्च तत्रापि कश्चिदधिको विशेषः । ऐआ. ५।१।१।८ सायणः ।

मरुत्वतीयं सूक्तं अग्निष्टोमे मरुत्वतीये शस्त्रे निविद्धानं जनिष्ठा उग्रः इति । प्रयोगे ।

मरुत्वतीयः प्रगाथः अग्निष्टोमे मरुत्वतीये शस्त्रे प्र व इन्द्राय ।१२।८।१ । छन्दोमप्रथमेऽहनि प्र व इन्द्राय । २३।१।१२ । छन्दोमद्वितीयेऽहनि बृहदिन्द्राय गायत । २३ । ३ । १० । छन्दोमतृतीयेऽहनि नकिः सुदासो । २४।१।१२ । पृष्ठ्ये षडहे प्रथमेऽहनि 'प्र व इन्द्राय' । २०।१।११। द्वितीयेऽहनि बृहदिन्द्राय ।२०।३।९। तृतीयेऽहनि नकिः सुदासो ।२१।१।६। चतुर्थेऽहनि प्र व इन्द्राय ।२१।३।१२। पञ्चमेऽहनि बृहदिन्द्राय ।२२।१।९। षष्ठेऽहनि नकिः सुदासो । २२।७।७.

मरुत्वतीयग्रहेषु त्रिषु मध्ये तृतीयस्य होमात् प्राक् मरुत्वतीयं शस्त्रं होत्रा शंसनीयम् । ऐआ.५।१।१।८ सायणः ।

मरुत्वतीयशस्त्रयाज्या ये त्वाऽहिहत्ये मघवन् । १२।९।५-७.

मरुत्वतीयशस्त्रस्य आरम्भणीयः तृचः आ त्वा रथम् । १२।३।२.

मरुत्वतीयशस्त्रस्य महाव्रतगतस्य प्रकृतिः चतुर्विंशगतं मरुत्वतीयम् (ऐआ. ५।१,। ऐआ. १।६।१ सायणः ।

मरुत्वतीयशस्त्रे निविद्धानं सूक्तं संपातो नाम आ यात्विन्द्रोऽवस इति । २०।२।२.

मरुत्वतीयशस्त्रे माध्यंदिने प्रतिपद् उत्तरे द्वे ऋचौ गायत्र्यौ । १३।४।२.

मरुत्वतीयशस्त्रे समाप्ते होता आग्नीध्रीये तिस्रः आहुतीर्जुहोति महाव्रते । 'संस्थिते मरुत्वतीये होता विसंस्थितसंचरेण निष्क्रम्य आग्नीध्रीये तिस्र आहुतीर्जुहोति औदुम्बरेण स्रुवेण । अनु मामिन्द्रो अनु मा बृहस्पतिः०, आदित्या मा विश्वे अवन्तु देवाः०, पितरो मा विश्वमिदं च भूतं०' इति । ऐआ.५।१।१।१०-१२

मष्णारः नाम देशविशेषः । 'हिरण्येन परीवृतान् कृष्णान् शुक्लदतो मृगान् (गजान्) । मष्णारे भरतोऽददात् शतं बद्वानि सप्त च ॥' ३९।९।२.

महादिवाकीर्त्यसामयोनिः विभ्राड् बृहत् पिबतु इति ।१८।९।३ सायणः ।

महानाम्नीनामुपसर्गाः नाम मन्त्राः । १ प्रचेतन, २ प्रचेतय, ३ आ याहि पिब मत्स्व, ४ क्रतुश्छन्द ऋतं बृहत्, ५ सुम्न आधेहि नो वसो इति । एते पञ्च विहृतषोडशिशस्त्रे अतिच्छन्दःसु ऋक्षु उपसृज्याः । १६।४।१-३.

महानाम्नीनां पञ्चाक्षरा उपसर्गाः । १ एवा हि एव, २ एवा हि इन्द्रम्, ३ एवा हि शक्रः, ४ वशी हि शक्रः इत्येते विहृतषोडशिशस्त्रे याज्यायां प्रतिपादान्ते उपसृष्टव्याः । १६।४।१४-१५.

महानाम्नीमन्त्राः पृष्ठ्यषडहस्य पञ्चमेऽहनि निष्केवल्यशस्त्रस्य स्तोत्रियतृचः यदि उद्गातारः शाक्वरं गायेयु. तदा । चतुर्थे आरण्यके 'विदा मघवन् विदा' इत्यादयो नव ऋचः पठिताः। तत्र तिस्रस्तिस्रो मिलित्वा एकैका ऋक् भवति । एवं सति नव मिलित्वा तृच एव संपद्यते । तृचश्च पुनरर्ध्यर्धकारं शंसतव्यः ।(आश्व ७।१२।१०) ऐआ. ४।१।१-९.

महापुरुषः कालात्मा, तस्य रस आदित्यः । ऐआ. ३।९।२,७.

महाभिषेकः ऐन्द्रः पुरुषार्थः ३९।१-९.

महावालभित् नाम निहारः वालखिल्यानां अतिमर्शो षट् सूक्तानि । प्रथमं पच्छ., पुनः षट् अर्धर्चशः, पुन. षडपि ऋक्शः, पुनश्च यथापाठं षडपि सूक्तानि । सप्तमाष्टमयोस्तु सूक्तयोः केवलं विपर्यासः अष्टमं सप्तमत्वेन, सप्तमं चाष्टमत्वेनेति । ३०।२।३ सायणः ।

महावीरस्य अञ्जने अनुवचनीया, अञ्जन्ति यं प्रथयन्तो इति । प्रवर्ग्ये । ४।२।६.

महावीरस्य खरे सादने अनुवचनीया 'संसीदस्व. महाँ असि' । ४।२।९.

महाव्रतं गवामयनस्य उपान्त्यमहः । एकाहरूपेण पृथक् प्रयोगोऽपि भवति। पौण्डरीकस्य चेदं दशममहर्भवति इति अहीनत्वेनापि प्रयोगोऽस्य । ऐआ. ५।१।१ सायणः । तत्र सत्रोत्पन्नं महाव्रतं प्रकृतिः, एकाहः अहीनश्च विकृतिः । १८।८।८-९ [illegible]ः ।

महाव्रतं पञ्चविंशतिस्तोमकम् । ऐआ. १।२।९. १।४।२१.

महाव्रतं वृत्रं हतवते महते इन्द्राय सोमपानात्मकं कर्म । ऐआ. १।१।२.

महाव्रतगतमरुत्वतीयशस्त्रस्य चतुर्विंशाख्यमहः प्रकृतिः । ऐआ. १।६।१ सायणः ।

महाव्रतशंसनस्य पित्राचार्येतरयागे निषेधः निष्केवल्योपासकस्य । ऐआ. ३।१०।१–६.

महाव्रते अहीनसूक्तानि होत्रकाणां माध्यंदिने । २९।२।८.

महाव्रते आज्यशस्त्र अन्नाद्यकामस्य अग्निं नरो दीधितिभिः इति पञ्चविंशत्यृचम् । ऐआ.१।२।१-१२। कीर्तिकामस्य अबोध्यग्निः समिधा इति द्वादशर्चम् । ऐआ. १।१।१५ । पुष्टिकामस्य विशो विशो वो इति पञ्चदशर्चम् । ऐआ. १।१।५ १४ । प्रजापशुकामस्य होताऽजनिष्ट चेतनः इत्यष्टर्चम् । ऐआ. १।१।१६ । प्र वो देवायाग्नये इति प्राकृतं एकमेवेति सिद्धान्तः । तच्च राद्धिकामस्यापि । अग्निं नरो दीधितिभिः इति पञ्चविंशत्यृचं वैकृतं द्वितीय, विश्वजिति विद्यमान शंसतव्य इति के चित् । ऐआ. १।१।३.

महाव्रते उद्गाता औदुम्बरीमासन्दीं समारुह्य गायति। ऐआ. ५।४।१६.

महाव्रते चतुर्विंशेऽहनि च प्रातःसवने अच्छावाकशस्त्रं आ सुते सिञ्चत श्रियं इति । ऐआ ५।१।५.

महाव्रते तृतीयसवनं अभिप्लवषडहस्य पञ्चादहो ग्राह्यं, अन्यत् (विना) वैश्वदेवात् निविद्धानात् । ऐआ. ५।१३।१४.

महाव्रते निष्केवल्योत्तरं उक्थसंपज्जपान्ते उक्थदोहसंज्ञकमन्त्रजपः । ऐआ. ५।१३।१-५.

महाव्रते पत्न्यः काण्डवीणाः वादयन्ते । ऐआ. ५।५।१३.

महाव्रते प्रभूतमन्नं दद्यात् यजमानः । ऐआ. ५।५।-१२.

महाव्रते प्रात.सवने प्रउगं वायवायाहि दर्शत इति सप्ततृचात्मकं माधुच्छन्दसम् । ऐआ. १।३-४ । ब्राह्मणाच्छंसिशस्त्रं सुरूपकृत्नुमूतये । तस्य स्तोत्रियस्तृचः त्रिकद्रुकेषु महिषो । अनुरूपस्तृचः एन्द्र याह्युप नः, इन्द्राय हि द्यौः, प्रोप्यस्मै पुरो । मैत्रावरुणशस्त्रं चतुर्विंशवत् ता नः शक्तं पार्थिवस्य ऐआ. ५।१.

महाव्रते प्रेङ्खः अध्वर्युभिः उपकल्पनीयः तत्रारूढो होता शंसति । ऐआ. ५।३.

महाव्रते माध्यंदिने आदित्योपस्थानं मार्जालीयहोमादूर्ध्वम् । मार्जालीयसमीपे तिष्ठन् प्राङ्मुखः आदित्यमुपतिष्ठते, पर्यावृत्ते (आदित्ये) प्रदक्षिणमावृत्य । अग्निं रिंवानाघृष्यः इत्यादिभिर्दशभिर्मन्त्रैरस्वाहाकारैः, एह्येवा इदं मधु इत्यादिना च । ततः प्रेष्याः संशास्ति पूर्णकुम्भा. तिस्रोऽवमाः पल्लतमाः, " इमं विष्णमुदकुम्भं च लिः प्रदक्षिणं परिव्रजाथ दक्षिणैः पाणिभिर्दक्षिणानूरूनाघ्नानाः, एह्येऽऽऽऽऽइदं मधूऽऽऽइदं मधु इति वदन्त्यः उपाकृते स्तोत्रे नैध निनयाथ अत्र उत्तरे च मार्जालीये (आग्नीध्रीये इत्यर्थः) शेषमन्तर्वेदि " इति । ऐआ. ५।१ । प्रदक्षिणमग्निं निष्क्रम्य अग्रेण यूपं पुरस्तात् प्र यङ्मुखस्तिष्ठन् अग्ने. शिर उपतिष्ठते ' नमस्ते गायत्राय यत्ते शिरः' इति । तेनैव यथेत प्रत्येत्य दक्षिणं उदङ्मुखः पक्षं ' नमस्ते राथंतराय यस्ते दक्षिणः पक्षः' इति । अपरेणाग्निपुच्छमतिक्रम्य प्राङ्मुख उत्तरं (पक्षं) 'नमस्ते बृहते यस्त उत्तरः पक्षः' इति । पश्चात् प्राङ् पुच्छं ' नमस्ते भद्राय यत्ते पुच्छं या ते प्रतिष्ठा ' इति । दक्षिणतः पुच्छस्य आत्मान ' नमस्ते राजनाय यस्त आत्मा ' इति । ऐआ. ५।२। यथेतं सदः प्रसर्पति । ऐआ. ५।३।८.

महाव्रते माध्यंदिने निष्केवल्यं शस्त्र प्रेङ्खमारुह्य होता शंसति । ऐआ. १।७।२१.

महाव्रते माध्यंदिने ब्राह्मणाच्छंसिशस्त्रं आ नो विश्वासु हव्यः इति । तदन्ते च तीव्रस्याभिवयस इति पञ्चर्चमायपेत । ऐआ. ५।१।६.

महाव्रते माध्यंदिने मरुत्वतीयं शस्त्रं आ त्वा रथं यथोतये इत्यादि । तदन्ते च अनिष्ठा उग्रः सहसे इति सूक्तम् । ऐआ. १।५।६ । तस्मिन् शंस्यिते होता आग्नीध्रीये तिष्ठ आहुतीर्जुहोति । ऐआ. ५।१।१०–१३.

महाव्रते माध्यंदिने मार्जालीयः विहरणप्रभृति जागरितः स्यात् परिवृतश्च भवति, द्वारं च तस्य प्राग्वा उदग्वा प्रागुदग्वा । ऐआ. ५।१।२३.

महाव्रते माध्यंदिने मार्जालीयहोमः आग्नीध्रीयहोमोत्तरम् । ऐआ. ५।१।१४–२५.

महाव्रते माध्यंदिने 'राजपुत्रेण चर्म व्याधयन्ति, आघ्नन्ति भूमिदुन्दुभिं, पत्न्यश्च काण्डवीणाः (वादयन्ति) भूतानां च मैथुनं (उत्तरस्यां वेदिश्रोण्यां पुंश्चलीमागधयोः परिश्रिते), ब्रह्मचारिपुंश्चल्योः संप्रवादः । स च सामब्राह्मणे दर्शितः । ऐआ. ५।१।१३.

महाव्रते वाणं शततन्तुं (तन्तुवाद्यविशेषं) संस्कृत्य होता छन्दोगेभ्यः प्रयच्छति । ऐआ. ५।४।१–७.

महाव्रते शिल्पानि । वाणः शततन्तुः, प्रेङ्खः, आसन्दी औदुम्बरी, कूर्चफलके, कूर्चाः, अघाटलिका', तालुकवीणाः, काण्डवीणाः, पिच्छोलाः, अलाबुकाविशीर्षिण्यः इति । ऐआ. ५।५।११. सत्याषाढश्रौ १६।६.

महाव्रते सवनीयः पशुः वैश्वकर्मणः ऋषभः पार्श्वद्वये द्विरूपः । १८।८।८–९.

महाव्रते सवनीयपशुभिर्यदा वैश्वकर्मण ऋषभः समुचीयते तदा पञ्चविंशतिः सामिधेन्यः । अन्यथा तु सप्तदशैव । ऐआ. ५।१।३.

महाव्रीहीणां सोक्मानि चमसे पात्रशा या समोप्यानि महाभिषेके संभारः । ३९।२–३.

महासूक्ताः मण्डलर्षयः प्राणदृष्ट्या उपास्याः । ऐआ. १।९–१०

माध्यंदिनं सवनं एकादशाक्षरा त्रिष्टुप् उदयच्छत् । १३।४।२.

माध्यंदिनं सवनं त्रैष्टुभं 'त्रैष्टुभो हि माध्यंदिनः' । ऐआ. १।६।२२.

माध्यंदिनं सवनं द्विनाराशंसम् । ८।६।२.

माध्यंदिनः पवमानः निरुक्तछन्दाः पञ्चदशः । उच्चा ते जात इति षट्सु गायत्रीषु स्तुवते, पुनानः सोम इति षट्सु बृहतीषु । तत्र प्रग्रथ्य तिस्रो बृहतीः कृत्वा रौरवं साम गीयते । पुनः तथैव प्रग्रथ्य यौधाजयं साम गीयते इति द्वे एव ऋचौ सत्यौ षट् संपद्यन्ते । 'प्र तु द्रव' इति तिसृषु त्रिष्टुप्सु, इति त्रिछन्दस्त्वम् । 'एतासु बृहतीषु सामगाः रौरवयौधाजयाभ्यां पुनरादायं स्तुवते' १२।६।६.

माध्यंदिनस्य पवमानस्य 'उच्चा ते जातं' इति स्तोत्रियः । १२।३।२.

माध्यंदिनीयशस्त्रकलृप्तिः अहर्गणेषु होत्रकाणाम् । २९।१–७.

माध्यंदिने अग्निष्टोमे अहीने च मैत्रावरुणस्य परिधानीया 'नू ष्टुत इन्द्र नू' । ब्राह्मणाच्छंसिनः एवेदिन्द्रं वृषणम् । अच्छावाकस्य अग्निष्टोमे शुनं हुवेम, विकृतौ तु नूनं सा ते ।२७।४–५ सायणः ।

माध्यंदिने अहीने अच्छावाकस्य परिधानीया नूनं सा ते । सा च विमुक्तिः विमोकः । २९।७।३.

माध्यंदिने अहीने वहन्तः, प्रगाथाः, प्रतिपदः, अहीनसूक्तानि, अहरहःशस्यानि च । २९।१।३–४.

माध्यंदिने उक्थ्यमानसूक्तं मैत्रावरुणस्य असावि देवं गो ऋजीक इति दशर्चम् । तत्र सतैव शस्तव्या इत्येके तत्र । ऐन्द्रीः त्रिष्टुभः । २८।३।१–२.

माध्यंदिने न्यूङ्खः प्रथमे पादे चतुर्थेऽहनि । २१।३।१२.

माध्यंदिने प्रतिगरः शंसामो दैवोम् इति । १२।१।३.

माध्यंदिने प्रस्थितयाज्याः । २८।३।५–१४ । तासां पुरस्तात् पारुच्छेपीः ऋचः प्रत्येकमेकैकामुपदध्यात् । २२।५।१–५.

माध्यंदिने बलीयस्या वाचा शंसेत् । १४।६।५.

माध्यंदिने ब्रह्मा 'भुवस्त्विन्द्रवन्तः स्तुध्वं' इति स्तोत्रप्रसवमाह । २५।९।५–६.

माध्यंदिने मरुत्वतीयशस्त्रस्य आरम्भणीया 'आ त्वा रथं' अनुष्टुप् । १२।३।२.

माध्यंदिने मरुत्वतीयशस्त्रे प्रतिपत्तृचस्य उत्तरे द्वे गायत्र्यौ अनुचरश्च सर्वो गायत्रः । १३।४।२.

माध्यंदिने मैत्रावरुणस्य द्वे सूक्ते शंसनीये सद्यो ह जातो, एवा त्वामिन्द्र वज्रिन् इति । ब्राह्मणाच्छंसिनः इन्द्र. पूर्भित्, उदु ब्रह्माणि इति । अच्छावाकस्य भूय.

इत्, इमामू पु इति। २८।५।६.

माध्यंदिने वैश्वदेवशस्त्रस्य आरम्भणीया तत्सवितुर्वृणी-महे। १२।३।३.

माध्यंदिने शस्त्रजपः होतुः अध्वर्योश्च। १२।१।३.

माध्यंदिने शस्त्रमध्ये निविद्धानम्। ११।१०।२,५.

माध्यंदिने सवने दक्षिणा नीयन्ते। १३।१।३.

माध्यंदिने स्तोमात्रिवृध्दौ अतिशंसनं एकया द्वाभ्या अपरिमिताभिर्वा। २७।५।७-८. २९।७।१०-१३ सायणः।

माध्यंदिने होतुः सद प्रवेश चित्याग्निदरस्थानानन्तरं महाव्रते। ऐआ. ५।३।१।

माध्यमाः मण्डलर्षयः प्राणदृष्ट्या उपास्याः। ऐआ. २।९-१०.

मानसग्रहः द्वादशाहस्य दशमेऽहनि पत्नीसंयाजो-त्तरम्। प्रसर्पणं सदसः, मार्जनं तीर्थदेशे, पत्नीशालाया संप्रपदनं, होमः शालामुखीये, सर्पणं पत्नीशालायाः, मार्जनं तीर्थदेशे, होमः आग्नीध्रीये, सर्पणं सदसि, स्तोत्रं सार्प-राज्ञ्याः ऋक्षु, शस्त्रं चतुर्होतृमन्त्रपठनरूपं, अवग्रहः नाम मन्त्रः, प्रजापतेस्तनवः नाम मन्त्राः, ब्रह्मोद्यम्। २४।२-६.

मानुषस्य सृष्टिः प्रजापतेः रेतसः सकाशात्। १३।९।६.

मारुतं सूक्तं गायत्र आग्निमारुते शस्त्रे। छन्दोम प्रथमेऽहनि प्रयज्वलिप्सुमायम्। २३।२।१४। छन्दोम-द्वितीयेऽहनि क्रीळं वः शर्धो। २३।४।१६। छन्दोम-तृतीयेऽहनि मरुतो यस्य हि क्षये। २४।२।१७.

मारुतं सूक्तं निविध्दानं आग्निमारुते सूक्ते अग्निष्टोमे प्रत्वक्षसः इति। प्रयोगे।

मारुत सूक्तं आग्निमारुते शस्त्रे पृष्ठ्ये षडहे। प्रथमेऽ-हनि प्रत्वक्षसः प्रतवसो। २०।२।११। द्वितीयेऽहनि वृष्णे शर्धाय।२०।४।९। तृतीयेऽहनि धारावरा मरुतो। २१।२।१५। चतुर्थेऽहनि क ईं व्यक्ता नरः, अत्र द्विपदाश्च चतुष्पदाश्च ऋचः सन्ति।२१।५।१३-१४। पञ्चमेऽहनि वपुर्नु तच्चिकितुषे २२।३।१२। षष्ठेऽहनि मध्वो वो नाम मारुतम्। २२।१०।६.

मारुतं सूक्तं वैश्वानरीयोत्तरं आग्निमारुते। १३।११।२.

मार्जनं तीर्थदेशे द्वादशाहस्य दशमेऽहनि मानसग्रहे। २४।२.

मार्जालीयः महाव्रते माध्यंदिने विहरणप्रभृति जाग-रितः परिवृतश्च भवति। ५।१।२३.

मार्जालीयहोमः महाव्रते माध्यंदिने मरुत्वतीयशस्त्रो-त्तरम्। आग्नीध्रीयहोमे हुते होता स्रुचि चतुर्गृहीतं गृहीत्वा दक्षिणे मार्जालीये उत्तरतः अग्निरुपनिधाय, स्रुवेण अग्निरिवानाधृष्यः पृथिवीव सुषदा भूयास इत्या-दिभिः नवभिर्मन्त्रैर्नवाहुतीर्हुत्वा, दशमीं पूर्वमेव चतुर्गृ-हीतेन यदस्य एषा समितिर्भवाति इति मन्त्रेण जुहुयात् इति। ऐआ. ५।१।१४-२५.

माहानामनानि (=महानाम्नीगतानि) अष्टाक्षराणि पदानि पृष्ठेऽहनि धिष्ण्यशस्त्रे वालखिल्याना आदिमपञ्च-भिन्नप्रगाथेषु प्रक्षेपणीयानि प्रचेतन प्रचेतन इत्यादीनि (ऐआ. ४।१।१-९)। २९।८।७ सायणः।

मुष्टीकरणं दीक्षितसंस्कारः। १।३।१९-२१.

मूतिवाः नाम विश्वामित्रपुत्राः ये शप्ताः पित्रा। जातिविशेषः। ३३।६।२.

मेथ्योर्निहनने हविर्धानप्रणयनीयासु परिधानीया वक्तव्या (शकटस्थिरत्वार्थे तद्बन्धनाय तस्याधस्तात्। मेथी=मेख पुर्णे) ५।३।१८-२३.

मेधासरस्वतीमन्त्रः। 'ओष्ठापिधाना न कुली दन्तैः परिवृता पविः। सर्वस्यै वाच ईशाना चारु मामिह वादयेत्॥' वाग्रसः नाम मन्त्रोऽयम्। सभायां वक्तृत्वशक्तिजनकोऽयं मन्त्रः। ऐआ. ३।१।१।८.

मैत्रावरुणं प्रति अध्वर्योः अग्निगो प्रैषः 'उप प्रेष्य होतर्हव्या देवेभ्यः' इति। ६।५।६.

मैत्रावरुणं शस्त्र अग्निष्टोमे प्रातःसवने। प्रतिपत् तृचः आ नो मित्रावरुणा। अनुरूपस्तृचः आ नो गन्तं रिशादसा। सूक्तं मैत्रावरुणं प्र वो मित्राय पञ्चर्चे, प्र मित्रयोर्वरुणयोः इति नवर्चे, तत्र नवमी परिधानीया: प्रयोगे।

मैत्रावरुणं शस्त्रं (पृष्ठं) अग्निष्टोमे माध्यंदिने। प्रति-

पत् तृचः कया नाश्विन । अनुचरस्तृचः कयां त्व न ऊत्या । प्रगाथ ऐन्द्रः कस्तमिन्द्र त्वा वसु । सूक्तं ऐन्द्र सद्यो ह जातो, पञ्चर्चम् । सूक्तं ऐन्द्रं एवा त्वामिन्द्र वज्रिन्, एकादशर्चं, तत्र एकादशी परिधानीया । प्रयोगे ।

मैत्रावरुणः उक्थ्ये तृतीयसवने ' इन्द्रावरुणा युवं ' इति मैत्रावरुणं शस्त्रं शंसति तस्य स्तोत्रियः आग्नेयः एह्यूषु । अनुरूपस्तृचः आग्नेय आग्निरगाम । प्रयोगे ।

मैत्रावरुणः प्रातःसवने मैत्रावरुणं शस्त्रं शंसति अग्निष्टोमे । २७।१।१.

मैत्रावरुणः होत्रादीन् ऋतुयाज्यार्थं प्रेष्यति आग्निष्टोमे । २४।४।२ सायणः ।

मैत्रावरुणग्रहशेषभक्षमन्त्रः होतुः एष वसुर्विदद्वसुः० उपहूत चक्षुः० । पुरस्तात् प्रत्यञ्चं मैत्रावरुणं भक्षयति । ९।३।६–७.

मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकशस्त्रविधानम् ।२७।१.

मैत्रावरुणशिल्प षष्ठेऽहनि वालखिल्याः । विहृताः शंसति । प्रथमे सूक्तद्वये पच्छ., तृतीयचतुर्थसूक्तयोः अर्धर्चशः, पञ्चमषष्ठयोः सूक्तयोः ऋक्कृशः । अयं विहारः हौण्डिनः नाम । २९ अध्याये उक्तस्तु महावालभित् नाम विहारः । के चित्तु सह बृहत्यौ सह सतोबृहत्यौ विहरन्ति, तत्र । किंतु आर्तमर्दा विहरेत् षट् सूक्तानि द्वे उत्तमे सूक्ते तु (७–८) पर्यस्यति अष्टम सप्तमत्वेन सप्तमं चाष्टमत्वेन इति । ३०।२।१–१०.

मैत्रावरुणस्य अहरहः शस्यं सूक्तात् पुरस्तात् ' सद्यो ह जातो वृषभः ' इति वैश्वामित्रं पञ्चर्चं शंसति । २९।४।१–६.

मैत्रावरुणस्य अहरहःशस्ये प्रतिपत् अप प्राच इन्द्र इत्यृक् । २९।६।१–३.

मैत्रावरुणस्य अहीनसूक्तं माध्यंदिने आ सत्यो यातु मघवान् । इदं चतुर्विंशे अभिजिति विषुवति महाव्रते च । २९।२।५।८.

मैत्रावरुणस्य अहीने परिधानीया नू ष्टुत इन्द्र इति। २९।६।८-१०।प्रातःसवने परिधानीया ते स्याम देव वरुण। सा युक्तिः योगः । माध्यंदिने तु नू ष्टुत इन्द्र ।२९।७।४.

मैत्रावरुणस्य उक्थ्ये तृतीयसवने आरम्भणीयं सूक्तं जागतं, चर्षणी धृतं इति । २८।७।१.

मैत्रावरुणस्य आवापिकस्तृचः चतुर्थेऽहनि नते गिरो अपि मृष्यः इति, वैमदीषु सप्तसु प्रथमस्तृचो यजामह इन्द्रं इति वा । पञ्चमेऽहनि यच्चिद्धि सत्य सोमपाः इति तृचः । षष्ठेऽहनि इन्द्राय हि द्यौः इति तृचः पारुच्छेपः । महास्तोमेषु चाहःसु को अद्य नर्यो देवकाम. इति सूक्तम् । २९।३।८–११.

मैत्रावरुणस्य दक्षिणं सक्थि पशुभागः सत्रे । ३१।१।२.

मैत्रावरुणस्य परिधानीया इयमिन्द्र वरुणमष्टमे गीः । २८।७।६.

मैत्रावरुणस्य परिधानीया प्रकृतौ अहीने च, प्रातः-सवने ते स्याम देव वरुण । २७।४।२; ५।२। माध्यंदिने नू ष्टुत इन्द्र । २७।५।२ सायणः । तृतीयसवने इयमिन्द्रं वरुणमष्टमे गीः । २७।५।५.

मैत्रावरुणस्य । प्रस्थितयाज्या, प्रातःसवने मित्रं वय हवामहे । २८।२।२ । माध्यंदिने य ईं पाहि य ऋजीषी २८।३।८ । तृतीयसवने इन्द्रा वरुणा सुतपा । २८।४।७.

मैत्रावरुणस्य माध्यंदिने द्वे सूक्ते शसनीये सद्यो ह जातो, एवा त्वामिन्द्र वज्रिन् । २८।५।६.

मैत्रावरुणस्य मैत्रावरुणशस्त्रे अहर्गणेषु आरम्भणीया ऋजुनीती नो वरुणः । २७।३।२.

मैत्रावरुणस्य शस्त्रं अग्निष्टोमे प्रातःसवने आ नो मित्रावरुणा । २७।१।१ । ऐआ. ५।१।५ सायणः । चतुर्विंशे महाव्रते च ता नः शस्त पार्थिवस्य । ऐआ. ५।१।५ सायणः ।

मैत्रावरुणस्य शस्त्रे उक्थ्ये इन्द्रावरुणा युवमध्वराय इति दशर्चम् । १५।५।१.

मैत्रावरुणस्य षष्ठेऽहनि शिल्पशस्त्रे नाभरन्तृचः यः ककुभो निधा । २९।८।१–३.

मैत्रावरुणस्य स्तोमविवृद्धौ आवापिक सूक्तं को अद्य नर्यो । २९।३।१०–११.

मैत्रावरुणस्य होतारं प्रति आगूर्य उपप्रैषः अग्नेद-मिरसनद् इत्यादिः । ६।५।७–९.

मैत्रावरुणेन पशोः पर्यग्निकरणे अनुवचनीयस्तृचः आग्नेयो गायत्रः अग्निर्होता नो अध्वरे। ६।५।२–५.

मैत्रेयः कौषारवः महर्षिः सुत्वने कैरिशये भार्गायणाय 'ब्रह्मणः परिमरं' नाम मन्त्रं प्रोवाच। तेन तस्य शत्रवः पञ्च राजानः परिम्रमः। ४०।५।१८.

मैथुनं भूताना (मागधपुंश्चल्योः। सायणः) उत्तरस्थां वेदिश्रोण्या परिश्रिते। महाव्रते। ऐआ. ५।५।१३.

यः सकृत् पापकं कुर्यात् कुर्यादेनस्ततोऽपरम्। ३३।५।४.

यजमानभागः दीक्षणीयादिषु ब्रह्मणे देयः क्षत्रिययागे। अग्नौ हैके जुह्वति प्रजापतेर्विभानाम० इति मन्त्रेण। तन्न। ३४।८।१–६.

यजमानः महाव्रते प्रभूतमन्नं दद्यात्। ऐआ ५।५।१२.

यजमानः मैत्रावरुणेन ऋतुयाज्यार्थं प्रेषितः 'होतरेतद्यज' इति स्वयाज्या होत्रे प्रयच्छति। स्वयमेव वा यजेत्। अग्निष्टोमे। षष्ठेऽहनि तु याज्या स्वयमेव पठेत्। २२।४।२.

यजमानस्य संस्काराः दीक्षणीयाया अग्निष्टोमे। १।३, ६.

यज्ञुष्टो यज्ञभ्रेषप्रायश्चित्त भुवः इति यज्ञे आग्नीध्रीये, हविर्धनेषु अन्वाहार्यपचने जुहुयात्। २५।७।५। एतत् ब्रह्मा कुर्यात्। २५।९।४.

यज्ञस्य सृष्टिः प्रजापतेः सकाशात्। ३४।१।१.

यज्ञाङ्गः राजाभिषेकः 'अभिषेकः' इत्यत्र द्र० ३७ अध्याये.

यज्ञायज्ञीयं आग्निमारुतं शस्त्रं अग्निष्टोमे तृतीयसवने अन्तिमम्। अत्रत्यं सामैव 'अग्निष्टोमसाम' इत्युच्यते, शस्त्रं च अग्निष्टोमशस्त्र इत्युच्यते।

यज्ञायज्ञीयं इलान्दं वा साम महाव्रते सामगाः विकल्पेन गायन्ति। ऐआ. ५।१३।१५.

यज्ञायज्ञीयस्य स्तोत्रियस्तृचः यज्ञायज्ञा वो अग्नये। १२।३।४.

यज्ञायुधानि माह्मणस्यायुधानि। तानि च स्फ्यश्च कपालानि च अग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या च उलूखलं च मुसलं च दृषच्चोपला च। एतानि वै दश यज्ञायुधानि। ३४।१।२ सायणः।

यथर्षि अग्नीषोमीयस्य पशोराप्रियो भवन्ति। 'यथर्षि आप्रिणीयात्'। यथर्षित्वं च आश्वलायनीशाखानारायणवृत्तौ। कण्वानां सुसमिद्धो न आ वह। कण्वभिलानामङ्गिरसां समिद्धो अग्र आवह। अगस्तीनां समिद्धो अद्य राजसि। शुनकानां समिद्धो अग्निर्निहितः। विश्वामित्राणां समित्समित् सुमनाः। अत्रीणां सुसमिद्धाय शोचिषे। वसिष्ठानां जुषस्वं नः समिध। कश्यपानां समिद्धो विश्वतस्पतिः। वाध्र्यश्वानां इमां मे अग्ने समिधम्। भृगूणां शुनकवाध्र्यश्ववर्जितानां समिद्धो अद्य मनुषो। इति। आश्वला० ३।२।७.

यथा वाव शस्त्रमेवं याज्या। २९।१०।१३.

यथा वाव स्तोत्रमेवं शस्त्रम्। २९।१०।११.

यमलजनने स्त्रियां गवि वा अग्नये मरुत्वते त्रयोदशकपालं निर्वपेत्। मरुतो यस्य हि, अराइवेदचरमा इति याज्याऽनुवाक्ये। आहुतिं वा आहवनीये जुहुयात् अग्नये मरुत्वते स्वाहेति। प्रायश्चित्तमिदम्। ३२।८।८.

यवमयः व्रीहिमयो वा पशुपुरोडाशः। ६।८।७; ९।२–. ७।१।१२.

यवानां तोक्मानि चमसे पाव्या वा समोप्यानि महाभिषेके संभारः। ३९।२।३–४; ३।१.

यस्यै देवतायै हविर्गृहीतं स्यात् (अध्वर्युणा) तां ध्यायेत् (होता, वषट् करिष्यन् (वषट्कारात् प्राक्)। ११।८।१.

यागः द्विदेवत्यानां पात्रद्वयेन ग्रहणं तु एकपात्रेण। ९।३।१.

यागप्राग्दिने व्रतार्थं उपवासः कर्तव्यो यजमानाभ्याम्। ३२।९।१.

याज्या अग्नीषोमीयपशुप्रधानस्य अग्नीषोमा हविषः प्रस्थितस्य इति। ६।१०।५–७.

याज्या अनवानं पठितव्या प्रातःसवने। २७।५।६.

याज्या आग्निमारुतशस्त्रस्य आग्निमारुती अग्ने मरुद्भिः शुभयद्भिः। १३।१४।१४.

याज्या आदित्यग्रहस्य तृतीयसवने आदित्यासो अदितिर्मादयन्ताम्। १३।५।२.

याज्या उन्नीयमानयाज्याः, 'प्रस्थितयाज्याः' सप्त-होतारः एकैका पठन्ति । २८।१।८ सायणः ।

याज्या ऐन्द्राग्नग्रहस्य अग्न इन्द्रश्च दाशुषो । १०।५।१२.

याज्याः यावत्यो वै पुरोऽनुवाक्यास्तावत्यो याज्याः (प्रायः)। २८।१।८.

याज्याः सवनीयपुरोडाशानाम्। धानाना हरिवाँ इन्द्रो धाना अत्तु। करम्भस्य पूषण्वान् करम्भमत्तु। परिवापस्य सरस्वतीवान् भारतीवान् परिवापः। पुरोडाशस्य, इन्द्र-स्यापूपः। पयस्यायाः (शाखान्तराद् ग्राह्या—सायणः)। ८।६।५-१०.

याज्या घृतयागस्य प्रथमस्य घृताहवनो घृतपृष्ठो अग्निः (सौत्री)। द्वितीयस्य वैष्णवी, उरु विष्णो विक्रमस्व (सौत्री)। १३।८।१.

याज्यानां द्विदेवत्यानामनवानत्वम्। १।४।१.

याज्या निष्केवल्यशस्त्रस्य विराट् त्रयस्त्रिंशदक्षरा, पिबा सोममिन्द्र। १२।११।१-११.

याज्याऽनुवाक्या आज्यभागयोः आतिथ्यायां, समिधाऽग्निं दुवस्यत आप्यायस्व समेतु ते इति द्वे पुरोऽनुवाक्ये। जुषाणेनैव यजति प्रकृतिवत्। जुषाणो अग्निराज्यस्य वेतु, जुषाणः सोम आज्यस्य हविषो वेतु इति। ३.६।१-६.

याज्याऽनुवाक्या उत्तमु। अग्नेः अग्निर्वृत्राणि जङ्घनत्, य उग्र इव शर्यहा। सोमस्य त्वं सोमासि सत्पतिः, गयस्फानो अमीवहा। विष्णोः इदं विष्णुर्वि चक्रमे, त्रीणि पदा वि चक्रमे। पूर्वाह्णात् विपर्यस्ताभि-रपराह्णे यजति। सच्छन्दसः कर्तव्याः। ४।८।८-१५.

याज्याऽनुवाक्या, द्विदेवत्येषु। ऐन्द्रवायवग्रहस्य अनुष्टुभौ पुरोऽनुवाक्ये गायत्र्यो याज्ये इति केचित्। तन्न। पुरोऽनुवाक्ये च याज्ये च गायत्र्यौ एवेति सिद्धान्तः। वायवायाहि दर्शत, इन्द्रवायू इमे सुता इति पुरोऽनुवाक्ये। अग्रं पिबा मधूनां, शतेनानो अभिष्टिभिः इति याज्ये। ९।२।३-६। तत्र याज्ययोरनवानत्वम् ९।४।१.

याज्याऽनुवाक्याः प्रायणीयोदयनीययोः प्रधानानाम्। पथ्यायाः स्वस्तेस्त्रिष्टुभौ स्वस्ति नः पथ्यासु धन्वसु, स्वस्तिरिद्धि प्रपथे। अग्नेस्त्रिष्टुभौ अग्ने नय सुपथा, आ देवानामपि पन्थाम्। सोमस्य त्रिष्टुभौ त्वं सोम प्र चिकितो, या ते धामानि दिवि। सवितुर्गायत्र्यौ आ विश्वदेवं सत्पतिं, य इमा विश्वा जातानि। अदितेर्जगत्यौ सुत्रामाणं पृथिवीं, महीमू षु मातरम्। याः प्रायणीयस्य पुरोऽनुवाक्याः, ता उदयनीयस्य याज्याः कुर्यात्। या उदयनीयस्य पुरोऽनुवाक्याः, ताः प्रायणीयस्य याज्याः कुर्यात्। २।३।१-९, २।४।१-३,

याज्याऽनुवाक्ये आतिथ्यायां प्रधानस्य इदं विष्णुर्वि चक्रमे, तदस्य प्रियमभि पाथो। ३।६।६-८.

याज्याऽनुवाक्ये दीक्षणीयायां प्रधानस्य अग्निर्मुखं प्रथमो देवताना, अग्निश्च विष्णो तप उत्तमं महः। त्रिष्टुभौ। १।५।८-११.

याज्या पशु पुरोडाशस्य अग्नीषोमीयस्य आऽन्यं दिवो मातरिश्वा। स्विष्टकृतः स्वदस्वहव्या समिषो। ६।९।७-१०.

याज्या पशुप्रयाजस्योत्तमस्य आप्रिसूक्ते या उत्तमा सैव। ७।३।१-५.

याज्या पात्नीवतग्रहस्य एभिरग्ने सरथं, तामाग्नीध्र आह उपांशु। नानुवषट्करोति। २६।३।७-९.

याज्या पुरोऽनुवाक्यायाः सकाशात् ज्यायसी वा समा वा कार्या न तु न्यूना 'यत्र वै याज्या ज्यायसी, तत् समृद्धं, अथो यत्र समे' ।९।२।५.

याज्या प्रउगस्य वैश्वदेवी विश्वेभिः सोम्यं मधु। ११।४।१२.

याज्या मरुत्वतीयशस्त्रस्य ये त्वाऽहिहत्ये मघवन्। १२।९।५-७.

याज्याया द्वितीयाया आगूर्नास्ति द्विदेवत्येषु। ९।४।४-६.

याज्या वपायाः युवमेतानि दिवि। ६।९।५-६.

याज्यावषट्कारयोर्नैरन्तर्यम्। ११।७।१२-१३.

याज्या वालखिल्याशिल्पशस्त्रस्य ऐन्द्रावरुणी इन्द्रावरुणा मधुमत्तमस्य। २९।१०।१३--१४.

याज्या वैश्वदेवशस्त्रस्य विश्वे देवाः शृणुतेमम्। १३।७।१५.

याज्या सावित्रग्रहस्य, दमूना देवः सविता वरेण्यः। १३।५।४.

याज्या सौम्यचरोः सौमी त्व सोम पितृभिः संविदान' १३।८।१-२.

याज्या स्विष्टकृतः पशुपुरोडाशस्य स्वदस्व हव्या समिधो।६।९।९-१०.

याज्ये आतिथ्यायां आज्यभागयोः। तयोर्जुषाणेनैव यजति। प्रकृतिवत्। जुषाणो अग्निराज्यस्य वेतु, जुषाणः सोम आज्यस्य हविषो वेतु। ३।६।५.

याज्ये दर्शपूर्णमासयोराज्यभागयो जुषाणो अग्निराज्यस्य वेतु, जुषाणः सोम आज्यस्य हविषो वेतु। ३।६।५.

याज्ये प्रवर्ग्ये पूर्वाह्ने, तमो वा घर्मोनक्षतिः, उभा पिबतमश्विना। ४।५।३। अपराह्णे यदुस्रिया स्वाहुत (सौत्र) अस्य पिबतमश्विना। ४।७।५.

यामी ऋचौ इय यम प्रस्तरमाहि, मातली कव्यैः। आग्निमारुतशस्त्रे पावीरव्याउत्तरं, यामीमुत्तरमेके पित्र्यायाः। १३।१३।९--११.

युक्तिर्योगः। अहीने अच्छावाकस्य, आऽद सरस्वतीवतोः, ऋक् प्रातःसवने। ब्राह्मणाच्छंसिनः व्यन्तरिक्षमतिरत् इति तृचस्य इन्द्रेण रोचना दिव इति परिधानीया। मैत्रावरुणस्य ते स्याम देव वरुण इयमृक् प्रातःसवने परिधानीया। गवामयने चतुर्विंशेऽहनि वर्तमानाः सर्वाः परिधानीयाः। २९।७।१--९

युधाश्रौष्टिरौग्रसैन्यः राजा ऐन्द्रमहाभिषेकेण समन्तं पृथिवीं जयन् परीयाय अश्वेन च मेध्येनेजे। ३९।७।७.

यूपः ऊर्ध्वो निमीयते, षोडशाश्रिः कर्तव्यः, खादिरं यूपं कुर्वीत स्वर्गकाम', बैल्वं यूपं कुर्वीतान्नकामः पुष्टिकामः, पालाशं यूपं कुर्वीत तेजस्कामो ब्रह्मवर्चसकामः। ६।१। तस्य संस्कारः। अञ्जनं अञ्जमो युपमनुब्रूहि इत्याहाध्वर्युः, अञ्जन्ति त्वामध्वरे देवयन्तः इत्यन्वाह होता। उच्छ्रयस्व वनस्पते इत्युच्छ्रीयमाणायाभिरूपा, समिद्धस्य श्रयमाणः पुरस्तात्, ऊर्ध्व ऊ षु ण ऊतये, ऊर्ध्वो नः पाह्यंहसो, जातो जायते सुदिनत्वे अह्नां, युवा सुवासाः परिवीत आगात् इत्युत्तमया परिदधाति। ता एताः सप्तान्वाह, तासां त्रिः प्रथमां त्रिरुत्तमाम्। ६।२। अथ यज्ञसमाप्तौ स यूपः तथैव 'तिष्ठेत् पशुकामस्य'। तत्पक्षे स्वरुं तस्मिन्काले अनुप्रहरेत् अग्नौ। यूपमेव सर्वं अनुप्रहरेत् स्वर्गकामस्य। ६।३.

योगः युक्तिः २९।१--९.

यौधाजयं साम सामगाः माध्यंदिने पवमाने पुनानः सोम इत्यनयोर्द्वयोः प्रग्रथनेन तिस्रः कृत्वा तासु पुनर्गायन्ति। अत एव होताऽपि इन्द्रनिहवं प्रगाथं प्र नूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यं प्रगाथं च पुनः पुनः पठितमेव पादमादाय शंसति। १२।६।६.

रक्षः इतिपद अध्रिगौ 'अस्ना रक्षः संसृजात' इत्यत्र नोच्चार्यमिति के चित्। उपांशु उच्चार्ये इति सिद्धान्तः। ६।७।१--९.

रज्जू द्वे प्रेङ्खबन्धनक्षमे महाव्रते। दार्भ्यं त्रिगुणे स्याताम्। पञ्चव्यामे (पाच वाव)। सव्यावृता एका दक्षिणावृता अन्या। ते च प्रेङ्खच्छिन्द्रेषु दक्षिणावृतया दक्षिणतः, सव्यावृतया चोत्तरतः द्विगुणे प्रोते कुर्यात्। रज्जोरन्ताश्च ग्रीवधान्तयोः त्रिः प्रदक्षिणं पर्यस्य ऊर्ध्वग्रन्थि निष्कर्ये (मुरगाठ) बध्नाति। ऐआ. ५।३।३,८.

रथंतरं साम छन्दोमे प्रथमे। २३।१।२७। तृतीये च। २४।१।२२। पृष्ठ्ये षडहे प्रथमेऽहनि। २०।१।१--२। तृतीये २१।१।२०। पञ्चमे चाहनि। २२।२।७.

रथंतरसामयोनिः अभि त्वा शूर नोनुमः। १७।७।१. २२।३।७.

रथंतरात् वैरूपस्य सृष्टिः शाक्वरस्य च। १९।६। १,३.

रराटयाः ईक्षणं हविर्धानप्रवर्तनीयासु सप्तम्या ऋचोऽनुवचनकाले (रराटी = ललाटी द्वारस्य उपरिस्थिता तेजनी)। ५।३।१५--१७.

राका या उत्तरा पौर्णमासी। पूर्णचन्द्रा। ३२।९।२.

राक्षा देवपत्नीभ्य. पूर्वमेक । राकामह इ युगुद्वय आग्निमारुतशस्त्रे देवपत्नीभ्य उत्तरमेवेति सिद्धान्त । १३।१३।२–३,६–७.

राक्षसी वाक् । यां वै दृप्तो वदति यमुमत्त, सो वै राक्षसी वाक् । ६।७।८

राक्षोघ्नीऋच अग्नौ मथ्यमाने अजाते चिरजाते वा अग्नौ पच्यते । अग्ने हसि न्यत्रिण इन्याद्या पञ्च। ३।५।९–१२. प्रवर्ग्ये अभिष्टो पूर्वे पटले च । ४।२।८

राजनसाम्न स्तोत्रिय एव निष्केवल्यस्य प्रातवत् महाव्रते । तदिदास भुवनेसु इति ऋक् । ऐआ ५।५।१३. ५।६।७–९

राजनसाम्नि पञ्चकृत्व प्रस्तौति, पञ्चकृत्व उद्गायति, पञ्चकृत्वः प्रतिहरति पञ्चकृत्व उपद्रवति, पञ्चकृत्वो निधनमुपयान्ति । तत् स्तोमसहस्र भवति । ऐआ २।१६।३.

राजन्यवैश्यशूद्रा अहुताद आर्त्विज्याभावात् । ३४।१।१.

राजपुत्रेण चर्म व्याधयन्ति महाव्रते । ऐआ. ५।५।१३.

राजसूये अक्षैर्दीव्यति राजन्य जिनाति शौन शेपमाख्यापयति । (अक्षा =तिष्ठळ्यातील बेहड)। ३३।१–६.

राजसूयेन हरिश्चन्द्र ईजे । ३३।३।८

राजहस्ते आचार्य सुराकू समादधाति स्वादिष्ठ‍या मदिष्ठया इति मन्त्रेण । महाभिषेके । ३९।६।३.

राजान अश्वमेधकर्तार तत्पुरोहिताश्च । 'ऐन्द्रम हाभिषेकफलोदाहरणानि'इत्यत्र द्रष्टव्यम्।

राजाभिषेक यशाङ्ग ।'अभिषेक' शब्दे द्र ०। अत्र भूयादुदेत्य अनुबन्ध्यया इष्ट्वा उदवसानीयाया सस्थि ताया पुनरभिषिञ्चति ३७।१।२.

राजा यो विजितो स्यात् स शौन शेपाख्यान शृणुयात् । नैन परिशिष्यते (एन =पापम्) (अयश सयुक्त कल्प । ३३।६।१४

राज्ञ पुरोहित विद्वान् ब्राह्मणो राष्ट्रगोप ।४०।२

राज्ञा पुरोहितस्य वरणम् । ४०।४.

राज्ञा यक्ष्यमाणेन पुरोहित कर्तव्य (तदा राजम तिनिधिरसौ) ।४०।१–५

राद्धिकामस्य आज्य शस्त्र महाव्रते प्र वो देवायाग्नये इति सतर्चम् । ऐआ १।१।४

राष्ट्रगोप पुरोहित ।४०।२।२–४,४।३–४.

राष्ट्रादपरुध्यमान पुन राष्ट्रप्राप्त्यर्थिन शरणागत पुरुष प्रति अभिषिक्तस्य क्षत्रियस्य कर्तव्य, ऐशानीं दिश उपनिष्क्रमयेत् । ३७।६।१०

रुद्रस्य भूतपते सृष्टि । देवाना या घोरतमास्तन्व. आसन, ता एकधा समभरन्, ता सभृता एव देवोऽ भवत्। १३।९।१–२.

रेतस सकाशात् (प्रजापते) सृष्टि । ऐआ २।३।१.

रैभी नाम तिस्र ऋच कुन्तापसूक्ते, ग्रग्राह पञ्च शसेत्। निर्दे ।' वच्यस्व रेभ वच्यस्व इत्यादय । ३०। ६।७–९.

रैवत साम षष्ठेऽहनि ।२२।७।१.

रैवतस्य बृहत सकाशात् सृष्टि । १९।६।४.

रैवतसामयोनि रेवतीर्न सधमाद इति ऋक् । १७।७।६ सायण ।

रोहित नाम छन्द पारुच्छेपीना ऋचा (ऋस. १।१२७-१३९ इति त्रयोदश सूक्तानि मिलित्वा १०० ऋचाम्) । २२।५।१

रौरव साम सामगा माध्यंदिने पवमाने पुनान सोम इति द्व ऋचौ प्रग्रथनेन तिस्र कृत्वा तासु गायन्ति। १२।६।६

लोकपालाना अग्ने वायो आदित्यस्य दिशा ओष धिवनस्पतीना चन्द्रमस मृत्यो अपा च सृष्टि । ऐआ. २।२१.

लोकाना सृष्टि ।अम्भ =परेण दिव, द्यौ प्र तिष्ठा। मरीची अन्तरिक्षम्। मर = पृथिवी। अप या अधस्तात् पृथिव्या । इति चतुर्णा सृष्टि । ऐआ. २।२१

वनस्पतीयाग अग्नी षोमीयपशौ । हृदयाद्यङ्गस्प- प्रधानहविषो याग, अथ वनस्पतियाग, अथ स्विष्ट- कृत् । 'जुह्वामुपस्तीर्य सकृत् पृषदाज्यस्योपहत्य द्विरभि

धार्ये वनस्पतयेऽनुब्रूहि वनस्पतये प्रेष्य इति सम्प्रैषौ, वषट्कृते जुहोति' (आपस्तम्बः)। ६।१०।८–९.

वपां स्रुवेणाभिधारयन् आहाध्वर्युः प्रैषं 'स्तोकेभ्योऽनुब्रूहि' इति। ७।२।१–२.

वपा पञ्चावत्तैव चतुरवत्तिनोऽपि। आज्यं, हिरण्यशल्कं, वपा, हिरण्यशल्क, आज्यं इति पञ्चावत्तत्वम्। हिरण्याभावे आज्यम्। ७।४।३-७.

वपाप्रशंसा। ७।३।१९; ४।१-२। आख्यायिका। ७।३।६.

वपाया स्तोकेषु उत्पन्नेषु स्तोकानुवचनीयाः प्रैषोत्तरं अन्वाह जुषस्व सप्रथस्तम इत्यृचम्। इमं नो यज्ञममृतेषु इति पञ्चर्चे सूक्तं च। ७।२.

वपाया याज्या युवमेतानि दिवि रोचना इति। ६।९।५-६.

वरणं पुरोहितस्य राज्ञा यज्ञकाले। ४०।४.

वरदानं ब्रह्मनमस्कारोत्तर यज्ञाङ्गराजाभिषेके। 'वरं ददामि जित्यै अभिजित्यै विजित्यै संजित्यै' इति। ३७।२।५-७.

वरुणग्रहः नाम जलोदरम्। ३३।३।१.

वल्गूयति=अर्चयति। ४०।३।५ सायणः।

वशाः ८ महाव्रतगतनिष्केवल्यशस्त्रस्य पक्षित्वेन कल्पितस्य उदरम्। 'उदरं वशः'। ता एकविंशतिर्भवन्ति ऋचः। विच्छन्दसो भवन्ति। स्वारतः पुरुषो इति विंशतिः। दधी रेकणः इति द्विपदा, नूनमथ इत्येकपदा इत्येकविंशतिर्भवन्ति। अथ सूददोहाः ता अस्य सूददोहसः इति। ऐआ ५।११।५-६.

वशायाः (वन्ध्यायाः गवादेः) सृष्टिः सोमाहरणे प्रसङ्गे गायत्र्याः नखस्य रक्तात्। १३।२।३.

वषट्कारः। अभिचारप्रयोगः, यं द्विष्यात् तं ध्यायेद् वषट्करिष्यन्। वषट्कारेण ऋतून् कल्पयति। वषट्कारेण दिवं अन्तरिक्षं पृथिवीं अपः सर्वं ब्रह्म इति षड् प्रतिष्ठापयति। आदित्यं ऋतुषु आदधाति। ११।६।१-४। वषट्कारः त्रिविधः। त्रयो वै वषट्काराः वज्रो धामच्छद् रिक्तः। स यमेवोच्चैर्बलं (बलेन) वषट् करोति स वज्रः। अथ यः समः संततः (याज्यया) अनिर्हाणर्चः (निर्हाणर्चः = याज्यापाठरहितः), स धामच्छत्। नीचैरुच्चारितः (याज्यापेक्षया), स रिक्तः। तत्र वज्र धामच्छत्प्रयोग इष्टार्थः, रिक्तस्य प्रयोगस्तु अनिष्टार्थः। ११।७।१-११। वषट्कारः याज्यया संततः कार्यः 'संततमृचा वषट् कृत्यं संतत्यै'। ११।७।१२-१३। वषट्कारात् प्राक् देवताध्यानं, यस्यै देवतायै हविर्गृहीतं स्यात्, तां ध्यायेद्वषट् करिष्यन्। ११।८।१। वषट्कारानुमन्त्रणे मन्त्रः, 'वाक्' इति के चित्, 'वषट्कार मा मां प्रमृक्षो माऽहं त्वां प्रमृक्षं बृहता मन उपह्वये व्यानेन शरीरं प्रतिष्ठाऽसि प्रतिष्ठां गच्छप्रतिष्ठा मा गमय' इति वषट्कारमनुमन्त्रयेत इत्यन्ये। 'ओजः सह ओजः' इत्येव वषट्कारमनुमन्त्रयेत इत्यपरे। 'वागोजः सह ओजो मयि प्राणापानौ' इत्यनुमन्त्रयेतेति सिद्धान्तः। ११।८।२–१०.

वसतीवरीषु एकधनासु च होतृचमसे समवनीयमानासु अनुवचनीया ऋक् आपो न देवीरुपयन्ति इति अपोनप्त्रीयसूक्तगता। ८।२।९.

वसन्ते द्वादशाहस्यास्य उदयनीयां कुर्युः। १९।४।११.

वसिष्ठः मण्डलर्षिः प्राणदृष्ट्या उपास्यः। ऐआ. २।९-१०.

वसिष्ठप्रासाहः वसिष्ठेन संपादितः महाव्रते निष्केवल्य दक्षिणः पक्षः। राथंतरो दक्षिणः पक्षः पञ्चदशः स्तोमः एकशतं वासिष्ठप्रासाहः। अभि त्वा शूर इत्यास्य इत्या ही सोमः इत्येतदन्तं ऋक्शतं एकाधिकं शतं संपद्यते। (पक्षः दक्षिणः इत्यत्र द्र०)। ऐआ. ५।८।७.

वसिष्ठयज्ञः नाम दर्शपूर्णमासविकृतिविशेषः। १४।२।९ सायणः।

वस्युः = वसीयान् धनवान्। ४०।३।१२.

वाग्देवता चतुर्थेऽहनि षष्ठे। २१।४।१-२.

वाचस्तः नाम मन्त्रः वस्तुत्वस्तुरगार्थः। 'ओष्ठापिधाना न कुल्यान्तैः परिवृता दन्तैः। सर्वस्य वाच ईशाना चारु मामिह वादयेत्॥' इति सायणः। ऐआ. ३।११।८.

वाग्विसर्गः उपांशु अन्तर्यामं चानुमन्त्र्य उपांशुसवनं ग्रावाणं अभिमृश्य वाचं विसृजते। आदौ वाङ्नियमस्तु प्रातरनुवाकोत्तरम्। ८।३।३-५.

वाग्विसर्गः वरदानमन्त्रोत्तरं यज्ञाङ्गराजाभिषेके वरदानमन्त्रेणैव। अयं वाग्विसर्गः लौकिकव्यवहाररूपः अत एव प्राङ् नियमो नोक्तः। ३७।५।५-७.

वाग्विसर्गः समयाविषिते सूर्ये अस्तमिते वा आहवनीयं परीत्य 'यदिहोनमकर्म यदत्यरीरिचाम प्रजापतिं तत् पितरमप्येतु इति मन्त्रेण द्वादशाहे दशमेऽहनि मानसग्रहे। २४।५।८-१६.

वाङ्नियमः सर्वेषां औदुम्बरीस्पर्शोत्तरं अहनि मानसग्रहे। २४।५।६-७.

वाङ्नियमः होतुः प्रातरनुवाकोत्तरं उपांश्वन्तर्यामहोमपर्यन्तम्। ८।३।१-२.

वाचःकूटः षष्ठेऽहनि शिल्पशस्त्रे प्रगाथैकपदयोः समूहः। वालखिल्यानां सूक्तानि पच्छो विहरन् प्रगाथे प्रगाथे एव एकपदा दध्यात्, स वाचः कूटः २९।८।५.

वाजपेये सप्तदश स्तोत्राणि शस्त्राणि च। उक्थ्योत्तरं द्वे द्वे। १४।३।१.

वाजिनस्य स्विष्टकृत्वास्ति तस्यानुवषट्कारेण सिद्धिः। ४।५।६.

वाणं शततन्तुं होता सज्जीकृत्य छन्दोगेभ्यः प्रयच्छति महाव्रते। ऐआ. ५।४।१-७.

वाणः शततन्तुर्वीणाविशेषः। विस्तृतफलकसंपादिता शततन्तुबन्धनपर्याप्ता वीणा। औदुम्बरी। महाव्रते (सारमंडळासारखें)। ऐआ. ५।४.

वानस्पत्यानि फलानि नैयग्रोध–औदुम्बर–आश्वत्थ–प्लाक्षाणि (विवरणी) चर्मणि पात्र्यां वा समोप्यानि महाभिषेके संभारः। ३९।२–३.

वान्तं आर्त्विज्यं तत्र प्रायश्चित्तं च 'आर्त्विज्यं त्रिविधं' इत्यत्र द्र०। १५।२।१–९.

वामदेवः मण्डलर्षिः प्राणदृष्ट्या उपास्यः। ऐआ. २।९–१०.

वामदेव्यं साम कया नश्चित्र आ भुवत् इत्यस्यां ऋचि उत्पन्नम्। अनेन साम्ना पृष्ठस्तोत्रं क्रियते। १५।२।५ सायणः।

वामदेव्यसाम्नो नित्यप्रयोगे आर्त्विज्यदोषपरिहारार्थं 'उ, रु, षः,' इत्यक्षरप्रयोगः प्रथमद्वितीयचतुर्थपादेषु कर्तव्यः। 'आर्त्विज्यं त्रिविधं' इत्यत्र द्र०। १५।२।१-१०.

वायव्यः पशुपुरोडाशः द्वादशाहे प्राजापत्ययज्ञयोः। १९।४।९-१२.

वायोरग्निर्जायते प्राणाद्धि बलान्मथ्यमानोऽधिजायते। ४०।५–१२.

वायौ विद्युत्, वृष्टिः, चन्द्रमाः, आदित्यः, अग्निः इत्येताः पञ्च देवताः परिम्रियन्ते (अदृश्यता गच्छन्ति)। ४०।५।२.

वारुणी इष्टिः 'अस्नातेन' इत्यत्र द्र० ।३२।८।५.

वार्त्रघ्नौ एव आज्यभागयोः पुरोनुवाक्ये दीक्षणीयायां पूर्वमीजानस्यानीजानस्य चेति सिद्धान्तः। अग्निर्वृत्राणि, त्वं सोमासि। पूर्वपक्षे तु त्वमग्ने सप्रथाः, सोम यास्ते मयोभुव इति पूर्वमनीजानस्य, । अग्निः प्रत्नेन मन्मना, सोम गीर्भिष्ट्वा इति पूर्वमीजानस्य इति। १।४।१–७.

वालखिल्याः वैश्वदेवशस्त्रे षष्ठेऽहनि। अभि प्र वः सुराधसं, सहचरसूक्तमिदम्। २२।९।१–९। वालखिल्याः षष्ठेऽहनि मैत्रावरुणशिल्पम्। ३०।२.

वालखिल्यानां सूक्तानि अष्टौ। तत्र षट् सूक्तानि प्रथमं पच्छः विहरेत्, ततः अर्धर्चशः, ततः ऋक्शः, ततः यथापठित अविहृतानि शंसेत्। तत्र पच्छः विहरणं यथा—१।१।१ + २।२।२ (सूक्तं ऋक् पादः), २।२।१ + १।१।२, १।१।३ + २।२।४, २।२।३ + १।१।४ एवं ऋग्द्वयग्रथनेन एकः प्रगाथः संपन्नः, अन्ते च इन्द्रो विश्वस्य गोपतिः इति एकपदा संदध्यात्। एवंरीत्या पर्णांविहरणम्। अर्धर्चशः विहरणं यथा–१।१।१ (सूक्त, ऋक्, अर्धर्चः) + २।२।२, २।२।१ + १।१।२ अयं एकः प्रगाथः, तदुत्तरं च एकपदा माहानाम्नानि पदानि च। अथ ऋक्शः विहरणं यथा—१।१ + २।२, २।१ + १।२ इत्येकः प्रगाथः, तदुत्तरं एकपदाश्च माहानाम्नानि पदानि च। आदिमस्वप्रगा-

यान्तेषु एकपदाः प्रक्षेपणीयाः । २९।८।५-१५ सायणः ।

वाशने (हंभासे) दोहकाले अग्निहोत्र्या धेन्वाः प्रायश्चित्त ' अग्निहोत्री ' इति शब्दे द्र० । २५।२।६. ३२।२।३.

विकर्णसाम्नो योनिः पृक्षस्य वृष्णो अरुषस्य इति । १८।५।३ सायणः ।

विचक्षणपदप्रयोगः अन्यसंबोधने इति दीक्षितस्य नियमः । १।६।८-१२.

विजवः = विशेषेण वेगो यस्मिन् पक्षमूले । यद्वा ग्रीवायाः अधस्तनाः अस्थिविशेषाः येन यैर्वा वेग उत्पद्यते, महाव्रते निष्केवल्यशस्त्रस्य पक्षित्वेन कल्पितस्य । सुतसे सोम उपयाहि इति तृचः शाखान्तरीयः शौनकेन पठितः (ऐआ ५।७।९-१२) ततः सूददोहाः । ऐआ. १।१७।७-८. ५।७।९-१३.

विद्युत् वृष्टेर्जायते । ४०।५।१६.

विद्युद् वै विद्युत्य वृष्टिमनुप्रविशति, सा अन्तर्धीयते । ४०।५।३.

विभूतयः प्राणपुरुषस्य । ऐआ. २।७।१-७.

विमुक्तिः विमोकः ' अहीनस्य ' इत्यत्र द्र० । २९।७।१-९.

विमोकः = विमुक्तिः । २९।७।१-९.

विविचीष्टिः ' अग्निना तपसा ' इत्यत्र द्र० । ३२।५।३.

विशः (प्रजा.) संजानते (संघटिता भवन्ति) समुखा एकमनसः यस्यैव विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः । ४०।२।४.

विश्वकर्मा भौवनः ऐन्द्रमहाभिषेकेन समन्तं पृथिवीं जयन् परीयाय अश्वेन च मेध्येनेजे । ३९।७।८ १०.

विश्वजित सर्वपृष्ठः गवामयने विषुवतः परस्तात् दशाहे चतुर्थमहः । १८।५।२.

विश्वजिति अतिरात्रे, षष्ठेऽहनि च शस्त्र समानम् । ३०।५।१.

विश्वजिति अहीनसूक्तानि होत्रकाणा माध्यंदिने । मैत्रावरुणस्य, आ त्वो यातु मघवान् । ब्राह्मणाच्छंसिनः, असा इदु प्र तवसे । अच्छावाकस्य, शासद् वह्निर्जनयन्त । २९।२।५.

विश्वजिति आज्यशस्त्रं अग्निं नरो दीधितिभिः इति पञ्चविंशत्यृचम् । ऐआ.५।१।४ सायणः । प्रउगं वायवा याहि दर्शत इति प्राकृतमेव । ऐआ. १।१।३। माध्यंदिने मरुत्वतीयं शस्त्रं अग्निष्टोमादतिदिश्यते, अधिकाश्च के चिद् विशेषा भवन्ति । तच्च सर्वं महाव्रते अतिदिश्यते तत्रापि के चिदधिका विशेषा भवन्ति । ऐआ.५।१।१।८ सायणः ।

विश्वजित् द्विविधः अतिरात्रसंस्थः अग्निष्टोमसंस्थश्च । तत्र संवत्सरान्ते अग्निष्टोमसंस्थः । तत्र होता तृतीयसवने एवयामरुतं शंसति । ३०।५।१-३.

विश्वामित्रः मण्डलर्षिः प्राणदृष्ट्या उपास्यः । ऐआ. २।९-१०.

विश्वामित्रो होता, जमदग्निरध्वर्युः, वसिष्ठो ब्रह्मा, अयास्य उद्गाता हरिश्चन्द्रस्य राजसूये । ३३।४।१.

विश्वेदेवा देवता षडहे तृतीयेऽहनि । २१।१।१-३.

विषुवति अहीनसूक्तानि होत्रकाणा माध्यंदिने, यानि विश्वजिति, तान्येव । २९।२।५.

विषुवति सामिधेन्यः एकविंशतिः । प्र वो वाजा इत्यादय एकादश, प्रथमोत्तमयोस्त्रिरावृत्त्या पञ्चदश, धाय्यास्थाने ' पृथुपाजा अमर्त्यः ' इत्यादयः षड् धाय्याः इति मिलित्वा एकविंशतिः । ताश्च महाव्रते चोदकप्राप्ताः । ऐआ. ५।१।२ सायणः ।

विषुवान् गवामयने मध्यममहः । तच्च दिवाकीर्त्यम् । तत्र पृष्ठ्यः षडहः + अभिजित् सर्वस्तोमः + स्वरसामानस्त्रय. + विषुवान् + स्वरसामानस्त्रयः पूर्ववैपरीत्येन + विश्वजित् सर्वपृष्ठः + पृष्ठ्यः षडहः इति क्रमः । १८।४।४ सायणः । तत्र विषुवति महादिवाकीर्त्यं पृष्ठं, विकर्णं ब्रह्मसाम, मार्ज अग्निष्टोमसाम, बृहद्रथन्तरे पवमानयोर्भवतः । प्रातरनुवाकः उदिते आदित्ये आलम्भनीयः पशुः सौर्यः सर्वश्वेतः । सामिधेन्यः एकविंशतिः । विषुवदहः एकविंशस्तोमकम् । निष्केवल्ये एकपञ्चाशतं द्विपञ्चाशतं वा शिल्पा निविद् । १८।५।३-६ । दूरोहणम् । १८।६।१-२१.

विष्टरदानं पुरोहिताय राज्ञा वरणान्ते । ४०।४ सायण ।

विष्टरमभिमृशति पुरोहित । ' आभिमर्श ' इत्या द्र० । ४०।४.

विष्टुति त्रिवृत्स्तोमस्य उद्यती नाम । उपास्मै गायता, दविद्युतत्या, पवमानस्य ते, इति त्र्यस्तृचा । तत्र प्रथमे पर्याये सर्वा प्रथमा ऋच, द्वितीये पर्याये सर्वा द्वितीया, तृतीये पर्याये सर्वास्तृतीया शसनीया इति । १४।४।१ सायण

विष्यन्दनप्रायश्चित्तं ' अग्निहोत्र ' इत्यत्र द्र० । ३२।४।१–५

विसंस्थितसचर =सम्यक् चरन्ति अनेन इति सचरो मार्ग । स च द्विविध संस्थितसचर विसंस्थितसचरश्च। सवने समाते सदस पश्चिमद्वारेण निर्गच्छति सोऽय संस्थितसचर । असमाते तु सवने प्राग्द्वारेण निर्गच्छति सोऽय विसंस्थितसचर । ऐआ ५।१।१० सायण. ।

विहरण (= मिश्रण) तदिदास इत्यादिसूक्तचतु श्यगतऋग्भि (२३) प्रत्यृच प्रतिपाद नद व ओदतीना इत्यस्या ऋच पादशो मिश्रणम् । तद्यथा तदिदास भुवनेषु ज्येष्ठ पु नद व ओदतीनाम् । यतो जज्ञ उग्र स्त्वेष नृम्णो रु नद योयुवतीनोऽऽञ्सयो जातो निरिणाति शत्रून् पतिं वो अघ्न्यानाम् । अनु य विश्व मदन्त्यूम वो धेनूनामिषुध्यसोऽऽऽम् । इति । एवमेव प्रत्यृच विहरणम् । ऐआ १।१३ १६ ५।६।४।६

विहरण = धिष्ण्येषु अग्निविहरण आग्नीध्रात् । १०।४।२

विहरण = स्वस्थानात् विभज्य अ यत्र नयनम् । गायत्रीणा पङ्क्तीना च । प्रथमायामृचि गायत्री पङ्क्त्या प्रथमपादयोर्व्यतिषङ्ग, एव द्वितीययो पादयो एव तृतीययो पादयो । तत पङ्क्ते चतुर्थपञ्चमपदयो । एव द्वितीयस्या तृतीयस्या च ऋचि । तेना नुष्टुभ सम्पद्यन्ते । तत्र आ त्वा वहन्तु हरय इति तिस्रो गायत्र्य, उपोषु शृणुही गिर इति पङ्क्तय । यदि द्र पृतनाज्येषु, अय ते अस्तु हर्यत इति उष्णि-हश्च बृहतीश्च व्यतिषजति अनुष्टुप्कारम् । आ धूर्ष्वस्मै, ब्रह्मान् वीर ब्रह्मकृति जुषाण इति द्विपदा च त्रिष्टुभ च व्यतिषजति । एष ब्रह्मा (इति तिस्रो द्विपदा) प्रते महे विदथे (तिस्रो जगत्य) इति द्विपदाश्च जगतीश्च व्यतिषजति । इद सर्वे विहृते पाङ्क्ते शस्त्रे १६।३।१-४

विहार , विहरण, विरहति, विहृत = एकऋग्गत पादस्य अर्धर्चस्य ऋच एव वा दूरस्थऋग्गतेन पादेन अर्धर्चेन ऋचैव वा सयोजनम् । २९।८।५ सायण ।

विहृत षोडशिन पाप्मानमपजिघासु शसयेत् । १६।४।५ ६

विहृत षोडशिशस्त्र स्तोत्र च । यथाधीतपाठ त्यक्त्वा यथाविधि परस्परव्यतिषङ्गपाठोऽत्र निष्पाद्यते।१६।२।४ सायण ।

वीणाध्यानम् । ऐआ ३।११।३ ६

वीतय (अकारान्त शब्दोऽयम्) प्रेङ्खस्य रज्जव उपरि यस्मिन् निबध्य ते तत् तिर्यक् स्थूल काष्ठम् । ऐआ १।७।८ सायण ।

वीवध =स्तम्भयोरुपरि तिर्यक् स्थाप्य काष्ठविशेष । यत्र प्रेङ्ख अवलम्बत । महाव्रते माध्यदिने । होतृसदन मभित दक्षिणोत्तरौ स्थूणौ निखाय तदुपरि वीवधम त्यादधाति । द्विधा तयोश्च दार्भीभ्या रज्जुभ्या प्रेङ्खस्य बध्नाति । एआ ५।३।३–८

वृक्षचतुष्टयफलानि ऐन्द्रमहाभिषेके सभार । नैय ग्रोधानि औदुम्बराणि आश्वत्थानि प्लाक्षाणि चेति । ३९।२।१–२

वृषाकपिसूक्त वैश्वदेवशस्त्रे षष्ठेऽहनि । वि हि सोता रसृक्षत । सहचरसूक्तमिदम् । २२।१०।१–३

वृषाकपिसूक्ते ब्राह्मणाच्छसिशिल्पे षष्ठेऽहनि न्यूङ्ख । ३०।३

वृष्टि चन्द्रमसो जायते, चन्द्रमा आदित्याज्जायते । ४०।५।१५

वृष्टिर्वै वृष्ट्वा चन्द्रमसमनुप्रविशति साऽ तर्धीयते । ४०। ।७

वृष्टेर्विद्युज्जायते । ४०।५।१६

वेदपुरुषो नाम चत्वारो वेदा । ऐआ ३।१।२,५.

वैकर्तः=पार्श्वस्थः प्रौढो मांसखण्डः। ३१।१।२ सायणः।

वैराजं साम चतुर्थेऽहनि षडहे। २१।४।१–२.

वैराजसामयोनिः पिबा सोममिन्द्र इति। १७।७।६ सायणः।

वैराजसाम्न. स्तोत्रियस्तृचः पिबा सोममिन्द्र इति। २४।४।१९.

वैराजस्य बृहत्- सत्राग्नात् सृष्टिः।१९।६।२.

वैरूपं साम तृतीयेऽहनि षडहे। २१।१।१–३

वैरूपसामयोनिः यद् द्याव इन्द्र ते शतम् इति। १७।७।६ सायणः।

वैरूपस्य रथंतरात् सृष्टि :। १९।६।१.

वैश्यः अन्यस्य बलिकृत्, अन्यस्य आद्यः (स्वादनीयः) यथाकामज्येयः (परदान पराधीनत्व-अभिभवनीयधर्मा)। ३५।३।३.

वैश्यः अहुतादः। आर्त्विज्याधिकाराभावात्। ३४।१।१०.

वैश्यः क्षत्रियं देवयजन याचते। ३४।२।१.

वैश्यस्य अग्निप्रणयने अयमिह प्रथमोऽधायि इति जगती प्रथमा। ५।२।१०–१२.

वैश्यानां दधिमक्षः सोमयागादौ। ३५।३।३.

वैश्वकर्मणः ऋषभः उपालम्भनीयः पशुः। उपांशु। महाव्रते सवनीयपशुभिः समुचीयते ऐतरेयिणा, इतरेषां। विकल्पः। ऐआ. ५।१।३.

वैश्वदेवं वै तृतीयसवनम्। २८।७।१.

वैश्वदेवं शस्त्रं अग्निष्टोमे तृतीयसवने। प्रतिपत् तृचः तत्सवितुर्वृणीमहे। अनुचरस्तृचः अद्या नो देव सवितः। निविद्धानं सूक्तं सावित्रं अभूद्देवः सविता, पञ्चर्चः निविदः (४।१–२०) (ऋ. सं. १।१५९।१-४) ततः सूक्तशेषः षष्ठी। 'एकया च'। निविद्धानं सूक्तं द्यावापृथिवीयं प्र द्यावा यज्ञैः पृथिवी (ऋसं १।१५९। १-४) निविदः (५।१–१५), सूक्तशेषः पञ्चमी। ऋक् सुरूपकृत्नुमूतये। निविद्धानं सूक्तं आर्भवं तक्षन् रथ सुवृत (१–४), निविदः (६।१–१७), सूक्तशेषः पञ्चमी। ऋक् अयं वेनाश्चोदयत्। ऋचौ येभ्यो माता मधुमत्, एवा पित्रे विश्वदेवाय। निविद्धानं सूक्तं वैश्वदेवं आ नो भद्राः क्रतवो (१-८) निविदः (७।१–३०) सूक्तशेषः नवमी दशमी चेति, तत्र दशमी परिधानीया। १३।५-८.

वैश्वदेवं शस्त्रं छन्दोमे प्रथमेऽहनि। प्रतिपत् तृचः तत्सवितुर्वृणीमहे। अनुचरस्तृचः गायत्रः अद्या नो देव सवितः। सावित्रं सूक्तं गायत्रं तृचं अभि त्वा देव सवितः। सूक्तं द्यावापृथिवीयं तृचं गायत्रं अयं देवाय जन्मने। द्विपदाः आ याहि वनसा सह (१–४)। वैश्वदेवं सूक्तं गायत्रं ऐभिरग्ने दुवो गिरः। २३।२। ६–१२.

वैश्वदेवं शस्त्रं छन्दोमद्वितीयेऽहनि। प्रतिपत् तृचः विश्वो देवस्य नेतुः (१), तत्सवितुर्वरेण्यं गायत्र्यौ (२-३)। अनुचरस्तृचः गायत्रः आ विश्वदेवं सत्पतिम्। चतुर्ऋचः सावित्रः गायत्र हिरण्यपाणिमूतये। तृच. द्यावापृथिवीयो गायत्रः मही द्यौः पृथिवी। तृचः आर्भवः गायत्रः पुनाना पितरा पुनः। द्विपदाः इमा नु कं भुवना (१-५)। वैश्वदेवं सूक्तं गायत्रं देवानामिदवो महत्। २३।४।८-१४.

वैश्वदेवं शस्त्रं छन्दोमतृतीयेऽहनि। प्रतिपत् तृचः तत्सवितुर्वृणीमहे। अनुचरस्तृचः अद्या नो देव सवितः। तृचः सावित्रो गायत्रः (सौत्रः) दोषो आगात्। तृचो द्यावापृथिवीयो गायत्रः प्र वां महि द्यवी। तृचः आर्भवो गायत्र. इन्द्र इषे ददातु नः (१) ते नो रत्नानि धत्तन (२-३)। द्विपदाः बभ्रुरेको वि षु णः (१-१०)। सूक्तं वैश्वदेवं गायत्रं ये त्रिंशति त्रयस्परः। २४।२।९-१५.

वैश्वदेवं शस्त्रं षडहे प्रथमेऽहनि। प्रतिपत् तृचः तत्सवितुर्वृणीमहे। अनुचरस्तृचः अद्या नो देव सवितः। सूक्तं सावित्रं युञ्जते मन उत युञ्जते। सूक्तं द्यावापृथिवीयं प्र द्यावा यज्ञैः। सूक्तं आर्भवं इहेह वो मनसा। सूक्तं वैश्वदेवं देवान् हुवे बृहत्। २०।२।३-९.

वैश्वदेवं शस्त्रं षडहे द्वितीयेऽहनि। प्रतिपत् तृचः [विश्वो देवस्य (१) तत्सवितुर्वरेण्यं (२-३)।अनुचरस्तृचः] आ विश्वदेवं सत्पतिम्। सूक्तं सावित्रं उदु ष्य देवः

सविता । सूक्तं द्यावापृथिवीयं ते हि द्यावापृथिवी । सूक्तं आर्भवं तक्षन् रथं सुवृतं । सूक्तं वैश्वदेवं द्यार्यातं मानवं यज्ञस्य वो रथ्यम् । २०।४।२-७.

वैश्वदेवं शस्त्रं षडहे तृतीयेऽहनि । प्रतिपत् तृचः तत्सवितुर्वृणीमहे । अनुचरस्तृचः अद्या नो देव सवितः। सूक्तं सावित्रं तद्देवस्य सवितुर्वार्यम् । सूक्तं द्यावापृथिवीयं घृतेन द्यावापृथिवी । सूक्तं आर्भवं अनश्वो जातो । सूक्तं वैश्वदेवं परावतो ये दिधिषन्त । २१।२।६ १२.

वैश्वदेवं शस्त्रं षडहे चतुर्थेऽहनि । प्रतिपत् तृचः विश्वो देवस्य (१) तत्सवितुर्वरेण्यं (२-३) । अनुचरस्तृचः आ विश्वदेवं सत्पतिम् । सूक्तं सावित्रं आ देवो यातु सविता । सूक्तं द्यावापृथिवीयं प्र द्यावा यज्ञैः । सूक्तं आर्भवं प्र ऋभुभ्यो दूतमिव । सूक्तं वैश्वदेवं प्र शुक्रैतु देवी मनीषा । २१।५।६-११.

वैश्वदेवं शस्त्रं षडहे पञ्चमेऽहनि । प्रतिपत् तृचः तत्सवितुर्वृणीमहे । अनुचरस्तृचः अद्या नो देव सवितः। तृचः सावित्रः उदु ष्य देवः सविता । चतुर्ऋचः द्यावापृथिवीयः मही द्यावापृथिवी । सूक्तं आर्भवं ऋभुर्विभ्वा वाज । सूक्तं वैश्वदेवं स्तुषे जन सुव्रतम् । २२।३।६-१०.

वैश्वदेवं सूक्त षडहे षष्ठेऽहनि । प्रतिपत् तृचः अभि त्यं देवं (१) तत्सवितुर्वरेण्यं (२ ३) । अनुचरस्तृचः दोषो आगात् । सूक्तं सावित्रं उदु ष्य देवः सविता । सूक्तं द्यावापृथिवीयं कतरा पूर्वा कतरा परा । सूक्तं आर्भवं त्रयोदश ऋचः किमु श्रेष्ठः किं यविष्ठो, चतुर्ऋचं उप नो वाजा अध्वर । सूक्तद्वयं वैश्वदेव नाभानेदिष्ठं मानवं इदमित्था रौद्रं, ये यज्ञेन दक्षिणया इति सूक्तम् । वालखिल्याः सहचरसूक्तं अभि वः पुराधराम् । सूक्तं सुकीर्ति काक्षीवतं 'अप पाच इन्द्र' वृषाकपिसूक्तं 'विहि सोतोरसृक्षत'। एवयामरुतं प्र वो मदे मतयो मन्तु । २२।८-१०.

वैश्वदेवं शस्त्रं महाव्रते । प्रतिपत् तृचः तत्सवितुर्वृणीमहे । अनुचरस्तृचः अद्या नो देव सवितः । प्रतिपदनुचरौ ऐकाहिकौ । सूक्तं सावित्रं तद्देवस्य सवितुर्वार्यम्। सूक्तं द्यावापृथिवीयं कतरा पूर्वा कतरा परा । सूक्तं आर्भवं अनश्वो जातो अनभीशु । सूक्तं वैश्वदेवं 'अस्य वामस्य पलितस्य' 'गौरीर्मिमाय' इत्येतदन्तम् । सूक्तं वैश्वदेवं 'आ नो भद्राः क्रतवो' ऐकाहिकम् । ऐआ. १।२२।१-१०.

वैश्वदेवशस्त्रस्य तृतीय सवने प्रतिपदस्तृचस्य उत्तरे द्वे ऋचौ गायत्र्यौ अनुचरश्च गायत्रः । १३।४।३.

वैश्वदेवशस्त्रस्य प्रतिपत् तत्सवितुर्वृणीमहे । तस्यादौ निवित् सविता देवः सोमस्य पिबतु (४।१-२०), अन्ते च निवित् सविता देव इह श्रवत् (३।१५-२०)। 'एकया च' इति वाय्व्या । द्यावापृथिवीयं सूक्तं प्र द्यावा यज्ञैः । १३।५।४-७। आर्भवं सूक्तं तक्षन् रथम्। धाय्ये आदौ सुरूपकृत्नुं, अन्ते अयं वेनश्चोदयत् । अन्त्यधाय्यायाः प्राक् येभ्यो माता, एवा पित्रे इति द्वे ऋचौ ।१३।६।१ ४ ।

वैश्वदेव सूक्तं आ नो भद्राः । आहावः उभयतो धाय्याम् । १३।७।१-३ । शंसनपूर्वकाले दिष्ण्यानम्। द्वेष्यदिशि न ध्यानम् । परिधानीया अदितिर्द्यौः । परिधानीया द्विः पच्छः परिदधाति सकृदर्धर्चशः । परिधानकाले भूमिस्पर्शः । याज्या विश्वे देवाः शृणुतेमम् । १३।७।७ १५.

वैश्वानरी इष्टिः । 'आग्रयणेना निष्ट्वा' इत्यत्र द्र० । ३२।८।१.

वैश्वानरीयं सूक्तं आग्निमारुतशस्त्रस्य प्रतिपत् वैश्वानराय पृथु पाजसे । प्रथमा ऋगनवानम् पश्चात्त विवेक्तव्यम् । १३।११।१.

वैष्णवस्य घृतयागस्य याज्या 'उरु विष्णो विक्रमस्व' इति । आश्वला० ५।१९।२.

वैष्णवी ऋक् आग्निमारुतशस्त्रे विष्णोर्नुकं, वैष्णुवारुण्या उत्तरम् । १३।१४।४.

वैष्णुवारुणी ऋक् आग्निमारुतशस्त्रे । अनुपानीयोत्तरं, ययोरोजसा स्कभिता । १३।१४।३.

व्यतिमर्शो विहरणं यथापाठक्रमं परित्यज्य प्रकारान्तरेण ऋग्गतपदादीना संयोजनम् । २९।८।५. सायणः ।

व्यतिषङ्गः । प्रायणीयोदयनीययोः याज्यानुवाक्याव्यत्यासः । याः प्रायणीयस्य पुरोऽनुवाक्यास्ता उदयनी-

यस्य याज्या कुर्यात् । या उदयनीयस्य पुरोऽनुवाक्या स्ता प्रायणीयस्य याज्या कुर्यात् ।१।५।१ १२

व्यपनुत्तिवचनं दिगुपस्थानोत्तर यज्ञाङ्गराजाभिषेके अप प्राच इन्द्र विश्वाँ अमित्रान् इति ऋक्पठनम् । ३७।६।८

व्याघ्रचर्म आसन्द्यामुपरि आस्तृणाति उत्तरलोम प्राचीनग्रीव यज्ञाङ्गराजाभिषेके । ३७।२।१

व्याहावनिषेध त्रिष्टुप्सूक्तप्रतिपदर्थे । २९।५।१२

व्याहृतय भूर्भुव स्व. इति । ऐब्रा ।११०।९.

व्याहृतित्रयस्य सृष्टि । प्रजापतिस्तपस्तप्त्वा लोकानसृजत । पृथिवीमन्तरिक्षं दिवम् । तेभ्यस्त्रीणि ज्योतींषि अजायन्त अग्नि वायु आदित्य इति । तेभ्य क्रमेण त्रयो वेदा अजायन्त । तेभ्य क्रमेण व्याहृतित्रय अजायत । ताभ्य अकार–उकार–मकारा अजायन्त । तदेतदोम् इति । २५।७।१ ९

व्याहृतिभि प्रजा प्रायश्चित्तानि जुहोति । ऋचां भ्रेषे भू स्वाहा इति गार्हपत्ये । यजुर्भ्रेषे सामयागे आग्नीध्रे, हविर्धनेषु च दक्षिणाग्नौ भुव स्वाहा इति इति । सामभ्रेषे स्व स्वाहा इति आहवनीये । विज्ञभ्रेषे अविज्ञातभ्रेषे वा भूर्भुव स्व स्वाहा इति आहवनीये ।२५।१०।२.

व्यूढ द्वादशाह ११ २४ अध्यायेषु उक्त ।

व्यूढ पृष्ठ षडह २० २२ अध्यायेषु ।

व्यूढत्वनाम स्वस्वस्थानविपरीतत्वेन छन्दांसि यत्र तानि ... दानि व्यूढच्छन्दा । तस्य भावो व्यूढत्वम् । १०।५।१–४

व्यूढत्व प्रतिष्ठाक्रमविपर्ययात् । यथा ... व्यूढे षडहे च । ७।८।५ भाष्य ।

व्यूढे पृष्ठ्ये षडहे चतुर्थेऽहनि ... । २१।१।१–९

व्रतं, ... , चतुर ... , अथ ... , अथ द्वौ । ... , द्वौ ... । ४।८।४–६

...

यवागू , वैश्यस्य आमिक्षा । १४।२।३

व्रत (नियमरूप) 'ब्रह्मण परिमरोपासकस्य' यजमानस्य । न द्विषत पूर्वं उपविशेत् । यदि तिष्ठन्त मन्येत तिष्ठेतैव । न द्विषत पूर्वं संविशेत् । यथासीन मन्येत, आसीतैव । न द्विषत पूर्वं प्रस्वप्यात्, यदि जाग्रत मन्येत जागृयादेव इति । ४०।५.

व्रातपती इष्टि 'अव्रत्याचरणे' इत्यत्र द्र० । ३२।७।२

व्रातभृती इष्टि 'उपक्षये अश्रुकरणे' इत्यत्र द्र० । ३२।७।१.

व्रीहिमयो वा यवमयो वा पशुपुरोडाश ।६।८।७. ७।१।१२

व्रीहीणा महाव्रीहीणा च ... (मोड पृष्ठ ६६ भा ष) ... पाक्या वा सौम्यानि ऐन्द्रमहाभिषेके संभार ३९।२।३ ४.

शत्रुक्षत पूर्वव्यवन्त प्रायणीय भवति । १५।१।२.

शंसने नियमो महाव्रतस्य । 'नादीक्षितो महाव्रत शंसेत्, नानग्नी (निर्याग्निदीक्षिते), न, परस्मै, नासंवत्सरे इत्येके (संवत्सर ...), ... आचार्याय वा शंसेत्' । ऐआ ५।३।४।३

शकलादुपरोहण सोमस्य । 'अ... सुत स्यात् ... विमुच , अथ ... (सोम) उपावहरेयु (... आनयेयु) । ३।३।१

शतर्चिन , माध्यमा , गृत्समद , विश्वामित्र , वामदेव , अत्रि , भरद्वाज , वसिष्ठ , प्रगाथा , पावमान्य , क्षुद्रसूक्ता , महासूक्ता ... ऋग्वेदे ... । ऐआ २।१–२०.

शत्रुभयार्थे 'ब्रह्मण परिमर' नाम प्रयोग । ४०।५।१ –२

शत्रुमारणार्थं प्रयोग । ... ... 'इमे ... ' इति ... । १३।११।७ । ... ... , ... 'इमम्... ' ... ...

भिमृश्य आतिष्ठस्वैतां इत्यादिमन्त्रं ब्रूयात् । ततः 'अभीवर्तेन हविषा' इति सूक्तेन दिक्षु आवर्तयेत् । तत एनं राजानं अप्रतिरथेन (आशु, शिशानो), शासेन (शास इत्था), सौपर्णेन (प्रधारयन्तु मधुनः) च सूक्तेन अन्दीक्षेत । जयति ह । ३७।६।२–५.

शत्रूणां व्यपनुत्तिवचनं द्विगुपस्थानोत्तरं यशाद्राजाभिषेके । अप प्राच इन्द्र विश्वाँ अमित्रान् इत्यृगुजपः । ३७।६।८.

शपथकारिभिः संभूयशपथकारिभिःसंघटनां कुर्वद्भिः परस्परं द्रोहो न कर्तव्यः । ४।७।७.

शपथग्रहणं क्षत्रियेण महाभिषेकात् प्राक् । 'या च रात्रीमजायेऽहं यां च प्रेतास्मि तदुभयमन्तरेण इष्टापूर्तं मे लोकं सुकृतमायुः प्रजा वृञ्जीथा यदि ते द्रुह्येयं' इति । अयं पुरोहिताग्रे शपथः । ३९।१।१३.

शपथदानं पुरोहितेन क्षत्रियाय महाभिषेकात् प्राग् । 'यां च रात्रीमजायेथाः यां च प्रेतास्मि तदुभयमन्तरेण इष्टापूर्तं ते लोकं सुकृतमायुः प्रजां वृञ्जीय यदि मे द्रुह्येः' इति । ३९।१।१-२.

शफौः प्रवर्ग्ये महावीरग्रहणार्थे उदुम्बरकाष्ठनिर्मितौ दण्डविशेषौ । ४।५।१४ सायणः ।

शबराः 'के चित् विश्वामित्रपुत्राः शप्ताः' संजाताः । ३३।६।२.

शमलगृहीतस्य लोकविरुद्धाचरणेन स्वीकृतस्य अग्निष्टोमे प्रातरनुवाके अष्टौ शतानि अनूच्यानि ऋचाम् । ७।७।६.

शमितुः अर्धं वैकर्तस्य श्लोमा च पशुभागः । तद् ब्राह्मणाय दद्यात् यदि शमिता अब्राह्मणः स्यात् । ३१।१।२.

शरणं ह वासः । गृहं वासार्थं भवति इत्यर्थः । ३३।१।८.

शरभः अष्टाभिः पादैरुपेतः सिंहघाती मृगविशेषः । स च अमेध्यः अभक्ष्यः । पक्षिरूपं च शरभं के चिन्मन्यन्ते । ६।८।६.

शरीरपुरुषः देह एव चेतनः । तस्य चैतन्यं रसः । ऐआ ३।१।२-३.

शल्यकः = मर्कट शरीरपरिमितः शल्याख्यः मृगः; यस्य पुच्छसमीपे बहवो रोमविशेषाः प्रादेशपरिमिता तीक्ष्णाग्राः उत्पद्यन्ते । १३।२।३ सायणः ।

शवाग्निना अग्निना संसर्गे प्रायश्चित्तम् । अग्नये शुचये अष्टाकपालं निर्वपेत् । अग्निः शुचिमत्तमः, उदग्ने शुचयस्तव इति याज्याऽनुवाक्ये । आहुतिं वा आहवनीये जुहुयात् अग्नये शुचये स्वाहा इति । ३२।६।३.

शष्पाणि (श्यामतृणानि कोमलानि) यशाद्ग; राजाभिषेके संभारः चमसे पात्र्यां वा समोप्यः । ३७।१।३.

शस्त्रं अच्छावाकस्य ऐन्द्राग्नं प्रातःसवने आज्यं 'इन्द्राग्नी आगतं' अग्निष्टोमे । १०।४।४.

शस्त्रं चतुर्होतृमन्त्रपठनरूपं द्वादशाहस्य दशमेऽहनि मानसग्रहे औदुम्बरीं समन्वारभन्ते । वाचं यच्छति अहनि । आहावः 'अध्वर्यो' इति । प्रतिगरः 'ॐ होतस्तथा होतः' इति । शस्त्रं च, 'तेषां चित्तिः स्रुगासीऽऽऽत् । चित्तमाज्यमासीऽऽऽत्' इत्यादीनि दश पदानि । २४।४-६.

शस्त्रं, यथा वाव शस्त्रमेवं याज्या । १०।५।१५ । यथा वाव स्तोत्रमेवं शस्त्रम् । १०।५।४,८;११।४।१.

शस्त्रजरः प्रातःसवने होतुः 'उक्थं वाचि' इति । अध्वर्योः 'ओमुक्थ शाः' इति । माध्यंदिने 'उक्थं वाचीन्द्राय' इति होतुः । अध्वर्योस्तु 'ओमुक्थशाः' इति तृतीयसवने होतुः 'उक्थं वाचीन्द्राय देवेभ्यः' इति । अध्वर्योस्तु 'ओऽऽऽम्' इति । १२।१।२-४.

शस्त्रयाज्याः रात्रिपर्यायेषु होतुः अतिरात्रे । १६।६।३.

शस्त्राणां छन्दोदैवतविषये प्रश्नोत्तरे । २८।७।१–४। परिधानीयाना छन्दसि प्रश्नोत्तरे । २८।७।५.

शस्त्राणि द्वादश अग्निष्टोमे । आज्यं, प्रउगं इति द्वे प्रातःसवने । निष्केवल्यं, मरुत्वतीयं इति द्वे माध्यंदिने । वैश्वदेवं, आग्निमारुतं इति द्वे तृतीयसवने । इति होतुः षट्, होत्रकाणां च षट् इति द्वादश । १४।१।४.

शस्त्राणि पञ्चदश उक्थ्यस्य अग्निष्टोमात् त्रीणि अधिकानि ।

शस्त्रावयवविशेषाः पञ्च आहावः, प्रतिपत्, ऋक्त्रयं, वषट्कारश्चेति । १२।१२।४ । किंच स्तोत्रियः (प्रतिपत्) अनुरूपः (अनुचरः) धाय्या, प्रगाथः, सूक्तं चेति । १२।१२।७.

शस्त्रेषु स्तोत्रेषु च क्षत्रियस्याग्निष्टोमे विशेषः । प्रातः सवनं तृतीयसवनं च ऐकाहिकम् । उभयसाम्नो बृहद्रथन्तरस्य अभिजिदादेर्यो माध्यंदिनः पवमानः, स एव । मरुत्वतीयशस्त्रस्य प्रतिपदनुचरौ आ त्वा रथं, इदं वसो सुत इति । इन्द्रनिहवः प्रगाथः । ब्राह्मणस्पत्यः प्रगाथ उत्तिष्ठ ब्रह्मणस्पते । धाय्याः । मरुत्वतीयः प्रगाथः ऐकाहिकः । निविद्धानं सूक्तं जनिष्ठा उग्रः सहसे इति एकादशर्चं गौरिवीतम् । निष्केवल्यशस्त्रस्य प्रतिपत् त्वामिद्धि हवामहे अनुरूपः अभि त्वा शूर । धाय्या यद्वावान । सामप्रगाथः उभयं शृणवच्च नः । निविद्धानं सूक्तं तमु ष्टुहि यो अभि इति पञ्चदशर्चं भारद्वाजम् । होत्रा ऐकाहिकाः । क्षत्रियस्य उक्थ्यः पञ्चदशः इति केचित् । ज्योतिष्टोम एव अग्निष्टोमः स्यादिति सिद्धान्तः । स्तोमाश्चत्वारः त्रिवृत्, पञ्चदशः, सप्तदशः, एकविंशः । यशाञ्जोऽभिषेक अमित्राणां व्यसनुहि । प्रवदहोमः । ३६।१–८. ३७।१–७.

शाकरं साम पञ्चमेऽहनि पडहे । २२।१।१–५.

शाकरसामयोनिः प्रोष्ठमे पुरोरथम् । १७।७।६ सायणः ।

शाकरस्य रथंतरात् सृष्टिः । १९।६।३.

शान्तिमन्त्रः प्रार्थनामन्त्रः 'वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितं' इत्यादिः । ऐआ. २।२६.

शान्तिमन्त्रवाचनं राज्ञः आसन्दारोहणोत्तरं अभिषेकात् प्राक्, शिवेन मा चक्षुषा पश्यतापः इत्यादिर्मन्त्रः । महाद्‌गराज्याभिषेके । ३७।२।१–११.

शान्तिमन्त्रवाचनं सुराकंसदानोत्तरं महाद्‌गराज्याभिषेके 'नाना हि वा देवहितं' इत्यादिर्मन्त्रः । ३७।४। १०–१२.

शापवचनं प्राणीरावद्दनिन्दकं प्रति प्राणीरावकस्य । 'अनुव्याहाराः' इत्यत्र द्र० । ऐआ. ३।४.

शामित्रदेशे पशोर्नयन, पुरस्तादग्निः उल्मुकरूपो नेतव्यः । ६।६।८–१०. ७।१।४–५.

शामित्रदेशे पशुहननस्थले अध्वर्युणा बर्हिषः प्रक्षेपः । ७।१।६–७.

शार्यातो मानवः ऐन्द्रमहाभिषेके बलेन समन्तं पृथिवीं जयन् परीयाय अश्वेन च मेध्येनेजे । ३९।७।४.

शालाप्रवेशः दीक्षितसंस्कारः । १।३।१०–११.

शालामुखीये होमः द्वादशाहस्य दशमेऽहनि मानसग्रहे । सदसः प्रसृप्य तीर्थे मार्जयित्वा पत्नीशालां संप्रपद्य समन्वारभध्वं इत्युक्त्वा 'इह रमेह रमध्वं' इत्यादिना होमः । २४।३।६–१३.

शासः नाम सूक्तं शास इत्था इति । अनेन सूक्तेन अभिषिक्तः क्षत्रियः शरणागतं परान् जिगिषुं राजानं अपेक्षते । ३७।६।४.

शिरः अथयत ब्रह्म । मूर्धनि सहस्रारे ब्रह्मध्यानम् । ऐआ २।४।६.

शिर. निष्केवल्यशस्त्रस्य पक्षित्वेन क्लृप्तस्य महाव्रते । इन्द्रमिद् गाथिन इति दशर्चं सूक्तं अन्ते सूददोहाश्च । ऐआ. १।१७।४–६. ५।६।६–८ । शिरः अर्धर्चशः शंसनीयम् । ५।७।१४। अन्यासु चेत् समाम्नातासु स्तुवीरन् (उद्गातारः, तदा–) उभयसंस्थाः स्तोत्रियाः आदौ पठित्वा ततः इन्द्रमिद् गाथिनः इत्यादि तृचोऽपि पठनीयः, न विपर्ययः । असमाम्नातासु चेत् स्तुवीरन् मिश्रासु च (समाम्नात–असमाम्नातासु चेति) तदाऽपि अयमेव न्यायः । इन्द्रमित्सूक्तस्य या दशमी, तस्याः स्थाने सूददोहाः पठनीया दशम्यास्तु प्रागुद्धारः । ऐआ. ५।७।७.

शिरसः नित्यार्थे: शिरसः उपस्थानं महाव्रते माध्यंदिने । होता प्रदक्षिणमग्निं निष्क्रम्य अग्नेग यूप पुरस्तात् प्रत्यङ्मुखस्तिष्ठन् अग्नेः शिर उपतिष्ठते 'नमस्ते गायत्राय यत्ते शिरः' इति । ऐआ. ५।२।२.

शिल्पं अष्टाचत्वारिंश, षष्ठेऽहनि, एवयामरुत् शंसति, नद् न्वृद्य्गवति । ब्राह्मणाच्छंसिनः 'अव प्राच इति सुवीर्यं शंसति' । नेष्टा प्रदानस्य चान्तिक्या: वाचः कृतश्च । होतुः 'नामानेदिष्ठं शंसति' । तस्य प्रागुरोचमासः ये

यज्ञेन इति सूक्तं आवपेत।३०।१.४.

शिल्पप्रशंसा। ३०।१।१–५.

शिल्पशस्त्रं धिष्ण्यशस्त्रम्। षष्ठेऽहनि तृतीयसवने। २९।८.

शिल्पानि शंसति। ३०।१–१०.

शिल्पानि सहचराणि नाभानेदिष्ठं, वालखिल्याः, वृषाकपिः, एवयामरुत् इति चत्वारि। एतानि सह वा शंसेत् सह वा न शंसेत्। ३०।४।५–६.

शिशिरे ऋतौ द्वादशाहस्य दीक्षाः कर्तव्या। १९।४।३.

शिष्टाः आचार्यादीनामागमनात् प्राक् पश्चाद्वा नोत्तिष्ठन्ति, किंतु यावता देशव्यवधानेन ते पश्येयुः तावति देशे तद्दृष्टिपाते एव सहसोत्तिष्ठन्ति। 'एषा वा अपचितिः, यां पश्यते करोति'। ऐआ १।८।१७.

शीर्षण्यानूच्यानि अरत्निमात्राणि। शिरसि उपरिभागे अवस्थितानि अन्वक्=निर्गक् अवस्थितानि काष्ठानि। शिर्षण्यानि च तानि अनूच्यानि च काष्ठानि अरत्निमात्राणि आसन्द्याः औदुम्बर्याः। अभिषेके। ३७।१।३.

शुक्रः पक्षः यागेषु मुख्यः।१९।५।८.

शुचीष्टिः 'शवाग्निना' इत्यत्र द्र०।३२।६।३.

शुनःशेपः देवानुपससार। प्रजापतिं, कस्य न्दन कतमस्य ऋक्। अग्निं, अग्नेर्वयं प्रथमस्य ऋक्। सवितारं, अभि त्वा देव सवितः तृचः। वरुणं, अभि त्वा देव इति सूक्ते तृचात् उत्तराभिः ३१ ऋग्भिः। अग्निं, तत उत्तराभिः २२ ऋग्भिः। विश्वान् देवान्, नमो महद्भ्यो ऋक्। इन्द्रं, यच्चिद्धि सत्य सोमपाः सूक्तं, उत्तरसूक्तस्य च १५ ऋचः। इन्द्रदत्तं रथं प्रतीयाय, यश्चादिन्द्रः पोप्रुयन्दिर् ऋक्। अश्विनौ, उत्तरेण तृचेन आश्विनाऽश्वावत्या इति। उषसं, कस्त उषः तृचः। ३३।४।१४.

शुनःशेपः विश्वामित्रस्य दत्तकः पुत्रः देवैर्दत्तः। स देवरातो नाम बभूव। ३३।५।२.

शुश्रुवान् गतश्रीः इत्युच्यते। १५।४।६ सायणः।

शुष्म=वीर्यम्। ४०।३।३.

शूद्रः अन्यस्य प्रेष्यः कामोत्थाप्यः यथाकामवध्यः। ३५।३।४.

शूद्रः अहुतादः आर्त्विज्याभावात्। २४।१।१.

शूद्रः। स्त्रीशूद्रयोः वेदाधिकारः प्रतिबद्धः। उपनीतस्यैव अध्ययनाधिकारं ब्रुवत् शास्त्रं अनुपनीतयोः स्त्रीशूद्रयोः वेदाध्ययनं अनिष्टप्राप्तिहेतुः इति बोधयति। कथं तर्हि तयोः इष्टोपायाद्विबोधः? पुराणादिभिः इति ब्रूमः। अत एवोक्तं 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा। इति भारतमाख्यानं मुनिना कृपया कृतम्॥' इति। उपोद्घाते सायणः पृ. २.

शूद्राणा धर्मानुष्ठानकाले आपो भक्षः। ३५।३।४.

शेषभक्षणं अग्नीषोमीयस्य पशोः नास्तीति केचित्, तन्न। किंतु अशितव्यं च लीप्सितव्यं च। लिप्सा इच्छा। ६।३।११-१२.

शेषभक्षणं होत्रा अग्निष्टोमे आश्विनग्रहस्य 'एष वसुः संयद्वसुः' इत्यादिना मन्त्रेण कर्तव्यम्। तच्च सर्वतः परिहार–सर्वासु दिक्षु स्वशिरसः परितो हरणं प्रदक्षिणं कृत्वा कर्तव्यम्।९।३।७-८। ऐन्द्रवायवग्रहस्य 'एष वसुः पुरूवसुः' इत्यादिना मन्त्रेण पुरस्तात् (प्राङ्मुखः सन्) प्रत्यञ्च (पात्र कृत्वा आत्मसंमुख) भक्षयति। ९।३।३-४। मैत्रावरणग्रहस्य तु 'एष वसुर्विदद्वसुः' इत्यादिना मन्त्रेण पुरस्तात् प्रत्यञ्च भक्षणम्। ९।३।६। सवनीयपुरोडाशाना 'यतो घृतेन अनक्त स्यात् ततः प्राश्नीयात्' इत्याहुः, तन्न तथा, किंतु यत एव कुतश्च प्राश्नीयात्। ८।९।६ ७.

शैशिरयोर्मासयोर्द्वादशाहः कार्यः। १९।४।१-३.

शौनःशेपाख्यानं राजसूये। तदेतत् परऋक्शतगाथं, शुनःशेपेन दृष्टाः (९७) ऋचः तिस्रश्चान्या मिलित्वा शतम्। ब्राह्मणे प्रोक्ता (३१) गाथाश्च। एतैः सर्वैरुपेतं 'हरिश्चन्द्रो ह' इत्यादिकं सर्वं शौनःशेपाख्यानम्। तत् होता राज्ञेऽभिषिक्तायाचष्टे। हिरण्यकशिपौ आसीन आचष्टे। 'हिरण्यकशिपौ आसीनोऽध्वर्युप्रतिगृणाति। 'विजितो राजा एतच्छृणुयात्, नैनः परिशिष्यते। अयं अयशसंयुक्तः कल्पः'। पुत्रकामाश्च शृणुयुः, लभन्ते ह पुत्रान्। ३३।१-६.

शौनःशेपाख्याने ऋचां प्रतिगरः ओऽऽऽम् इति । गाथाना 'एवं तथा' इति । ३३।६।१२-१३.

शौनकयज्ञः नाम दर्शपूर्णमासविकृतिरूपः।१४।२।१ सायणः ।

श्यापर्णनामकब्राह्मणकुलगतपुरुषरहितं यज्ञं विश्वंतरो राजा चक्रे । ३५।१।१.

श्यैत साम स्वामिदाह्यो नरः इत्यस्यामृच्युत्पन्नम् । १९।५।६ सायणः ।

श्रमः कार्यः,नान्यथा श्रीर्वा ज्ञानं वाऽन्यद्वा लभ्यते। नानाश्रान्ताय श्रीरस्ति इति रोहित शुश्रुम । पापो नृषद्वरो । जन इन्द्र इच्चरतः सखा । चरैवेति । इत्यादि अर्थवादकाण्डे१६२७क्रमाङ्के द्रष्टव्यम् । ३३।३।१-५.

श्रीकामः अग्निष्टोमे दीक्षणीयाया 'एना वो अग्निं, स योजते अरुषा' इति द्वे बृहत्यौ संयाज्ये कुर्यात् । १।५।१०.

श्रोणिः ऊरुमूलम् । ३१।१।२ सायणः ।

षडहः पृष्ठयो द्वादशाहे । २०-२२ अध्यायेषु । अभिप्लवः गवामयने आदित्यानामयने च । १८।१। १-५.

षडहे अहरहः शस्याः ककुन्तः प्रगाथाः 'करतमिन्द्र त्वा वसुं, कन्नव्यो अतसीना, ककुन्त्वस्याकृतम्' इति । २१।५।१.

षडहे चतुर्थेऽहनि षोडशिशस्त्रम् । पृष्ठ्ये । १६।१।१.

षडहे छन्दांसि क्रमेण गायत्री, अनुष्टुप्, त्रिष्टुप्, पङ्क्तिः, जगती, अतिच्छन्दाः इति । सामानि च क्रमेण रथंतरं, बृहत्, वैरूपं, वैराजं, शाक्वरं, रैवतं इति । १९।६।१-६.

षडहे शस्त्रस्तोत्राः।अनुरूपः, संपातसूक्तानि, आवपनीया ऋचः, अहीनसूक्तानि, अहरहः शस्यानि, ककुन्तः प्रगाथाः, सूक्तप्रतिपदः, परिधानीयाश्च इति ।२१।१-६.

षडहे स्तोमाः क्रमेण त्रिवृत्, पञ्चदशः, सप्तदशः, एकविंशः, त्रिणवः (३×९=२७), त्रयस्त्रिंशश्चेति । ३६।४।१ सायणः ।

षष्ठेऽहनि द्यौर्देवता, त्रयस्त्रिंशः स्तोमः, रैवतं साम, अतिच्छन्दाश्छन्दः । २२।७-१०.

षष्ठेऽहनि प्रस्थितयाज्याना पुरस्तात् प्रत्येकं पारुच्छेपीः ऋचः एकैकामुपदध्यात् । २२।५।१-५ । यजमानोऽध्वर्युश्च ऋतुयाज्या स्वयमेव पठेत्, न होत्रे प्रयच्छेत् । २२।४।२.

षष्ठेऽहनि शिल्पानि । अच्छावाकस्य-तत्र एवयामरुते न्यूङ्खः । ३०।४।३० । ब्राह्मणाच्छंसी-सुकीर्ति शंसति 'अप प्राचः' इति । वृषाकपिं शंसति 'वि हि सोतोरसृक्षत' इति । न्यूङ्खयति । ३०।३। नाराशंसीः शंसति प्रग्राहं,पादेपादे । न न्यूङ्खयेत्, निनर्दस्तु कर्तव्यः । रैभीः शंसति प्रग्राह न्यूङ्खो नास्ति, निनर्दः कर्तव्यः । पारिक्षितीः शंसति प्रग्राहं, न न्यूङ्खः, निनर्दः कर्तव्यः । कारव्याः शंसति प्रग्राहं, न्यूङ्खो नास्ति, निनर्दोऽस्ति । दिशां क्लृप्तीः शंसति पञ्च अर्धर्चशः, न्यूङ्खनिनर्दौ न स्तः । जनकल्पाः शंसति अर्धर्चशः । इन्द्रगाथाः शंसति अर्धर्चशः । (नाराशंसीरारभ्य इन्द्रगाथान्तं कुन्तापसूक्तं नाम त्रिंशदृचम्) । ३०।६ । ऐतशप्रलापं शंसति पदावग्राहं प्रवह्लिकाः शंसति अर्धर्चशः । आजिज्ञासेन्याः शंसति । प्रतिराधं शंसति । अतिवादं शंसति अर्धर्चशः । ३०।७। देवनीथं शंसति सप्तदशपदं पदावग्राहं, उत्तमेन पदेन प्रणौति (प्रणवं योजयति)।३०।८-९। भूतेच्छदः शंसति अर्धर्चशः । आहनस्याः शंसति दश, अत्र न्यूङ्खयति । दाधिक्रीं शंसति 'दधिक्राव्णो अकारिषं' इति । 'सुतासो मधुमत्तमाः' इति पावमानीः शंसति (तिस्रः) । अव द्रप्सो अंशुमतीमतिष्ठत इति ऐन्द्राबार्हस्पत्यं तृचं शंसति । ३०।१०। मैत्रावरुणः वालखिल्याः शंसति विहृताः । पच्छः प्रथमे सूक्ते, अर्धर्चशो द्वितीये, ऋक्शस्तृतीये । ३०।२।१-३ । अतिमर्शमेव विहरेत् प्रथमाया ऋचः प्रथमं पादं द्वितीयस्या ऋचः द्वितीयपादेन योजयेत् इति रीत्या षट् सूक्तानि । अष्टमं सप्तमत्वेन सप्तमं चाष्टमत्वेन शंसेत् । ३०।२।६,९। होता 'इदमित्था रौद्रं' इति नाभानेदिष्ठं शंसति, तस्य उपोत्तमायाः प्राक् 'ये यज्ञेन दक्षिणया' इति सूक्तं शंसेत् । ३०।१।६-१४ ।

षोडशकलं अग्निहोत्रम् । पयोरूपं अग्निहोत्रहविः षोडशप्रकारं षोडशदेवताकं भवति इति तदर्थः ।

२५।१।५-८.

षोडशिशस्त्रं अविहृतं यथाधीतपाठो,न व्यतिषङ्गः। १६।२।४ सायणः। तत् समृद्धो यजमानः शंसयेत्। १६।४।५-६। छन्दोगानुसारेण नानदसामपक्षे अविहृतत्वेन, गौरिवीतसामपक्षे च विहृतत्वेन शंस्तव्यम्। १६।२।१-४.

षोडशिशस्त्रं 'असावि सोम इन्द्र ते' इत्यादि। तत्र अन्तिमे तृचे अन्तिमायाः ऋचः प्राक् षोडशपदा निवित् (११।१-१६) धीयते। १६।१-२.

षोडशिशस्त्रं द्विविधं विहृतं अविहृतं च। तत्र अविहृतं नाम अध्ययनक्रमेणैव शंसनम्। विहृतं तु ऋचां परस्परं व्यतिषङ्गः। १६।१।४ सायणः।

षोडशिशस्त्रं सर्वं आश्वलायनश्रौते ६।२।१-१२; ६।३।१-१९ इत्यत्र द्रष्टव्यम्।

षोडशिसंस्थः ज्योतिष्टोमः उक्थ्यगर्भितः एकेन स्तोत्रेण अतिरिच्यते। तस्मात् अत्र षोडश स्तोत्राणि भवन्ति। १६।१।५ सायणः।

षोडशिसंस्थायां उत्तमे शस्त्रे परिधानीयायाः अन्तिमे वचने अन्तिमं चतुरक्षरं द्विरुक्त्वा प्रणुयात् 'सख्युः पदे सख्युः पदोऽऽऽम्' इति। २८।७।१-४.

षोडशिसाम गौरिवीतं विहृते, नानदं अविहृते। १६।१-२.

षोडशि स्तोत्रे एकविंशं साम तदीयतृचगतानामृचां आवृत्त्या सामगैर्गीयते। १४।३।२ सायणः।

षोडशी ज्योतिष्टोमस्य चतुर्थी संस्था। १५।५।१ सायणः।

संख्याविशेषः प्रातरनुवाके ऋचाम्। आयुष्कामस्य शतम्। यशस्कामस्य ३६०। प्रजापशुकामस्य ७२०। अब्राह्मणोक्तस्य दुरुक्तोक्तस्य शमलगृहीतस्य च ८००। स्वर्गकामस्य १०००। सर्वकामस्य अपरिमितं सहस्राधिकम्। ७।७।१-११.

संग्रामजयार्थिनं शरणागतं पुरुषं प्रति अभिषिक्तक्षत्रियेण यत् कर्तव्यम्। ऐशान्यां दिशि एनं यातयेत्, जयति ह तं संग्रामम्। ३७।६।६.

संचरः = सम्यक् चरन्ति अनेन इति मार्गः। स द्विविधः संस्थितसंचरः विसंस्थितसंचरश्च। सवने समाप्ते सदसः पश्चिमद्वारेण निर्गच्छति सोऽयं संस्थितसंचरः। असमाप्ते तु सवने प्राग्द्वारेण निर्गच्छति सोऽयं विसंस्थितसंचरः। ऐआ. ५।१।१० सायणः।

संज्ञानं नाम सूक्तं 'कया शुभा सवयसः सनीळा' इति पञ्चदशर्चं, एतेन इन्द्रः अगस्त्यः मरुतः ते समजानत। २३।१।१३-१६. ऐआ. १।६।११। इदमेव संतनि सूक्तं संततिप्रदम्।

संधिस्तोत्रं रथंतरसाम्ना निष्पाद्यम्। १६।६।११.

संपातः नाम सूक्तं 'आ न इन्द्रो दूरात्' इति एकादशर्चं 'कया महामवृधत्' इति च एकादशर्चम्। ऐआ. ५।८।३,६.

